† By the *S'abda-bheda,* or by the *S'abda prakás'a,* may be intended the *S'abda prabheda* of Mahes'wara Kavi, a collection of words of various orthography, in 450 couplets. But S'ivaráma refers to the *S'abda-bheda-prakás'a* several extracts which Jagaddhara professes to take from the *S'abda-prakás'a.* The *S'abda-prabheda* is not to be confounded with the *Vis'wa-prakás'a,* likewise by a Mahes'wara. I have seen an imperfect copy of a *S'abda-prakás'a,* which was digested by order of some Muhammadan of note, vaguely spoken of as Khana Nripati. The copy was transcribed in *Samvat* 1575.

A third body of annotations on the *Vásavadattá* is from the pen of a physician called Narasinha, as I hesitatingly read the name in the sole copy of his notes to which I have had access. The author was, presumably, a native of Bengal; and my manuscript of his work is in the character of that province.* This commentary is of small value, and is busied very much more with pointing out the figures of rhetoric which Subandhu exemplifies, than with anything else. Of Narasinha's age little can be said positively. One of his few authorities is the *Uttara-tantra*. He may have succeeded Jagaddhara and Śivaráma; and he probably did; but he does not allude to them, while he speaks of one Vidyáságara in a manner to induce the conjecture that he may once have laboured as an interpreter of our story.

Whether there are any more sets of scholia on the *Vásava-dattá* than those which have been gone over, it is impossible for me to say. But I may as well add that a rumour has reached me of the existence of another, attributed to Kṛishṇa Bhaṭṭa Árde.†

---

* Narasinha's text agrees, very generally, with that of my manuscript D, and this manuscript is not seldom peculiar. The learned of Bengal have, indeed, taken most unwarrantable liberties with more than one monument of Sanskrit literature. Such is the case notoriously, with the *Rámáyana* of Válmíki. It is no wonder, then, that Subandhu has not escaped the effects of their evil habit of tampering.

In one instance, Narasinha admits, in exchange for about two and a half lines of the text, as now printed, a passage quite different, and which, possibly, may be of many times its extent. For his commentary, besides not being a perpetual one, is most irregularly proportioned, in point of copiousness, to the parts of the original which it takes up. The clause alluded to, in place of which the unique reading of Narasinha is substituted, begins with सत and ends with —विप्रथे. See pp. 203 and 204.

† A Marahaṭṭá, of Benares; son of Ranganátha, and pupil of one Hari. Among his works are huge commentaries on the *Nirṇaya sindhu*, *Gádádharí* and *Jagadíśí*. The second is called *Kásiká* or *Gádádharí vivṛiti*; and the third, *Manjushá* or *Jagadíśa toshiṇí*. The *Gádádharí* is by Gadádhara Bhaṭṭácharya; the *Jágadíśí* by Jagadíśa Tarkálankára Bhaṭṭáchárya.

The commentaries of Jagaddhara and Narasinha have been carefully searched for various readings of the text, and all that seemed to merit notice have been consigned to the foot of the page Due heed has also been paid to the citations from Subandhu which are scattered over the *S'árngadhara-paddhati*,* since they embrace, with few reservations, all his attempts at versification. Ráya Mukuṭa and Vedánti Mahádeva, the lexicographers, have, further, been of aid to me, as reproducing, verbally, a number of passages and phrases from the text of the tale

---

ya They annotate, respectively, the whole, and a part, of the *Didhiti* of Raghunatha S'iromani Bhattacharya, which consists of notes on the first two sections of Ganges'a Upadhyáya's *Tattwa chintámani*, a celebrated treatise of *Nyaya* philosophy

* This is a voluminous miscellany, containing, with other matters, a poetical anthology Its author is S'arngadhara, who dates his work in *Samvat* 1420, or A D 1363 S'arngadhara was son of Damodara, son of Raghava The last had two sons in addition to Damodara, Gopala, senior to him, and Devadasa, his junior S'arngadhara had two younger brothers, Krishna and Lakshmidhara Raghava Deva, the author's grandfather, lived at S'akambhari, and was highly considered by Rája Hammíra, the Chauhan. Hammira reigned from A D 1325 to 1351, according to one authority, while another, Col Tod, says that he came to the throne in 1300 As Res, Vol X., p 192 Annals of Rajasthan, Vol I, p 269

S'arngadhara's readings of the *Vásavadatta* are not always in punctual accordance with my manuscripts For example

अविदितगुणाऽपि सुकवेर्भणितिः कर्णेषु किरति मधुधाराम्।

Compare the first line of the eighth page

In another collection of elegant extracts, by Veṇídatta, son of Jagajjívana, which was compiled in or after the time of Shah Jahan, I find a single couplet attributed to Subandhu

अयसात्तापदलिप्ता कुग्रामनपरिग्रहा ।
माद्रीव दैवजनोऽभंगद् वन्द्मीया प्रमेयज्ञा ॥

Padya veṇí second *taranga*

But this is not in the *Vásavadattá*; our Subandhu is not known to have written anything else, and we have no other proof of a second author of the same name An inadvertence in Veṇídatta's appropriation of this stanza may reasonably be suspected

There is said to be a version of the *Vásavadattá* in Bangálí, the work of one Madanamohana Tarkálankára. I have never seen it. The story has not, to my knowledge, been translated into any other Indian language.

The Sanskrit portion of this volume was printed in Calcutta, the editor being at Ajmere, and correcting the press over an interval of eleven hundred miles. But for this circumstance, the errors of impression might have been fewer than they are.

In connexion with the present undertaking, I have to acknowledge the kind offices of Pandits Bálakṛishṇa Khandakar, Viṭṭhala S'ástrin, and Rámanátha Páṭhaka

Fort-Saugor · Aug. 2, 1857.

Additions and Emendations

P. 8, notes, l. 24. In a second commentary on the *Bhaktámara stotra*, this tale is told rather differently, and with biographical additions. *Báṇa* was son-in-law of Mayúra. An earnest literary rivalry springing up between them, their respective eminence as poets was arbitrated by the goddess Saraswatí herself. The palm was awarded to Mayura, but with the assurance that his odds were of the scantest. The kinsmen then became reconciled.

It was in consequence of the imprecation of Báṇa's wife, that her father, Mayúra, became a leper. At Vriddha Bhoja's instance, he propitiated the sun with a poem. The luminary stooped from heaven, and he was healed. As for the wonder-working Manatunga Súri, who was also known as *Devácháryapatta*, 'the fillet of the preceptor of the celestials,' it is gravely enunciated that some authorities load him with forty-two chains, while others reduce the total to thirty-four. The precise number of padlocks that were hung on the door is not specified.

Four miles from the city of Bhopal I have discovered an inscription, only in part decipherable, dated in *S'aka 1017*, in which notice is taken of one Mánatunga Bhattachárya.

I have assumed that Vriddha Bhoja must be understood to intend Bhoja the elder. We have here to do with a king Bhoja is clearly discriminated from Vriddha Bhoja, in Bhava Mis'ra's *Bhava-prakás'a*. The prefix Vriddha, when used of a writer, has, as stated by Colebrooke, a very peculiar acceptation. Remarking on the ancient legal standards of the Hindus, he

speaks of "several works being ascribed to the same author, his greater or less institutes —*brihat* or *laghu*,—or a later work of the author, when old, *vriddha*" Thus, we find citations from Vriddha Manu, Vriddha S'atatapa, Vriddha Yajnavalkya, Vriddha A'pastamba, and Vriddha Pitámaha. Vriddha Sus'ruta denotes, however, I suspect, the more ancient of two Sus'rutus

P 8, notes, l 33 Substitute as follows During the time of Lakshmídhara,—son of Udayaditya, son of Bhoja,—a grant of a village was published by his younger brother, Narayarma Deva Its date is A D 1104. Lakshmidhara's reign was then near its close, but Narayarman lived, &c.

In one passage of the grant here mentioned, we find—on conjecturally supplying the first syllable—S'rilakshman, necessitated by the metre, as a substitute of poetic licence, for Lakshmidhara

The Marwadi translation of the *Sinhasana dwatrins'ati*—if such an authority be worth anything—represents Bhoja to have been reigning in *Samvat* 1066, or A D 1009 With greater probability, Bhoja is found spoken of as contemporary with Karna of Chedi, against whom Bhima Deva waged war between A D 1022 and 1072 Rás mala, Vol I, pp 83 and 90

P 9, notes, l 12 Add: "Munja and Bhoja, princes of Dhár, in the ninth and tenth century" As Res, Vol XVII, p 282 So too writes Professor Wilson

P 10 notes, l 4 ab infra For '*Vártika*' read '*Vartika*'

P 12, notes l 4 For '*Vishnu purána*' read '*Vishnu purána*'

P 12, notes l. 6 Since sending to press the account of the *Harshacharita* which there commences, I have procured a third copy of that work. Like my other exemplars, it is incomplete but it contains several chapters more than they, and it is very much more legible and intelligible I dare say the manuscript is three or four hundred years old In preparing the following additions and rectifications, I have also enjoyed the advantage of consulting the first two volumes of M Stanislas Julien's Voyages des Pèlerins Bouddhistes, which has been so genially, but most deservedly, eulogized by Professor Max Muller I am indebted to M Julien, and, in turn, while confirming much that he has said it may be that I can furnish him with a few small hints

The wife of Chyavana was Sukanyá, daughter of King S'aryati Dadhícha had a friend Vikukshi Saraswati's parents were Brahma and Savitrí For Saraswata read Saraswata. The Vatsyáyana spoken of is called a *muni*

Instead of Mahílatta, my new manuscript has Mahídharadatta, and the name of Chitrabhanu's wife is real Rashtradevi, not Rajyadevi

Among the companions of Bana, as a young man, were Bhadra and Naráyana, not Bhadranárayana, and, apparently, he and Harsha were acquaint-

ed in their boyhood Ganapati, Adhipati, Tarapati, and S'yamala, were his cousins germain, sons of his father's brother पितृव्यपुत्रभ्रातरः ।

Pushpabhu I nowhere find, in my new manuscript, in place of Pushpabhuti, the remote ancestor of Pratápas'íla Harsha's guest, son of the king of Malava should seem to have been a hostage

From Yashtigriha Bana passed to the town of Manipura The court of Harsha I have wrongly placed in the country of S'ríkantha This was the native province of Harsha's ancestor Pushpabhúti My attempt to identify it with Kanyakubja I also retract It is explicitly stated that the region of S'ríkantha comprehended the town of Stháṇwís wara that is to say, Sthanes wara, or Thanesar S'ríkantha is with scarcely a doubt the Su-lo k'in-na, which M Julien has unriddled into Srughna Voyages &c, Vol I, pp LVII, 105, and 416, and Vol II, pp 211—219 All that is yet known of Srughna appears to be derived from examples given in the grammars One of the gates of Kanyakubja was so called, as leading to it

I now return to Pushpabhuti In religion, he was a S'aiva, and one Bhairava A'charya initiated him This Bhairava, a maskarin, had two disciples, Patálaswámin and Karnatala, and a friend Tittibha Eventually he became a vidyádhara, or aerial demigod

Pratápas'íla, or Prabhakaravardhana, as he is likewise distinctly entitled, was a worshipper of the sun It is intimated that, among his exploits he subdued the Hunas, with Sindhu, Gurjara Gandhara, Lata, and Malava क्रमेणोत्पादि हूणहरिणकेसरी सिन्धुराजज्वरो गुर्जरप्रजागरो गान्धाराधिपगन्धद्विप-पाकलो लाटमालवलक्ष्मीलतापरशुः ।

His family consisted of three children, two sons, Rajyavardhana and Harsha or Harshavardhana, and a daughter, Mahadevi or Rajyas'ri Krishna, who sent a messenger to Bana, is said to have been Harsha's *bhrátri*: but this word, like its vernacular corruptions is used for 'cousin' and 'half brother' as well as for 'brother.' And here I have to note an error into which I fell, from trusting a learned German reviewer, when I had not yet access to M Julien's own words The French translator does not, in his first volume, make out S'iláditya to be younger brother of Harshavardhana As his second volume clearly declares, S'íláditya was another name of Harshavardhana, and it was Rajyavardhana, not he, as Professor Weber infers who was slain by the king of Karnasuvarna. M Julien's 'trois rois en deux générations" were Prabhakaravardhana, the father, and his two sons, Rajyavardhana and Harshavardhana See Voyages &c, Vol II, p 247 I may remark, here, that Hiouen Thsang is venially mistaken in speaking of Rájavardhana

Prabhakaravardhana's spiritual guide was one Mallaragupta Taraka

sha directs his steps He is visited by Bhúkampa, a military retainer to a local dignitary, Vyághraketu, son of S'arabhaketu. These names, by the bye, seem to be coinages suggested by the fancied fitness of circumstances. Bhúkampa knows nothing of Rajyas'rí's present quarters, and recommends that Harsha should seek for information at a neighbouring hamlet. She is discovered when on the very point of burning herself And thus ends my new manuscript of the *Harsha-charita*, in the midst of the eighth chapter.

Skandagupta, while counselling Harsha to avenge the murder of his brother, consoles him by recapitulating historical instances of untimely death The learned commandant had heard of numerous mischances of this kind, which are now known only by his retail of them Nagasena, of the Naga family, was destroyed at Padmavati. Perfidy abridged the days of S'rutavarman at S'ravasti, and of Swarnachúda the Yavana Martikavata lost his life from talking in his sleep Agnimitra's son, Sumitra, was slain by Múladeva, Brihadratha the Maurya, by his own general, in Pushpamitra, Kákavarna, lord of Chandi, by a descendant of S'is'upala, Devabhúti, the S'aunga, through the instrumentality of his own minister, Vasudeva; Magadha, by the counsellor of the governor of Mekhala, Jaghanyaja, son of Pradyota, by Talajangha; a Gajapati king of Videha, by Kumarasena, in the guise of a leech, Bhadrasena, king of Kalinga, by Virasena, his brother, Vajraprabhava, ruler of Karusha, by his younger son, a prince of the S'akas, at Nalinapura, by Chandragupta, habited as a woman; Chandraketu, prince of the city of Chakora, by an emissary of King S'údraka, Mahasena, prince of Kas'i, by Suprabhá, a duke of Ayodhyá, by Ratnavatí, Rantideva, by Rangavatí, one of his wives, Viduratha, by Bindumatí, Virasena, of Sauvíra, by Hansavatí, and Soma a monarch of the Púrus, by a woman of his own race Devasena, of Suhma, was poisoned by Devakí, and Bharata, who reigned over As'maka, was also cut off before his time, as were Pushkara, prince of Chamundi, Kshetravarman, the Maukhari, Brihadratha, of Mathura, Vátsapati, King Varnatula; and S'ars'unali, who committed suicide.

Among the Vindhyas Harsha meets with a holy mendicant, Divakaramitra by name, a Bauddha pervert from Hinduism. In his vicinity resided various religionists, whose denominations I detail; it being interesting to know what sects had existence in the seventh century A'rhatamaskarins, S'wetavratas, Pandurabhikshus, Bhagavatas, Varnins, Laukayatikas, Jainas, Kápilas, Kanádas, Aupanishadas, I's'warakaranins, Dharmas'astrins, Pauranikas, Saptatantavas, S'abdas, and Pancharatras

From Hiouen Thsang we learn that Harsha was further called S'iladitya. Of this assertion there is not an inkling in what I have seen of the *Harsha-charita* Its truth is, indeed, open to grave question; for the titles of

The *Nagananda* is named, among other places, in the *Das'arúpakávaloka* of Dhanika, son of Vishnu.

P. 18, notes, l 38 In the Bangálí pamphlet referred to at p 7 supra, an anecdote is told of the poet S'ríharsha. I have often heard it from the mouths of the pandits On finishing the *Naishadhíya*, S'ríharsha showed it to his maternal uncle, Mammata Bhatta, author of the *Kávya prakás'a*. The critic, after perusal, expressed a regret that he had not seen it sooner. In compiling his chapter on blemishes, he had been put to the trouble of travelling through numberless volumes, in search of illustrations. Had *he only known of the Naishadhíya in time, he might have drawn on it*, he added, without going further, to exemplify every possible species of defect.

P. 19, notes, line 34. Insert, The Professor, speaking of *dandins*, says that "the author of the *Das'a-Kumára*" was "of the same class of ascetics" As Res, Vol XVII, p 182.

P 20, l 3 Delete the words '*from it*'

P 21, notes, l 20 For 'Dhanaveda' read 'Dhanadadeva.'

P. 21, notes, l 21. For 'Márula' read 'Máruta,' and 'Moriká' for 'Maurika.'

P 21, notes, l 23 For '*Pada chan driká*' read '*Pada chandriká*'

P. 22, notes, l 19 For 'in' read 'is'

P. 23, notes, l 10 Add· Dhanika, according to one of my three copies of his scholia, annotating the word बृहत्कथा, says

बृहत्कथामूलं मुद्राराक्षसम्।

चाणक्यनाम्ना तेनाऽथ शकटालगृहे रहः।
कृत्यां विधाय सप्ताहात् सपुत्रो निहतो नृपः॥
योगानन्दे यशःशेषे पूर्वनन्दसुतस्ततः।
चन्द्रगुप्तः कृतो राज्ये चाणक्येन महौजसा॥

इति बृहत्कथायाम्।

These couplets are also found, accompanied by the same indication of their origin, in Dhundhiraja Vyasa's notes on the *Mudra-rákshasa* drama As they do not occur in the *Kathá-sarit-ságara*, it thus looks as if the *Brihat-kathá* had been in Sanskrit

P 24, l 7 For 'impassive' read 'passive'

P 29, l 15 For 'S'hiva' read 'S'iva'

P 32, notes, l 3 ab infra For 'Pentingerian' read 'Peutingerian'

P 36, notes, l 8. Add: Hiouen Thsang says that the antient capital of the kingdom of Kanyákubja likewise bore the name of Kusumapura

The Chinese is *Keou-sou mo pou lo* as M Stanislas Julien writes the word *Voyages des Pèlerins Bouddhistes* Vol II p 244

P 38 notes l 5 Add With *śārikā* compare the word *abhisārikā*

P 39, notes, l 8 Insert: Also compare the thirty-second stanza of Pushpadanta's *Mahimna stava* Journal of the Asiatic Society of Bengal, for 1839, p 366

P 40, notes l 4 Add The original—at pp 238 and 239—of the passage to which this note is appended contains *four* specimens of those peculiar verbs which certain grammarians have termed denominatives See also the *Gita govinda* Professor Lassen's edition, p 20 *s l* 10 But the most copious array that I have anywhere come upon is in the ensuing stanza of the poetess Gauri as given in the first chapter of Venidatta's poetical anthology, the *Padya vení*

'कालिन्दीयति कज्जलीयति कलानाथाङ्कमालीयति
व्यालीयत्यलिमण्डलीयति मुहुः श्रीकण्ठकण्ठीयति ।
शैवालीयति कोकिलीयति महानीलाश्मजालीयति
सङ्ग्रामे रिपुदुर्यशस्तव नृपालङ्कारचूडामणे ॥

Here as one sample out of nine, the phrase 'resembles a bank of very dark clouds' is expressed by a single vocable Nor are words of this description to be reputed analogous to the ludicrous agglomerations of Aristophanes, for instance They are simply legitimate exemplifications of the wonderful ductility of the Sanskrit and may be compared with the developements of our own language which are to be found in some chapters of Southey's Doctor

P 47, l 10 For 'Jagadhara' read 'Jagaddhara'

P 47, notes l 13 For '394' read '294'

वासवदत्ता

दर्पणेन सहिता ॥

यो रक्ततामतितरामतुलां दधानो
दिक्प्रौढदारहृदयोरनवाप्तवापः ।
योषिद्द्वयोपतिविडम्बनभृत् स भस्वत्
पायादपायसमुदायहरो रविर्नः ॥

एकोऽन्ते द्विसमखिलोचन इति ख्यातश्चतुर्भिः सुतो
वेदैः पञ्चमुखः षडाननपिता सप्तर्षिभिर्वन्दितः ।
अष्टाङ्गो नवतुल्य सामरगणै वासो दशाशा दधत्
यश्चैकादश सोऽवतान्न विजितो यो द्वादशात्मांशुभिः ॥

भूदेवानां गुरुदेवानामाशिषां प्रणतेः पदम् ।
देवतायाः प्रसादेन वाचां सिद्धेः परं पदम् ॥

त्रिलोकचन्द्र इत्यासीत् ख्यातो लोकेषु चन्द्रवत् ।
तनयो विनयोपेतो यवीयानस्य दैववित् ॥

कृष्णरामाभिधः सूरिश्चतुर्भिस्तनयैर्युतः ।
राजते राजनीतिज्ञः सामाद्यैरिव भूपतिः ॥

यः पाठकानां कृपयाप्तविद्यः
स कार्ष्णरामिः शिवरामनामा ।
गोविन्दरामोऽथ मुकुन्दरामो
जातः क्रमात् केशवरामनामा ॥

करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः ।
पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥
खिन्नोऽसि मुञ्च शैलं बिभ्रमो वयमिति वदत्सु शिथिलभुजः ।
भरभुग्नविततबाहुषु गोपेषु हसन् हरिर्जयति ॥

सुबन्धुवर्गबोधाय सुबन्धुकविसत्कृतेः ।
रम्या व्याख्या दर्पणाख्या शिवरामेण तन्यते ॥

प्रारीप्सितस्य निरन्तरायपरिसमाप्तये कृतं मङ्गलं शिष्यशिक्षार्थं निबध्नाति। करबदरेति। यत्प्रसादतः सूक्ष्ममतयः कवयोऽखिलं समस्तं भुवनतलं भुवनस्वरूपं करे बदरं-बदरीफलम्। फले लुगिति लुक्। तत्सदृशं पश्यन्ति। सा सरस्वती देवी वागधिदेवता जयति सर्वोत्कर्षेण वर्तते। स्वरूपाधोऽर्ध्वयोस्तलमिति रुद्रः। अधःस्वरूपयोरस्त्री तलमित्यमरः। आर्या वृत्तम्।

लक्ष्मैतत् सप्तगणा गोपेता भवति नेह विषमे जः।
षष्ठोऽयं नलघू वा प्रथमेऽर्धे नियतमार्यायाः॥
षष्ठे द्वितीयलात् परके न्ले मुखलाच्च सयतिपदनियमः।
चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः॥

इति लक्षणात्।

खिन्नोऽसीति। हे कृष्ण खिन्नोऽसि। गोवर्धनधारणादिति भावः। शैलं गोवर्धनं मुञ्च वयं बिभ्रम इति गोपेषु वदत्सु शिथिलभुजः श्लथबाहुः। भरेण गिरिभरेण भुग्नाः कुटिला बाहवो येषां तादृशेषु सत्सु हसन् हरिः कृष्णो जयति। भुजो

कठिनतरदामवेष्टनलेखासन्देहदायिनो यस्य।
राजन्ति वलिविभङ्गाः[१] स पातु दामोदरो भवतः॥

कोटिल्ये। श्वीदितश्चेति निष्ठानत्वम्। यस्य च भावेन भावलक्षणमिति गोपेष्वित्यत्र सप्तमी। एकेन त्वयेदं कृतं किमस्माभिर्न धार्यत इति सगर्वतया वयमिति बहुवचनाभिधानमुद्दीपनविभावः। तथा च भरतः।

विपरीतालङ्कारैर्विकृताचाराभिधानवेशैश्च।

इति। भुजकौटिल्यमनुभावः। तथाच भरतः।

विकृताकारैर्वाक्यैरङ्गविकारैश्च विकृतवेषैश्च।

इति।

विकासिलकपोलान्तमुत्फुल्लाननलोचनम्।
किञ्चिल्लक्षितदन्ताग्रं हसितं तद्विदो विदुः॥

इति भरतः। कृष्णविषयकरतिरूपभावस्य हास्यरसोऽङ्गमिति रसवदलङ्कारोऽत्र।

कठिनेति। कठिनतरं यद्दामवेष्टनं तेन लेखा रेखास्तासां सन्देहदायिनो यस्य वलिविभङ्गास्त्रिवलिपङ्क्तयो राजन्ति। स दामोदरो भूतपूर्वगत्या दामोदरता। भवतो युष्मान् पातु। वलिस्त्रिवलिदैत्ययोरिति विश्वः। दामोदरविषयरतिरूपभावस्य पराङ्गत्वात् प्रेयोऽलङ्कारोऽत्र।

---

१ -भागाः A II

स जयति हिमकरलेखा चकास्ति यस्योमयोत्सुका न्निहिता।
नयनप्रदीपकज्जलजिघृक्षया [1] रजतशुक्तिरिव ॥
भवति सुभगत्वमधिकं विस्तारितपरगुणस्य सुजनस्य।
वहति विकासितकुमुदो द्विगुणरुचिं हिमकरोद्योतः ॥

स इति। उमयोत्सुकादौत्कण्ठ्यात्। नयनं भालनेत्रं तदेव प्रदीपो दीपस्तस्य कज्जलजिघृक्षया तदीयकज्जलग्रहणेच्छया रजतशुक्तिरिव रौप्यशुक्तिरिव। कजरवटा इति भाषायाम्। निहिता स्थापिता। यस्य हिमकरलेखा चन्द्ररेखा चकास्ति स शिवो जयति। विशेषणद्वारा विशेष्यप्रतिपत्तिरिति हरो लभ्यते। अत्र सुधर्मिता गुणः। यत्र विशेषणद्वारा विशेष्यलाभः सा सुधर्मितेत्यलङ्कारेश्वरः। उत्सुकशब्दोऽत्र भावप्रधानः। यद्वा। अन्तति बध्नातीत्यन्। उत्सुकस्यानुत्सुकान्। उत्कण्ठितबन्धनकर्त्री। अत्युत्कण्ठोत्पादिकेति यावत्। अति अदि बन्धने। क्विप्। हिमकरलेखाविशेषणम्। अह उपादाने। मन्। अ प्रत्ययादित्यकारप्रत्ययः। अ सामतिक इति तु जगद्धरस्य प्रमाद एव। औत्सुक्यमत्र शृङ्गाररसस्य व्यभिचारिभावः। उन्मुखा निहितेति क्वचित् पाठः।

परोपकृतये सर्वथा यतनीयमिति खलान् प्रत्याह। भवतीति। विस्तारिता अनेकेषां श्रुतिपथं नीताः परेषां स्वातिरिक्तानां गुणाः सरस्वतीलक्ष्मीचमादिजनिता येन तस्य सुज-

---

[1] मह E

विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः।
यदयं नकुलद्वेषी सकुलद्वेषी पुनः पिशुनः॥

नस्य सुभगत्वं सौभाग्यमधिकं भवति। अनुपक्रत्यवस्थापेचये-त्यर्थः। विकाशितानि कुमुदानि येन तादृशः। शरत्कालिक इत्यर्थः। हिमकरोद्योतश्चन्द्रातपो द्विगुणरुचिं वर्षाकालिकापेचयाधिकां कान्तिं वहति। अर्थान्तरन्यासोऽलङ्कारः।

उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः।

प्रकाशो द्योत आतप इत्यमरः।

विषधरत इति। विषधरतोऽपि सर्पादपि खलो दुर्जनोऽतिविषमोऽतिक्रूर इति विद्वांसः पण्डिता मृषा मिथ्या न वदन्ति अपितु तथ्यमेव। यद्यतोऽयं सर्पः न कुलं द्वेष्टुं शीलमस्य तादृक्। यस्यास्यापराधी तमेव दशति न तु तत्कुलद्वेष्टीत्यर्थः। पिशुनो दुर्जनः पुनः सकुलद्वेषी। योऽस्य द्वेषविषयस्तस्य सकुलस्यायं द्वेष्टेत्यर्थः। पचे नकुलो द्वेषो द्वेष्टा शत्रुर्यस्य। स प्रसिद्धः पिशुनः कुलद्वेषी सकुलद्वेष्टा। पिशुनो दुर्जनः खलः। आशीविषो विषधर इति द्वयोरमरः। सभङ्गश्लेषार्थान्तरन्यासयोः सङ्करः।

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्र सोऽर्थान्तरन्यासः।
अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वे तु सङ्करः॥

अतिमलिने कर्तव्ये भवति खलानामतीव निपुणा धीः।
तिमिरे हि कौशिकानां रूपं प्रतिपद्यते चक्षुः॥
विध्वस्तपरगुणानां भवति खलानामतीव मलिनत्वम्।
अन्तरितशशिरुचामपि सलिलमुचां मलिनिमाभ्यधिकः१॥

अतिमलिन इति। खलानां पिशुनानां धीर्बुद्धिरतिमलिने सतामनुपादेये कर्तव्ये कार्येऽतीवात्यन्तं निपुणा स्वविषयग्रहणपटुर्भवति। हि यतस्तिमिरेऽन्धकारे कौशिकानामुलूकानां चक्षू रूपं स्वविषयं प्रतिपद्यते गृह्णाति। यद्वा। रूपं विषयग्राहकत्वरूपं स्वभावं प्रतिपद्यते प्राप्नोति।

रूपं स्वभावे सौन्दर्ये शुक्लादिपशुभेदयोः।

इति विश्वः। अतीवेत्यव्ययसमुदायोऽतिशये।

महेन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिकः।

इत्यमरः। काव्यलिङ्गमलङ्कारः।

समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्।

विध्वस्तेति। विध्वस्तपरगुणानां खलानामतीव मलिनत्वं भवति। अव्ययानामनेकार्थत्वादपिर्हेतौ। अपि यतोऽन्तरितशशिरुचां छादितचन्द्रकान्तीनां सलिलमुचाम्। हेतुगर्भम्। वर्षाकालिकमेघानां मलिनिमा। इमनिजन्तः। मालिन्यमधिकं भवति। परिकरालङ्कारः।

अलङ्कारः परिकरः साभिप्राये विशेषणे।

---

१ -चन्द्रिका D

हस्त इव भूतिमलिनो यथा यथा लङ्घयति खलः सुजनम्।
दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायम्॥
सा रसवत्ता विहता नवका विलसन्ति चरति नो कं कः।
सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये॥

दुर्जनोऽन्यान् खोत्कर्षार्थं निन्दति तत्राभिनिवेशो व्यर्थ एवेति मदर्शयन्नाह। हस्त इवेति। खलो भूतिमलिनो हस्त इव यथा यथा सुजनं लङ्घयत्युल्लङ्घयति। पक्षे। घर्षयति। तं सुजनं दर्पणमिव तथा तथा निर्मलच्छायमुज्ज्वलकान्तिं कुरुते। भूतिर्भस्मनि सम्पदि। दर्पणे मुकुरादर्शौ। छाया सूर्यप्रिया कान्तिरिति विश्वमरः। पूर्णोपमा। साधर्म्यमुपमाभेदे।

वर्तमानकालिकान् नृपतीन् स्तवनायोग्यान् ध्वनयन् विक्रमादित्यं स्तौति। सारसेति। विक्रमादित्ये राजनि सरसीव सरोवर इव कीर्तिशेषं गतवति विरामं प्राप्ते सति भुवि पृथिव्यां सा पुरुषान्तरेऽनुपलभ्यमाना वीर्यवत्ता विहता नष्टा। नवकाः कुत्सित इति कन्। कुत्सितनवराजा विलसन्ति विलासं कुर्वन्ति। अतः कः सबलः कं निर्बलं नो चरति न भक्षति। अत्यर्थं पीडयतीति यावत्। अराजकत्वादिति भावः। यद्वा। नवका अज्ञात इति कन्। अज्ञातनामगोत्रगुणा राजानो विलसन्ति। अतः को जनः कं व्यवहारं नो चरति न करोति। हेतुसूक्त एव। यद्वा। सा रसवत्ता शृङ्गारादिरसवत्ता गुणवत्ता वा धर्मो साभिलाषता वा विहता। अतो नवका अनुकम्पायां कन्। अनुकम्पितनवीनकवयो विलसन्ति। गुणपक्षोचभावेना-

अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम्।
अनधिगतपरिमलापि हि हरति दृशं मालतीमाला॥
गुणिनामपि निजरूपप्रतिपत्तिः परत एव सम्भवति।
स्वमहिमदर्शनमक्ष्णोर्मुकुरतले जायते यस्मात्॥

सदादीनां प्रचाररोधित्वेनेति भावः। अतः कस्मात् पण्डितम्मन्यः कं मूर्धानं नो चरति न गच्छति नारोहति। अपि-त्वारोहत्येव। पक्षे। सा रसवत्ता जलवत्ता विद्यते। अतएव बकाः कङ्का भाषायां बकुला इति ख्याता न विलसन्ति। कङ्को लोहपृष्ठः ककङ इति ख्यातो नो चरति। यद्वा। सारसः पक्षिविशेषस्तद्वत्ता। कमलवत्ता वा।

शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः।

अथ बकः कङ्कः पुष्कराक्षस्तु सारसः। लोहपृष्ठस्तु कङ्कः स्यात्। कासारः सरसी सरः। कं शिरोऽम्बुनोः। सारसं सरसीरुहम्। इति षट्स्वमरः। चर गतिभक्षणयोः। सभङ्गाभङ्गश्लेषयोः संसृष्टिः।

सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः।

अविदितेति। अविज्ञाता गुणा ओजःप्रसादमाधुर्यरूपा यस्यास्तादृश्यपि सत्कविभणितिः कर्णेषु मधुधारां क्षौद्रधारां वमत्युद्गिरति। यथा क्षौद्रधारासङ्गाद्रसनासुखमेवं सत्कवि-भणितिश्रवणात् कर्णयोः सुखमित्यर्थः। हि यतोऽनधिगतप-रिमलापि मालतीमाला दूरमनुवातस्थितस्य दृष्टिं हरति।

गुणिनामिति। गुणिनामपि निजरूपप्रतिपत्तिः स्वरूप-

सरस्वतीदत्तवरप्रसादश्चक्रे सुबन्धुः सुजनैकबन्धुः।
प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्यनिधिर्निबन्धम्॥

ज्ञानं परत एव परस्मादेव सम्भवति। तेन निर्गुणानां स्वरूपज्ञानं परस्मादेव किमाश्चर्यम्। यस्माद्यतोऽक्ष्णोः स्वमद्दिमदर्शनं स्वविस्तारदर्शनं मुकुरतले जायते। सर्वदर्शनक्षमयोर्नेत्रयोः स्वमहत्त्वदर्शनं दर्पणाधीनमेवेत्यर्थः।

सरस्वतीदत्तेति। प्रगतः सादोऽस्येति प्रसादः। सरस्वतीदत्तेन वरेणाभीष्टेन प्रसादो विगतकार्श्यः। स्वीयाद्भुतोक्तिविभावनानन्दतुन्दिलत्वादित्यर्थः। यद्वा। सरस्वतीदत्तवरेण प्रसादः प्रसन्नता यस्य सः। सर्वोत्कृष्टा सत्कृतिरिति प्रसन्नताविशिष्टत्वम्। अमुमेवार्थमभिसन्धाय बाणेनाप्यभाणि।

कवीनामगलद्दर्पो नूनं वासवदत्तया।
शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम्॥

इति। प्रसादस्तु प्रसन्नतेत्यमरः।

वरोऽभीष्टे देवतादेर्वरो जामातृषिङ्गयोः।
श्रेष्ठेऽन्यवत् परिवृतौ।
प्रसादोऽनुग्रहे काव्यप्राणस्वास्थ्यप्रसत्तिषु।

इति द्वयोर्विश्वप्रकाशः। सुजनैकबन्धुः सज्जनानामद्वितीयो भ्राता। प्रत्यक्षरश्लेषमयो यः प्रबन्धस्तस्य विन्यासे रचनायां वैदग्ध्यं नैपुण्यं तस्य निधिः सुबन्धुनामकः कविर्निबन्धं चक्रे। व्यापारान्तराविष्टमनसो ममास्य निर्माणे प्रवृत्तिर्न त्वन्यकामन-

अभूदभूतपूर्वः　सर्वोर्वीपतिचक्रचारुचूडामणिश्रेणीशाण-

प्रणिधानपूर्वकमेवेति सुकरतां ध्वनयितुं लिटः प्रयोगः। उपजातिवृत्तम्।

अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।

इति लक्षणात्।

अनुप्रासेनाह। अभूदित्यादि। चिन्तामणिर्नाम राजाभूदित्यन्वयः। पूर्वं भूतो भूतपूर्वः सुप् सुपेति समासः। भूतपूर्वे चरडिति निर्देशाद्भूतशब्दस्य पूर्वनिपातः। पश्चान्नञ्समासः। अभूतपूर्वः। तादृक् पूर्वं कोऽपि नाभूदित्यर्थः। सर्वेषामुर्वीपतीनां चक्रं समूहस्तस्य चारुचूडामणिश्रेणी पङ्क्तिः सैव शाणो निकषस्तस्य कोणोऽयं तस्मिन् कषणेन निर्मलीकृतचरणनखो मणिरिवेत्युपमितं व्याघ्रादिभिः सामान्याप्रयोग इति समासो व्याघ्रादेराकृतिगणत्वात्। स यस्य सः।

जनावर्गे समूहे च दम्भे भेदरथाङ्गयोः।

शस्त्रभेदे च सेनायां चक्रं चापि विहङ्गके॥

इति रन्तिदेवः। चूडामणिः शिरोरत्नम्। वीथ्यालिरावलिः पङ्क्तिः श्रेणी। निकषः कष इति विश्वमरः। श्रेणिरितिह्रस्वपाठे तु

अग्रभागे च पङ्क्तौ च श्रेणिरुक्ता मनीषिभिः।

इति विश्वः। छेकानुप्रासः।

स्यात् पादपदवर्णानामावृत्तिः संयुतायुता।

अतत्पदः स्यार्च्छेकानाम्।

क्षोणक्षपणनिर्मलीकृतचरणनखमणिर्नृसिंह इव दर्शितहि-
रण्यकशिपुक्षेत्रदानविस्मयः कृष्ण इव कृतवसुदेवतर्पणो

इति। ओजो गुणः। ओजः समासभूयस्त्वमिति। वैदर्भी रीतिः। एका भूयःसमासा स्यादिति त्रिपु वाग्भट्टालङ्कारः। काव्यप्रकाशरीत्या वृत्त्यनुप्रासः। एकस्याप्यसकृत् पर इति। काव्यादर्शरीत्या वक्ष्यमाणाः समानोपमाः।

सरूपशब्दवाच्यत्वात् सा समानोपमा मता।
बालेवोद्यानमालेयं सालकाननशोभिनी॥

इति। अलङ्कारशेखररीत्या श्लेषोपमेयम्। पदश्लेषनिबन्धनं साम्यं श्लेषोपमा। उक्तमेवोदाहरणं मतान्तरे।

श्लेषोपमासङ्करेणाह। नृसिंह इव दर्शितो हिरण्यकशिपो-दैत्यस्य क्षेत्रदानेन शरीरखण्डनेन विस्मयो येन सः। दोऽव-खण्डने। पक्षे हिरण्यं सुवर्णं कशिपुर्भोजनाच्छादने क्षेत्रं केदा-रस्तेषां दानेन वितरणेन शेषं प्राग्वत्। एवमग्रेऽपि। कशिपु-रन्नमाच्छादनं द्वयमित्यमरः। अन्नवस्त्रदक्षिणाप्रद इति भावः।

क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः।

इति विश्वप्रकाशः।

वाच्यभेदेन भिन्ना यद्युगपद्भाषणस्पृशः।
श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा॥

कृष्ण इव कृतं वसुदेवस्य तर्पणं तृप्ती रक्षणं वा येन वरु-णाद् वा कंसाद् वा धातूनामनेकार्थत्वाद् रक्षणार्थस्तृपिः।

c 2

नारायण इव सौकर्यसमासादितधरणिमण्डलः कंसारातिरिव जनितयशोदानन्दसमृद्धिरानकदुन्दुभिरिव कृतकाव्या-

---

तर्पणं प्रीणनावनमित्यमरः। पक्षे कृतं वसुभिर्द्रव्यैर्देवानां तर्पणं प्रीणनं येन। यद्वा। कृतं वसूनां ध्रुवादीनां देवानां च तर्पणं येन।

ध्रुवो धरश्च सोमश्च आपश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभावश्च इत्यष्टौ वसवः स्मृताः॥

नारायण इव सौकर्येण सूकरभावेन समासादितमुद्धृतं धरणिमण्डलं येन। आह्वाणादित्वाह्नावे यत्।

तालव्या अपि दन्त्याः स्युः शम्बसूकरपांसवः।

इति शकारभेदः। पक्षे सौकर्येणानायासेन समासादितमाक्रान्तम्। सौकर्यं स्यादनायासे क्रियायां सूकरस्येति विश्वप्रकाशः।

कंसारातिरिव जनिता यशोदानन्दयोः समृद्धिर्वृद्धेराधिक्यं येन। यशोदाया आनन्दसमृद्धिर्वा येन। पक्षे आनन्दकारिणी समृद्धिः शाकपार्थिवादिः। जनिता यशोदा कीर्तिप्रदानन्दसमृद्धिर्येन। पर्याप्तातिरिक्ते निर्लोभ इति ध्वनिः।

आनकदुन्दुभिरिव कृतः काव्यायाः पूतनाया दरखामो येन। यद्वा। कृतकावी तत्पुत्री तयोरादरो यस्येति गुरुचरणाः।

वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः।

इति विष्णुप्रकरणेऽमरः। दरखामो भीतिर्भीरिति च।

दरः सागरशायीवानन्तभोगिचूडामणिमरीचिरञ्जितपादपद्मो वरुण इवाशान्तरक्षणोऽगस्त्य इव दक्षिणाशाप्रसाधको जलनिधिरिव वाहिनीशतनायकः समकरप्रचारश्च हर

कार्ये ग्रन्थे पुमान् शुक्रे काव्याख्या पूतना मता।

इति विश्वः। पक्षे कृतः काव्ये लोकोत्तरवर्णनरूपे कर्मण्यादरो येन। यद्वा कृतकाव्यानां कवीनामादरो यस्मात्। यथासौ मर्माभिज्ञतया कवीन् मानयति तथा नान्य इति भावः।

सागरशायीव। नारायण इव। अनन्तभोगी शेषस्तस्य चूडामणिमरीचिभी रञ्जितपादपद्मः। शेषोऽनन्त इत्यमरः। पक्षेऽनन्ता अनेके भोगिनो विलासिनः। न केवलं सम्राड्भिः सेव्योऽपितु समृद्धैः पौरैरपीति भावः।

वरुण इव। आशा पश्चिमदिक् तदन्ते रक्षणं यस्य। दिशस्तु ककुभः काष्ठा आशाश्चेत्यमरः। पक्षेऽशान्तमविरतं रक्षणं प्रजापालनं यस्य।

अगस्त्य इव दक्षिणाशा दक्षिणदिक् तस्याः प्रसाधकोऽलङ्कर्ता। पक्षे दक्षिणाया आशा तृष्णा। आशा तृष्णादिशो-र्मता इति विश्वप्रकाशः। यद्वा दक्षिणानां कुशलानां परच्छन्दानुवर्तिनां वाशाप्रसाधकः।

दक्षिणः सरलेऽवामे परच्छन्दानुवर्तिनि।
याच्यवद्दक्षिणावाची यज्ञदानप्रतिष्ठयोः॥

इति विश्वप्रकाशः।

इव महासेनानुगतो [१]निवर्तितमारस्य मेरुरिव विबुधालयो विश्वकर्माश्रयस्य रविरिव क्षणदानप्रियश्छायासन्तापहरस्य [२]कुसुमकेतुरिव जनितानिरुद्धसम्पद्रतिसुखप्रदस्य विद्याधः

जलधिरिव। वाहिनीशतस्य नदीशतस्य नायकः। मकराणां जलजन्तुविशेषाणां प्रचारेण महितत्वादृक्। अथ यादांसि जलजन्तवः।

तद्भेदाः शिशुमारोद्रशङ्कवो मकरादयः।

इत्यमरः। पक्षे वाहिनीशतस्य सेनाशतस्य नायकः प्रभुः। समो हिताहितसाधारणः करस्य राजग्राह्यभागस्य प्रचारो यस्य। यद्वा समः सलक्ष्मीकः करस्य हस्तस्य प्रचारो यस्य।

तरङ्गिण्यां च सेनायां वाहिनी परिकीर्तिता।

इति विश्वः। बलिहस्तांशवः करा इत्यमरः।

हर इव महासेनेन कार्तिकेयेनानुगतः। निवर्तितो मारः कामो येन। कार्तिकेयो महासेनः। मदनो मन्मथो मार इत्युभयत्रामरः। पक्षे महत्या सेनयानुगतः। निवर्तितो मारयतीति मारो विघ्नो येन। मृङ् प्राणत्यागे णिजन्तादच्। मेरुरिव विबुधानां देवानामालयः। विश्वकर्मा सूर्यो देवशिल्पी वा तदाश्रयः।

विश्वकर्मा देवशिल्पी विश्वकर्मा दिवाकरः।

---

१ निर्जित- A B C E F G H इति मर० च। विजित- D २ मकर- C इति लग० च।

रोऽपि सुमना धृतराष्ट्रोऽपि गुणप्रियः १क्षमानुगतोऽपि

इति विश्वः। पक्षे विबुधानां पण्डितानामालयः। विश्वेषां जनानां कर्म शिल्पादि तदाश्रयः। रविरिव क्षणदा रात्रिर्न प्रियेष्टा यस्य। छायाया निजस्त्रियाः सन्तापहरस्य। न प्रियेत्यत्र नैकधेत्यादिवन्निषेधार्थको न शब्दः। पक्षे क्षणेपूत्सवेषु दानं प्रियं यस्य। छायया स्वकान्त्या सन्तापहरः। एतच्चावयस्याह्लादजनकत्वादिति भावः।

अथ क्षण उद्धर्षो मह उद्धव उत्सवः।

छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः।

इति द्वयोरमरः। कुसुमकेतुरिव काम इव जनितानिरुद्धस्तोयापतेः सम्पदेन। रतेः प्रियायाः सुखप्रदस्य। कन्दर्पः पुष्पकेतनः। अस्यैव प्रकरणे रतिः प्रिया सुतोऽनिरुद्ध ऋष्यङ्क उपेश इति त्रिषु हैमः। पक्षे जनितानिरुद्धानिवारिता सम्पत्तिर्येन। रतौ सुरतेऽनेककामतन्त्रकलाभिज्ञतया सुखप्रदः।

विरोधाभासेनाह। विद्याधरोऽपि देवयोनिविशेषोऽपि सुमना देव इति विरोधः।

विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः।

पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः॥

सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः।

इति द्वयोरमरः। विद्याधरोऽष्टादशविद्यानिधिः। सुमनास्त्रि-

---

१ क्षमागतो B क्षमान्वितो H

सुधर्माश्रितो बृहन्नलानुभावोऽप्यन्तःसरलो महिषीसम्भ-

विधमानसपापरहित इति परिहारः। तानि चोक्तानि मनुना।

परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम्।

वितथाभिनिवेशश्च त्रिविधं मानसं स्मृतम्॥

इति।

आभासत्वे विरोधस्य विरोधाभास इष्यते।

काव्यप्रकाशे त्वयमेव विरोध इति व्यवहृतः।

विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः।

इति। एवमग्रेऽपि। अपिरापततो विरोधस्य द्योतकः। पक्षा-न्तरेऽनेकार्थत्वात् समुच्चयस्य। धृतराष्ट्रोऽपि पाण्डोरग्रजोऽपि गुणप्रियः। भीमप्रिय इति विरोधः।

गुणोऽप्रधाने रूपादौ गुणः सूदे वृकोदरे।

इति विश्वः।

धृतराष्ट्रो धृतराज्यः। गुणप्रियः सन्धिविग्रहादिषड्गुणप्रिय इत्यविरोधः।

सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः।

षड्गुणा इत्यमरः।

क्षमानुगतोऽपि पृथिव्यनुगतोऽपि सुधर्माश्रितो देवसभा-श्रित इति विरोधः। क्षमा शान्तिः क्षमा धरेति विश्वः। स्यात् सुधर्मा देवसभेत्यमरः। क्षमानुगतः शान्तियुक्तः सुधर्माश्रितः शोभनधर्माश्रित इत्यविरोधः।

वोऽपि वृषोत्पाद्यतरलोऽपि महानायको राजा चिन्तामणिर्नाम।

· यत्र च शासति धरणिमण्डलं छलनिग्रहप्रयोगो वादेषु[1]

उद्दण्डमहान् यो नडस्तृणभेदस्तस्येवानुभावो यस्य। यथा यत्नानपेक्षः सोऽभिवर्धते तथायमपोत्यर्थः। तादृशोऽप्यन्तर्मध्ये सरलो यन्थिरहित इति विरोधः। उद्दण्डानुभावोऽर्जुनानुभावोऽन्तःसरल इति परिहारः।

उद्दण्डो गुडाकेशे नले कौशिकनन्दने।

इति विश्वः।

महिष्याः सम्भवो यस्य तादृशो महिषो वृषोत्पादी वृषभजनक इति महोत्पात इति विरोधः। महिष्याः कृताभिषेकायाः सम्भवो यस्य वृषोत्पादी धर्मजनक इति परिहारः।

कृताभिषेका महिषी भोगिन्योऽन्या नृपस्त्रियः।

पुण्यश्रेयसी सुकृतं वृष इत्युभयत्रामरः।

अतरलोऽपि हारमध्यमणिभिन्नोऽपि महानायको हारमध्यमणिरिति विरोधः। तरलो हारमध्यग इत्यमरः।

नायको नेतरि श्रेष्ठे हारमध्यमणावपि।

इति विश्वः। अतरलो धीरो महान् नायको नेता महानायक इति परिहारः।

परिसङ्ख्यामाह। काव्यादर्शे नियमक्षेपोऽयम्। यत्र चिन्ता-

---

१. नैयायिकवादेषु F

नास्तिकता चार्वाकेषु कण्टकयोगो नियोगेषु[1] परीवादो

मणौ। छलो वाक्छलो निग्रहः प्रतिज्ञाहान्यादिस्तेषां प्रयोगो वादेषु। पक्षे छलं कपटः। निग्रहो बन्धनम्।

तादृगन्यव्यपोहाय परिसङ्ख्या तु सा स्मृता।

नास्तिकता परलोकाभावज्ञानवत्त्वं चार्वाकेषु बौद्धविशेषेषु। भावे तल्। अस्तिनास्ति दिष्टं मतिरिति ठक्।

तावानेव हि लोकोऽयं यावानिन्द्रियगोचरः।

इति तत्सिद्धान्तः। मिथ्यादृष्टिर्नास्तिकतेत्यमरः। पक्षे नास्तिकता दरिद्रता। कण्टक अनेनेदं भुक्तमिति तत्स्वामिनि कथकस्तस्य योगो नियोगेषु। मोहासिवा इति भाषायाम्। पक्षे। कण्टकः। क्षुद्रशत्रुः।

कण्टकः क्षुद्रशत्रौ च कर्मस्थानिकदूषणे।

इति विश्वः।

परीवादो वीणावादनवस्तु। पक्षे परीवादोऽपवादः।

परीवादोऽपवादे स्याद्वीणावादनवस्तुनि।

इति मेदिनी।

खलं धान्यमर्दनभूमिः।

खलं भूस्थानकल्केषु क्रूरे नीचेऽधमे पुमान्।

इति विश्वप्रकाशः। पक्षे खलः पिशुनः। पिशुनो दुर्जनः खल इत्यमरः।

---

१ ग्रमेषु D इति मर० च। पा० कण्टको राजनिदेशेषु इति अङ०।

वीणासु खलसंयोगः शालिषु द्विजिह्वसङ्गृहीतिराहितुण्डिकेषु करच्छेदः कृषकरग्रहणेषु नेत्रोत्पाटनं मुनीनां द्विजराजविरु-

---

आहितुण्डिकेषु व्यालग्राहिषु द्विजिह्वसङ्गृहीतिः सर्पसङ्ग्रहः। व्यालग्राह्याहितुण्डिक इत्यमरः। पक्षे द्विजिह्वः खलः।

द्विजिह्वः पन्नगे पुंसि खले स्यादन्यलिङ्गकः।

इति रन्तिः। अहितुण्डेन दीव्यति। तेन दीव्यतीति ठक्।

कृषकरग्रहणेषु राजग्राह्यभागेषु करच्छेदस्तस्यैव न्यूनीकरणम्। पूर्वनिश्चितादपि प्रार्थनादिना न्यूनग्रहणमित्यर्थः। पक्षे करच्छेदो हस्तच्छेदः। बलिहस्तांशवः करा इत्यमरः।

विरोधाभासपरिसङ्ख्यासङ्करेणाह। मुनीनां यतीनां नेत्रमस्ति। पक्षे मुनीनां वृक्षविशेषाणां नेत्रोत्पाटनं मूलोत्पाटनम्।

तरुमूलाचित्वक्षेषु नेत्रमर्थिगुणे रथे।

मुनिर्यतीङ्गुदीचूतप्रियालागस्त्यकिंशुके॥

इति द्वयोर्विश्वः।

पङ्कजानां कमलानां द्विजराजश्चन्द्रस्तद्विरुद्धता। द्विजराजः शशधर इत्यमरः। पक्षे द्विजा ब्राह्मणाः पक्षिणो वा ते च राजानश्च। दन्तविप्राण्डजा द्विजा इत्यमरः।

सार्वभौमो रूढः सार्वभौमशब्दस्तद्योगो दिग्गजस्य। सर्वभूमिपृथिवीभ्यामिति व्युत्पन्नस्य नैतद्राजभिन्ने नास्ति प्रयोग इत्यर्थः। उक्तं च।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।

ह्वता पङ्कजानां सार्वभौमयोगो[1] दिग्गजस्याग्नितुलाशुद्धिः[2] सुवर्णानां सूचीभेदो मणीनां शूलभङ्गो युवतिप्रसवे[3] दुःशासन-

---

अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥

इति । बहुवचनान्तपाठे तु पक्षेऽर्थपरत्वं राजपक्षे पूर्ववच्छब्दपरत्वम् ।

सार्वभौमस्तु दिङ्नागे सर्वपृथ्वीपतावपि ।

इति विश्वमेदिन्यौ ।

पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ।

इत्यमरः ।

अग्निना तुलया च शुद्धिर्वर्णमानयोर्ज्ञानम् । सुवर्णानाम् । व्यक्त्यभिप्रायेण बहुवचनम् । तादृशशुद्धियोग्यानामन्येषामभावादिति भावः ।

सूची लौहं सीवनसाधनं तेन भेदो मणीनाम् । न तु सूचीकराद्यभिनयस्तस्य भेदः । सर्वेषां नर्तककीर्तकानां परिनिष्ठितत्वादिति भावः । यद्वा सूची नारीणां करणान्तरं गीताङ्गहारसंवेशक्रिया । तस्या भेद इति भावः । एतेनास्य राज्ये सपत्न्योर्ज्येष्ठाकनिष्ठाव्यवहाराभावो ध्वनितः ।

करणं साधनं क्षेत्रे कायकायस्थकर्मसु ।

गीताङ्गहारसंवेशक्रियाभेदेन्द्रियेषु च ॥

---

१ दिग्गजानाम् A B C D E F G H इति क्रम० च । २ -शुद्धि E F H इति क्रम० च । ३ -भेदो D इति सर० च ।

दर्शनं भारते करपत्रदारणं जलजानाम्। महावराहो गोत्रो-द्धरणप्रवृत्तोऽपि गोत्रोद्दलनमकरोत्। राघवः परिहरन्नपि जनकभुवं जनकभुवा सह वनं विवेश। भरतो रामे दर्शितभ-

---

इति विश्वप्रकाशः।

सूची करार्थाभिनये नारीणां करणान्तरे।

सूची सीवनद्रव्य इति च।

शूलेनोदरपीडया भङ्ग आमर्दः। भङ्गो आमर्दने। न तु शूलेन दुष्टप्राणिवधोपायेन भङ्गः। तादृशापराधिनोऽभावादिति भावः। यद्वा शूलः केतनं तस्य भङ्गः।

स्त्रियां प्रहरणे शूलः केतने योगरोगयोः।

इति विश्वप्रकाशः।

दुःशासनस्य धार्तराष्ट्रस्य दर्शनं ज्ञानम्। न तु दुष्टशासनस्य निरीक्षणम्।

करैः सूर्यकिरणैः पत्रदारणं दलानां विकासनं पङ्कजानाम्। न तु करपत्रेण क्रकचेन दारणम्। क्रकचोऽस्त्री करपत्रमित्यमरः। करवत इति भाषायाम्।

विरोधाभासेनाह। महावराहो गोत्रोद्धरणाय पृथिव्युद्धरणाय प्रवृत्तोऽपि गोत्रोद्दलनमकरोत्। यदुद्धरणाय प्रवृत्तस्तस्यैवोद्दलनमनुचितम्। गोत्रः पर्वत इत्यर्थान्तरेण परिहारः। एवमग्रेऽपि।

जनकभूः पितृभूमिः। पक्षे जनकभुवा सीतया।

त्तिरपि राज्ये विराममकरोत्। नलस्य दमयन्त्या मिलितस्यापि पुनर्भूपरिग्रहो जातः। पृथुरपि गोत्रसमुत्सारणविस्तारितभूमण्डलः। इत्थं नास्ति वागवसरः पूर्वतरराजेषु।

स पुनरन्य एव देवो न्यक्कृतसर्वोर्वीपतिचरितः। तथाहि स पर्वतः कटकसञ्चारिणो गन्धर्वान् दर्शितशृङ्गोन्नतिः सुख-

---

विरामो रामाभावो वैराग्यं च।

दमयन्त्या मिलितस्यापि नलस्य पुनर्भूपरिग्रहः पुनरूढापरिग्रहः।

पुनरक्षतयोनिस्तादृश्यते या यथाविधि।
सा पुनर्भूः।

पक्षे पुनर्द्वितीयवारं भूपरिग्रहः पृथ्वीपरिग्रहः।

गोत्राणां स्वगोत्रजानां स्ववंशजविरोधिता विरोधः। गोत्राणां पर्वतानामिति परिहारः।

इत्थं वर्णितविरोधाभासात् पूर्वेषु महावराहादिषु वागवसरः स्तुतियोग्यत्वं नास्ति। चिन्तामणिर्देवो राजा। यदत्र वक्तव्यं तद् दशकुमारभूषणे द्रष्टव्यम्। वर्णितेभ्योऽन्यगुणविशिष्ट एव। अत एव न्यक्कृतसर्वोर्वीयतिचरितः। भेदकातिशयोक्तिरलङ्कारः।

भेदकातिशयोक्तिस्तु तस्यैवान्यत्ववर्णनम्।

इति लक्षणात्।

पुनः श्लेषेणाह। पर्वत उत्सववान्। कटकं सैन्यम्। गन्धर्वा अश्वाः। शृङ्गं प्राधान्यम्। पक्षे कटको नितम्बः। गन्धर्वा हा-

यन् न विरराम। स हि मालयो नावग्नायोच्छलितो नो मायाजन्मने हितश्च। स हि मानी गिरि स्थितो वृषध्वजः। असौ सदागतिरवधूताखिलकान्तारः पावकाग्रेसरो न

दाहहमस्ततयः। शृङ्गं शिखरम्। तप् पर्वमरुद्भ्यामिति मत्वर्थीयस्तप्। वाजिवाहार्वगन्धर्वं इति। कटकोऽस्त्री नितम्बोऽद्रेरिति। शृङ्गं प्राधान्यसान्वोश्चेति विश्वमरः।

सव्यतिरेकं तमाह। स हि मालयो लक्ष्मीगृहम्। अवग्नायो गर्व.। माया कपटम्। जन्मने हितः। हितयोगे चेति चतुर्थी। पक्षे स हिमालयः। अवग्नायो हिमः। उमायाः पार्वत्याः। अवग्नायो हिमे गर्वे इति धरणिः।

शृङ्खलेषमाह। स हिमानी हिमसंहतिरूपो गिरिः पर्वतस्तत्र स्थितो वृषध्वजः। पक्षे। स हि मानी चित्तोन्नत्यवान्। गिरि वचने। वृषध्वजो धर्मध्वजः। पुण्यश्रेयसी सुकृतं वृष इत्यमरः।

सतां साधूनामाकल्पेन गतिर्निर्वाहो यस्मात्।

येषां क्वापि गतिर्नास्ति तेषां वाराणसी गतिः।

इतिवत्। अवधूताः कम्पिता दूरीकृता वा कान्तारा दुर्गमार्गा दुर्भिक्षा वा येन। पावकानां पवित्रकर्तॄणामग्रेसरः। तथा च मनुः।

अग्निचित् कपिला सत्री राजा भिक्षुर्महोदधिः।

दृष्टमात्राः पुनन्त्येते तस्मात् पश्येत नित्यशः॥

भोगोत्सुकः सुमनोहरश्च। स रत्नाकरोऽनहिमयः[1] कथमगाधः समर्यादो नोद्रेकोऽप्यस्य विस्मयः सदा हिमकरा-

इति। पावकोऽग्नौ सदाचारे इति विश्वप्रकाशः। नभोगेषु देवेषूत्सुकः। यद्वा। न भोगेषु स्त्र्यादिसुखेषूत्सुकः। उक्तं च।

मृगयाक्षास्तथा पानं गर्हितानि महीभिताम्।
दृष्टास्तेभ्यस्तु विपदः पाण्डुनैषधवृष्णिषु॥

इति।

सुमनसः पण्डितान् हरति गुणग्रहणवित्राणनाभ्यां स्ववशीकरोति। पक्षे सदागतिर्वातः। अवधूताखिलकान्तारः कम्पिताखिलकाननः। पावकाग्रेसरो वह्निसहायः। नभोगेषु मेघेषूत्सुक उत्कण्ठितः। तथा च कालिदासः। मदत्सखस्येव बलाहकस्येति। सुमनसः पुष्पाणि हरति तादृशः। तथा च कालिदासः। वृन्तस्थं हरति पुष्पमनोकहानामिति।

सुमनाः पुष्पमालत्योस्त्रिदशे कोविदेऽपि च।

इति विश्वप्रकाशः। स्त्रियः सुमनसः पुष्पमित्यमरः।

कान्तारः कानने चेक्षौ दुर्भिक्षे दुर्गवर्त्मनि।

इति विश्वः।

रत्नानामुत्तमवस्तूनामाकरः। रत्नं स्वजातिश्रेष्ठेऽपीत्यमरः। अहिरिवाहिः खलस्तन्मयो न भवतीत्यनहिमयः। कथम्। अगाधः गभीराशयः। यद्वा। लिप्सारहितः। गाधा लिप्सेत्यमरः। समर्याद उचितानतिक्रमणशीलः। उद्रेक उच्चितरोको

[1] नाहिमद A B C D E G

अथोऽमृतमयः सपोतस्तस्याचलो न क्रोधो महानदीनः समुद्रः।

दीप्तिर्यस्य सः। रुच दीप्तौ। घञ्। इत्यपस्य न विस्मयः। अलुब्धत्वादस्य दीप्तेर्न नाश इति भावः। तथा चोक्तम्।

देहीति वचनद्वारा देहस्थाः पञ्च देवताः।
तत्क्षणादेव नश्यन्ति धीश्रीह्रीकान्तिकीर्त्तयः॥

इति। किञ्च।

स पार्थः पार्थिवान् सर्वान् भूमिष्ठोऽपि रथस्थितान्।
एको निवारयामास लोभः सर्वगुणानिव॥

इति। यद्वा। असौ दृ इति न कोऽपि विस्मयः। जलाखेटशीलस्यास्योद्रसङ्ग्राहकत्वादिति भावः।

यद्वा हिमकरवच्चन्द्रतुल्य आश्रयो गृहं यस्य। अमृतमयः। आह्लादकरूपवत्त्वात्। सपोतः सबालकः।

पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः।

इत्यमरः। तस्य क्रोधोऽचलो न प्रणिपाताद्यनपनेयो न भवतीति भावः। महान् श्रेष्ठः। अदीनः। समुद्रः। मुद्रा राजचिह्नं तत्सहितः। पक्षेऽगाधसात्त्वगौरहितः। मर्यादा सीमा। असौ उद्र इति न कोऽपि विस्मयः। उद्रो जलमार्जारः। यद्वा हि नियमेन मकराणां जलजन्तूनामाश्रयः। यद्वा हिमकरश्चन्द्रः। अमृतं सुधा जलं वा। पयः कीलालममृतम्। पीयूषममृतं सुधा। इत्युभयत्रामरः। पोतो यानपात्रम्।

स चन्द्र इव क्षणदानन्दकरः, कुमुदवनबन्धुः सकलकलाकुलगृहं नतारानिवलः। मित्रोदयहेतुः काञ्चनशोभां बिभ्रद्-

---

यानपात्रं तु पोतोऽब्धिभवे त्रिषु समुद्रियम्।

इत्यमरः। तथाधोऽचलो मैनाकः। नक्रः कुम्भीरः। नक्रस्तु कुम्भीर इत्यमरः।

स चन्द्रः। चदि आह्लादे। स्फायितञ्चिवञ्चीति रक्। क्षणदानां सुखप्रदानामानन्दकर्ता। खण्डिते रतान् सन्तोषयतीत्यर्थः। यद्वा। क्षणद उत्सवप्रदश्चासावानन्दकरश्च। मुदावन मुदवनं कोः पृथिव्या मुदवनं तेन बन्धुरिव बन्धुः। तथाच कालिदासः।

तेनार्थवाँल्लोभपराङ्मुखेन
तेन घ्नता विघ्नभयं क्रियावान्।
तेनास लोकः पितृमान् विनेत्रा
तेनैव शोकापनुदेन पुत्री॥

ग्राम आगत इतिवत् कोसात्स्येपूपचारः।

कलास्तुपष्टिकलाः। नतमरातिबलं यस्मात्। पक्षे क्षणदा रात्रिः। कुमुदं कैरवम्। कलाः षोडश कलाः। न तारा नक्षत्राण्यतिबला यस्मात्। मित्रं सुहृत्। किञ्च। चकारो वार्थे। कां वा शोभां न बिभ्रत्। अचला स्थिराधिका लक्ष्मीर्यस्य। पक्षे मित्रः सूर्यः।

काञ्चनं सुवर्णम्। अचलेभ्यः पर्वतेभ्योऽधिका लक्ष्मीर्यस्य।

चलाधिकलक्ष्मीः सुमेरुरिव। यस्य च रिपुवर्गः सदापार्थोऽपि न महाभारतरणयोग्यः।

भीष्मोऽप्यशान्तनवेहितः सानुचरोऽपि न गोत्रभूषितः।

अथ मित्रं सखा सुहृत्। द्युमणिस्तरणिर्मित्र इत्युभयत्रामरः।

पुनर्विरोधाभासेनाह। पार्थोऽर्जुनस्तस्य महाभारतरणयोग्यतानिषेधो विरोधः। एवमग्रेऽपि। पक्षे यस्य रिपुवर्गो महतो भारस्य तरणे योग्योऽपि न। अतएव सदा सर्वकालेऽपार्थः। अपगतोऽर्थः प्रयोजनं यस्य।

भीष्मोऽपि शन्तनुपुत्रोऽपि। अशान्तनवे पितृभिन्नाय हितः। पित्रे न हित इति विरोधः। भीष्मो राजगुणैर्भयानकः। तथा च कालिदासः।

भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः॥ इति।

दारुणं भीषणं भीष्मं घोरं भीमं भयानकम्।

इत्यमरः। अशान्तमनस्तमितं नवं स्तुत्यमीहितं चेष्टितं यस्य। णु स्तवने। ऋदोरप्। यद्वा। नवं नवीनमन्येभ्यो विलक्षणम्। शन्तनुवाचकः शब्दो दीर्घादिः शान्तनुरित्यप्यस्ति। तथा च त्रिविक्रमभट्टः। शान्तनुतनय इति। तत्र शान्तनोस्तनयः शान्तनुतनय इत्येकोऽर्थः। पक्षे शान्तो नुतो नयो यस्येति।

सानुषु शिखरेषु चरति तादृशोऽपि न गोत्रभूमौ पर्वतभूमावुषितः स्थित इति विरोधः। अनुचरैः सेवकैः सहितः।

अपि च स त्रिशङ्कुरिव न क्षत्रपथस्खलितः शङ्करोऽपि न विषादी पावकोऽपि न कृष्णवर्त्माश्रयाशोऽपि न दहनो नान्तक

न गोत्रैर्गोत्रजैर्भूषित इति परिहारः। स्वयमेव तेषां भूषक इत्यर्थः। नञर्थकनशब्देन सुप् सुपेति समासः।

त्रिशङ्कुरिव नक्षत्रपथस्खलितः। नक्षत्रपथ आकाशे। पक्षे क्षत्रपथात् क्षत्रधर्मात्।

शङ्करः शिवो विषादी विषभक्षको नेति विरोधः। शङ्करः सुखकरः। न विषादी न दुःखीति परिहारः।

पावकोऽग्निरपि न कृष्णवर्त्मा नाग्निरिति विरोधः। पावकोऽन्येषां पवित्रकर्ता न कृष्णवर्त्मा न दुराचार इति परिहारः। बर्हिः शुष्मा कृष्णवर्त्मा। कृशानुः पावकोऽनल इत्युभयत्रामरः।

कृष्णवर्त्मा हुताशे स्याद्दुराचारे विधुन्तुदे।

इति विश्वप्रकाशः।

आश्रयाशोऽपि वह्निरपि न दहनो न वह्निरिति विरोधः। आश्रयाणामाशा तृष्णा यस्मिन्नाश्रयाशः। न दहनो नेष्टानां सन्तापक इति परिहारः। आश्रयाशो दहन्नानुः। दहनो हव्यवाहन इत्युभयत्रामरः।

नान्तक इव यम इवाकस्मात् सहसापहृतं जीवनं जीवितं येन। पक्षे जीवनं जीविका। करणे ल्युट्।

न राहुरिव मित्रमण्डलग्रहणेन सूर्यमण्डलग्रहणेन वि-

इवाकस्मादपहृतजीवनो[1] न राज्ञरिव मित्रमण्डलग्रहणवि-
वर्धितरुचिर्न नल इव कलिविघटितो न चक्रीव शृगाल-
वधस्तुतिसमुल्लसितो/नन्दगोप इव यशोदयाश्रितो[2] जरा-
सन्ध इव घटितसन्धिविग्रहो भार्गव इव सदानभोगो दशरथ

र्द्धिता रुचिर्दीप्तिर्यस्य सः। पक्षे सुहृद्राज्यग्रहणे विवर्द्धिता रुचिरिच्छा येन।

न नल इव कलिना युगविशेषेण विघटितो व्याप्तः। पक्षे कलिः कलहः।

न चक्रीव कृष्ण इव शृगालस्य राजविशेषस्य वधेन मारणेन स्तुत्या समुल्लसितः। पक्षे शृगालः कातरः।

शृगालो जम्बुके भीरुशूरे वै पार्थिवान्तरे।

इति विश्वः। कोशे दानवान्तर इति पाठस्त्वशुद्ध एतन्मूलक एव जगद्धरभ्रमः।

नन्दगोप इव यशोदया तन्नामनिजस्त्रियान्वितः। पक्षे यशसा दयया च।

जरासन्ध इव घटितसन्धिविग्रहः शरीरं यस्य। घटितौ सन्धिविग्रहौ येन।

भार्गव इव शुक्र इव सदा सर्वदा नभोग आकाशगामी पक्षे दानभोगाभ्यां सहितः।

---

१ -पहतजीवन A -पहृतजीवनो D २ -श्रितो C E F H इति क्रम० च। -मन्वितो D

इव सुमित्रोपेतः सुमन्त्राधिष्ठितश्च दिलीप इव सुदक्षिणानुरक्तो[1] रक्षितगुश्च राम इव जनितकुशलवयोरूपोच्छ्रायः। तस्य च पारिजात इवाश्रितनन्दनो हिमालय इव जनि-

---

दशरथ इव सुमित्रया लक्ष्मणजनन्योपेतो युक्तः। सुमन्त्रसञ्ज्ञकसारथिनाधिष्ठित आश्रितश्च। पक्षे सुमित्रेणोत्तमसुहृदा सुमन्त्रेण शोभनगुप्तवादेन।

दिलीप इव सुदक्षिणायां तन्नाम्न्यां स्त्रियामनुरक्त आसक्तः। रक्षिता पालिता गौर्वाणिष्ठी येन तादृशश्च। पक्षे सुदक्षिणायां पात्रे दानव्यये रक्षिता गौः पृथ्वी वाणी वा येन।

स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले।
लक्ष्यदृष्ट्योः स्त्रियां पुंसि गौः।

इत्यमरः। राम इव जनितः कुशलवयसा रूपस्य सौन्दर्यस्योच्छ्राय औन्नत्यं यस्मिन्। पक्षे रामे यथा रूपोच्छ्रायस्तथा जनितकुशलवयोः। विभक्त्यन्तमेतोऽयम्। नीलोत्पलस्पर्धिनी नेत्रे तनुर्वा हरेरितिवत्। तथा च कालिदासः।

रूपं तदोजस्वि तदेव वीर्यं
तदेव नैसर्गिकमुन्नतत्वम्।
न कारणात् स्वाद्बिभिदे कुमारः
प्रवर्तितो दीप इव प्रदीपात्॥ इति।

तस्य पुत्रः कन्दर्पकेतुर्नामेति सम्बन्धः।

---

१ -नुरक्त ८

तशिवो मन्दर इव भोगिभोगाङ्कितः कैलास इव महेश्वरो-
पभुक्तकोटिर्मधुरिव नानारामानन्दकरः चीरोदमथनोद्य-

पारिजातो देववृक्षः।

पञ्चैते देवतरवो मन्दारः पारिजातकः। ..

इत्यमरः। आश्रितं नन्दनमिन्द्रवनं येन। नन्दनं वनमितीन्द्रप्रकरणेऽमरः। पक्ष आश्रितान् नन्दयति तादृशः।

हिमालयो हिमवान्। जनितोत्पादिता शिवा गौरी येन। शिवा भवानी रुद्राणीत्यमरः। पक्षे शिवं सुखम्। श्वः श्रेयसं शिवं भद्रमित्यमरः।

मन्दर इन्द्रकीलः। भोगी सर्पः। भोगः शरीरम्। पक्षे भोगी सुखी। भोगः स्यादिमकुम्भः। उरगः पन्नगो भोगी।

भोगः सुखे स्यादिभृतावहेश्च फणकाययोः।

इति चतुर्थ्यमरः।

कैलासः पर्वतः। महेश्वरः शिवः। कोटिरग्रम्। कोटिरग्रे प्रकर्षे चेति धरणिः।

रजताद्रिस्तु कैलासोऽष्टापदः स्फटिकाचलः।

इति हैमः। शिवः शूली महेश्वर इत्यमरः। पक्षे महेश्वरैर्महाराजैरुपभुक्ताः कोटयस्तत्सङ्ख्याकानि धनानि यस्य।

कोटिः स्त्री धनुषोऽग्रे स्यात् सङ्ख्याभेदप्रकर्षयोः।

इति विश्वः।

मधुर्वसन्तः। नानारामा अनेकोपवनानि तेषामानन्दकर्ता।

तमन्दर इव मुखरितभुवनो रागरज्जुरिवोल्लासितरतिरीशान-
भूतिसञ्चय इव सन्ध्योच्छलितः शरन्मेघ इवावदातहृदयो

आरामः स्यादुपवनं कृत्रिमं वनमेव यत्।

इत्यमरः। अथ पुष्परसे मधुः। दैत्ये चैत्रे वसन्ते च मधुरिति विश्वः। पक्षे रामाः स्त्रियः। सुन्दरी रमणी रामेत्यमरः।

क्षीरोदः क्षीरसमुद्रः। उदकस्योदः सञ्ज्ञायामित्युदकस्योदादेशः।

रत्नाकरो जलनिधिर्यादसां पतिरप्पतिः।

तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे॥

इत्यमरः। मन्दरो मन्थाचलः। मुखरितं शब्दायमानं भुवनं जलं येन।

पयः कीलालममृतं जीवनं भुवनं वनम्।

इत्यमरः। इन्द्रकीलस्तु मन्दर इति हेमचन्द्रः। पक्षे भुवनं जगत्। विष्टपं भुवनं जगदित्यमरः। अस्मिन् पक्षे जयशब्दघोषणयेति शेषः।

रागरज्जुः कामः।

कन्दर्पो दर्पकः कामः शिखिस्त्रायुर्जयावहः।

सर्वधर्ममनोहारी रागरज्जुः प्रकीर्तितः॥

इत्युत्पलिनी। रतिः कामस्त्री। पक्षे रतिरनुरागः।

ईशानः शिवः। शर्व ईशानः शङ्कर इत्यमरः। भूतिर्भस्म। भूतिर्भसिनि सम्पदीत्यमरः। सन्ध्यासूच्छलितः। पक्षे सन्ध्याया-

विष्णुपदावलम्बी च पार्थ इव समरसाहसोचितः कंस इव

यतीति सन्ध्याः। आतश्चोपसर्गे इति कः। सन्ध्यः सन्धिविचारकर्ता। अत एवाच्छलितः केनापि छलितुमशक्यः। तदस्य सञ्जातमिति छलशब्दादितच्।

शरत्कालिकमेघ इवावदातहृदयः। जलसम्बन्धप्रतिभासमाननैल्यरहितान्तःप्रदेशः। विष्णुपदावलम्बी। आकाशावलम्बी।

वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी।

इत्यमरः। पक्षेऽवदातहृदयः शुद्धान्तःकरणः। हृदयं स्वान्तं हृन्मानसं मन इत्यमरः। दैप् शोधने। क्तः। आदेच इत्यात्वम्। विष्णुपदं हरिचरणम्।

पार्थोऽर्जुनः समरे सङ्ग्रामे साहसं तत्रोचितो योग्यः। पक्षद्वये समोऽर्थः। यद्वा। रसोऽनुरागः। आहसः स्मितम्। आङीषदर्थे। समाभ्यां सर्वजनतुल्याभ्यां रसाहसाभ्यामुचितो योग्यः। धर्मराज इव समवर्तीत्यर्थः। अथो हसः। हासो हास्यं चेत्यमरः।

कंसनामा दैत्यः। कुवलयापीडसदृशो। पक्षे कोर्वलय इवापीड इव कुवलयापीडः पृथ्वीमण्डनायमान इति यावत्। तादृशेन भूषित.।

यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो
भासो हासः कविकुलगुरुः कालिदासो विलासः।
हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः
केषां नैषा कथय कविताकामिनी कौतुकाय॥

कुवलयापीडभूषितस्तार्च्य इव विनतानन्दकरः सुमुखनन्दनश्च विष्णुरिव क्रोडीकृतसुतनुः शान्तनव इव स्ववशस्थापितकाल-

---

इतिवत्। कटको वलयोऽस्त्रियाम्। शिखास्वापीडशेखरावित्युभयत्रामरः।

तार्च्यो गरुडो विनता तन्माता तदानन्दकरः। गरुत्मान् गरुडस्तार्च्यो वैनतेय इत्यमरः। पक्षे विनतानां नम्राणामानन्दकरः।

सुमुखाः पण्डितास्तेषां हर्षकर्ता। पक्षे सुमुखो गरुडपुत्रः स नन्दनः पुत्रो यस्य सः।

विष्णुरिव क्रोडीकृता शूकरीकृता शोभना तनुः शरीरं येन। स्यन्तः क्रोडशब्दः। क्रोडः शूकरमातङ्गोरिति विश्वप्रकाशः। स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः। पक्ष क्रोडीकृतोत्सङ्गीकृता सुतनुर्येन। आग्नीध्रवत् तानस्थात् ताच्छब्द्यम्। उत्सङ्ग-शूकरौ क्रोडाविति पादस्थोकाधिकारेऽनेकार्थध्वनिमञ्जरी। यद्वा क्रोडीकृतालिङ्गिता सुतनुर्येन।

आलिङ्गनं परिष्वङ्गः संश्लेष उपगूहनम्।
अङ्कपालिः परीरम्भः क्रोडीकृतिः।

इति हैमः।

शान्तनवो भीष्मस्तद्वत् स्ववशे स्थापितः कालधर्मो मृत्युर्येन।

स्यात् पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः।

इत्यमरः। पक्षे कालस्य धर्मः। तथाच व्यासः।

धर्मः कौरवव्यूह इव सुशर्माधिष्ठितः सुबाहुरपि रामानन्दी समदृष्टिरपि महेश्वरो मुक्तामयोऽप्यतरलमध्यो जलद इव

कालो वा कारणं राज्ञो राजा वा कालकारणम्।
इति ते संशयो माभूद्राजा कालस्य कारणम्॥

राजा धर्मस्य कारणमिति स्मृतिः।

कौरवव्यूहे सुशर्मा नाम योद्धा। पक्षे सुशर्मणातिसुखेनाधिष्ठितः। शर्मशातसुखानि चेत्यमरः।

पुनर्विरोधाभासेनाह। सुबाहुस्तन्नामको राक्षसः। रामो दाशरथिः। सुबाहुराक्षसस्य रामानन्दकर्तृत्वं विरोधः। अपकारितत्वात्तयोर्विरोधः। पक्षान्तरेण परिहारः। सुबाहुः शोभनभुजः। रामाः स्त्रिय आनन्दयति तच्छील इति परिहारः। भुजबाहू प्रवेष्टो दोः। सुन्दरी रमणी रामेत्युभयत्रामरः।

समदृष्टिः। अविषमदृष्टिः। महेश्वरः शिवः। शिवः शूली महेश्वर इत्यमरः। शिवः समदृष्टिरिति विरोधः। पक्षे समदृष्टिः सर्वजनेषु समानदर्शनः। महेश्वरो महाराजः। स्वामी नीश्वरः पतिरीशितेत्यमरः।

मुक्तामयो मौक्तिकप्रचुरः। तत्प्रकृतवचने मयट्। अतरलमध्यः। तरलो हारमध्यमणिस्तद्रहितो मध्यो यस्य। हारस्यातरलमध्यता विरोधः। तरलो हारमध्यग इत्यमरः। अत्र मध्यशब्दप्रयोगस्तु येभ्यो निवापाञ्जलयः पितॄणामित्यादिवद्दोषः। वस्तुतस्तु मध्यशब्दरहितः पाठः। मुक्तामयो नीरोगः।

विमलतरवारिधाराश्वासितराजहंसो¹ वंशप्रदीपोऽप्यसनदंश-स्तनयः कन्दर्पकेतुर्नाम।

येन च चन्द्रेणेव सकलकलाकुलगृहेण ²शर्वरीतिचारिणा

अतरलो धीर इति परिहारः। पराङ्गनासु पराङ्मुख इत्यर्थः।
रोगव्याधिगदामयाः। चञ्चलं तरलं चैवेत्युभयत्रामरः।

जलदो मेघः। विमलतरयातिस्वच्छया वारिधारया वासिता राजहंसा येन।

राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः।

इत्यमरः। उपलक्षणे तृतीया। पक्षे विमलस्तरवारिः खड्गस्तदीयधारया वासिता राजान एव हंसा येन।

करवालनिस्त्रिंशकृपाणखड्ग-
त्सरवारिकौक्षेयकमण्डलाग्राः।

इति हैमः।

खड्गादीनां च निशितमुखे धारा प्रकीर्तिता।

इति विश्वः।

वंशप्रदीपः। वंशे वेणौ प्रदीप आकाशदीपः। अयतादशा दशावर्तिर्यस्य दीपस्यादग्धवर्तिता विरोधः। पक्षे वंशप्रदीपः कुलदीपः। अयतानष्टा दशावस्था यस्य। दशा वर्तिदशावय इति हारावली। द्वौ वंशौ कुलमस्करौ। दशावस्थानेकविधा इत्युभयत्रामरः।

---

१ इति वेग० च। इमप्रमृते C L F G II इति अर० च। २ शर्वरी विहार-C शर्वरीतिमिरहर II

दलितकैरवेण कुमुदवनबन्धुना प्रसाधिताशेन विलोकिता ज-
लधय [1]इवोल्लसितगोत्राः [2]सुदूरविवर्द्धितजीवनाः प्रसन्नसत्त्वाः

श्लेषेणाह। येन कन्दर्पकेतुना चन्द्रेणेव सकलकलाकुलगृहेण पुनरुक्तोऽसौ श्लेषः।

शर्वरीतिहारिणा शर्वर्या रात्रेरीतिरिवेतिर्दुःखदत्वात् तमस्तद्धारिणा तन्नाशकेन।

दलितकैरवेण विकासितकुमुदेन। प्रसाधिता अलङ्कृता आशा दिशो येन तादृशेन विलोकिता दृष्टा जलधय इव समुद्रा इवोल्लसितगोत्रा उल्लसितपर्वताः सुदूरविवर्धितजीवना दूरप्रवृद्धजलाः प्रसन्नसत्त्वाः प्रसन्नजन्तवः सन्तः परामुत्कृष्टां वृद्धिमवापुः।

सत्त्वोऽस्त्री जन्तुषु क्लीवे व्यवसाये पराक्रमे।

इति वैजयन्ती। अथ शर्वरी निशा निशीथिनी रात्रिः। प्रसाधितोऽलङ्कृतश्च। आशाश्च हरितश्च ताः। सिते कुमुदकैरवे। अद्रिगोत्रगिरिग्रावा। जीवनं भुवनं वनम्। कबन्धमुदकं पाथ इति षट्स्वमरः। अर्थान्तरे शर्वस्य शिवस्य रीतिः सम्प्रदायस्तेन हारी मनोहरः। दलितानि नाशितानि कैरवाणि शत्रवो येन। प्रकर्षेण साधिता आशा अर्थिनामभिलाषा येन। साध संसिद्धौ। उल्लसितगोत्राः प्रसिद्धवंशाः। सुदूरमायतं विशेषेण

[1] इवोल्लसित A C D E F H इति नास्ति। [2] सुदूरवर्द्धि- B C D G H

सन्तः परां वृद्धिमवापुः। यस्य च जनितानिरुद्धलीलस्य रतिप्रियस्य कुसुमशरासनस्य मकरकेतोरिव दर्शनेन वनिताजनस्य हृदयमुल्ललास। यस्मै चानुगतदक्षिणसदागतये[1] श्रुतिसुखदकोमलकोकिलरुताय विकासितपल्लवाय क्षतका-

---

वर्धितं जीवन्त्यनेनेति जीवनं जीविका येषाम्। प्रसन्नसत्त्वाः प्रसन्नस्वभावाः। सन्तः कोविदाः।

कैरवी चन्द्रिका प्रोक्ता कैरवं कुमुदे द्विपि।

सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः॥

इत्युभयत्रापि विश्वः। सन् सुधीः कोविदो बुध इत्यमरः।

यस्य कन्दर्पकेतोर्जनितोत्पादितानिरुद्धस्योपापतेर्लीला विलासो येन तस्य दर्शनेन वनिताजनस्य हृदयमुल्ललासोल्लासं प्राप्तम्। अनिरुद्ध उपापतिः। लीला विलासक्रिययोरित्युभयत्रामरः। पक्षे जनितानिरुद्धलीलस्योत्पादितानिवारितविलासस्य। रतिप्रियस्य। अनुरागवल्लभस्य। कुसुमशरं काममस्यति क्षिपत्यतिसुन्दरत्वात् तादृशस्य। असु क्षेपणे।

स्त्रीणां विलासबिब्बोकविभ्रमा ललितं तथा।

हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः॥

इत्यमरः।

श्लेषोपमामङ्करेणाह। यस्मा यस्मै तरुण्यः स्पृहयालवः कुर्विति सम्बन्धः। स्पृहेरीप्सित इति सम्प्रदानसञ्ज्ञा। अनुगतो द-

---

1 × मेव. A B C D E F H इति अय॰ च अर॰ च।

न्तारतरङ्गाय सुरभिसुमनोऽभिरामाय सर्वजनसुलभपद्माय
¹विस्तारितकनकसम्पदेऽतिक्रान्तदमनकाय वसन्तायेव वन-

चित्रसदागतिर्देचित्रमारुतो यं तस्मै। श्रुतिसुखदं कोमलं कोकिलरुतं पिकशब्दो यत्र तस्मै। कृतः कान्तारस्य काननस्य तरङ्गः कम्पनं येन। विकाशिताः पल्लवाः किसलयानि येन। सर्वजनानां सुलभं पद्मं यत्र। विस्तारिता कनकस्य धत्तूरस्य चम्पकस्य वा सम्पद्येन। अत एव सुरभयः सुगन्धयः सुमनसः पुष्पाणि ताभिरभिरामः सुन्दरः। अतिक्रान्तो दमनकः पुष्पविशेषो येन। शिशिरजलात् तस्यातिक्रम इति भावः। वनलता दूर्वोत्कलिकासहस्रेणाङ्कुतकोरकसहस्रेण समाकुला व्याप्ताः। भ्रमरैर्मधुपैः सङ्गताः। प्रवालेन नवपल्लवेन हारिण्यो मनोहराः। विलसद्दयमो विलसत्पवित्रः। वायुर्मातरिश्वा सदागतिः। श्रुतिः स्त्री श्रवणं श्रवः। कोकिलः पिक इत्यपि। तिरश्चां वाशितं रुतम्। पल्लवोऽस्त्री किसलयम्। वा पुंसि पद्मं नलिनम्। धत्तूरः कनकाह्वयः। सुरभिर्घ्राणतर्पणः। इष्टगन्धः सुगन्धिः स्यात्। स्त्रियः सुमनसः पुष्पम्। कलिका कोरकः पुमान्। षट्पदभ्रमरालयः। प्रवालमङ्कुरेऽप्यस्त्री। खगवाल्यादिनोर्वयः। इति चतुर्दशस्वमरः। कान्तारः कानने चैत्रे।

कनकं चम्पके हेम्नि धत्तूरेऽपि निगद्यते।

इत्युभयत्र विश्वः। दमनो वीरपुष्पयोरिति धरणिः। पद्येऽनु-

---

१ ·विस्तृत- D

लता इवोत्कलिकासहस्रसङ्कुला भ्रमरसङ्गताः [1]प्रवालहारिण्यो विलसद्वयसस्तरुण्यः सूचयाञ्चक्रुः। यस्य च समरभुवि

गतानां दक्षिणानामुदाराणां सदा सर्वदा गतिरागमनं तस्मै। तादर्थ्ये चतुर्थी। यद्वानुगताः सेवका दक्षिणा व्यवहारकुशलाः सन्तश्च तेषामागतिरा साकल्येन गतिर्निर्वाहो यस्मात्। विविधस्यापि जनस्य पालनकर्तेत्यर्थः। श्रुतिसुखदं कोमलं कोकिलवद्रुतं शब्दो यस्य तस्मै। रु शब्दे, क्तः। ततः कान्तानां स्त्रीणां रतरङ्गः सुरतरङ्गो येन। अतएव विकाशितः पल्लवः शृङ्गारो येन। अतएव सुरभिसुमनोभिः सुगन्धिपुष्पैरभिरामः। यद्वा सुरभयः ख्याताः सुमनसः पण्डितास्तैः। सर्वजनानां सुलभा पद्मा लक्ष्मीर्यस्य। विस्तारिता कनकस्य सुवर्णस्य सम्पद्येन। अतिक्रान्ता दमनका वीरा येन। यद्वा दमयतीति दमनः शत्रुः। उत्कलिका उत्कण्ठास्तासां सहस्रेण सङ्कुलाः। भ्रमरैः कामुकैर्ललाटालकैर्वा सङ्गताः। प्रवालो विद्रुमः। हारो मुक्तावली। तौ स्तो यासां ताः। यद्वा प्रकृष्टा वालाः केशास्तैर्हारिण्यो मनोहराः। विलसद्वयो यौवनं यासां ताः। दक्षिणे सरलोदारौ। मैथुनं निधुवनं रतम्। लक्ष्मीः पद्मालया पद्मा। स्वर्णं सुवर्णं कनकम्। उत्कण्ठोत्कलिके समे। अथ विद्रुमः पुंसि प्रवालः पुनपुंसकम्। चिकुरः कुन्तलो वालः। हारो मुक्तावली। इत्यमरः।

१ प्रवालमनोज्ञा A B G इति नर० च।

भुजदण्डेन कोदण्डं कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं तेन चाननुभूतपूर्वो नायको नायकेन कीर्त्तिः कीर्त्या च सप्त सागराः सागरैः कृतयुगादिराजचरितस्मरणमनेन च स्थैर्यममुना च प्रतिक्षणमाश्चर्यमासादितम्। यस्य च प्रतापानलदग्धानां रिपुसुन्दरीणां करतलताडनभीतै-

---

पल्लवः स्यात् किसलये विटपशृङ्गारयोरपि।
सुरभिः सौरभे ख्याते वसन्ते पण्डितेऽपि च।
भ्रमरः कामुके भृङ्गलम्पटालकयोरपि।

इति त्रिषु विश्वः।

वयो बाल्यादि पक्षी च यौवनं च क्वचिद्वयः।

इति शाश्वतः।

मालादीपकेनाह। यस्य कन्दर्पकेतोः समरभुवि रणाङ्गणे भुजदण्डेन कोदण्डं धनुः समासादितम्। अत्र यथायथं लिङ्गव्यत्यययो वचनव्यत्ययश्च। शरासनकोदण्डकार्मुकमित्यमरः।

पूर्वं नानुभूतोऽननुभूतपूर्वस्तादृशो नायकः कन्दर्पकेतुः। कृतयुगादिराजानां प्रियव्रतसगरादीनां चरितं स्वेनैव तेजसा लोकप्रकाशनादि तत्स्मरणं स्मरणेन स्थैर्यं स्थैर्येणाश्चर्यम्। स्मरणस्याऽविनाशित्वात्।

मालादीपकमाद्यं चेद्यथोत्तरगुणावहम्।

यस्य कन्दर्पकेतोः प्रतापानलदग्धानां रिपुसुन्दरीणां कर-

रिव मुक्ताहारैः पयोधरपरिसरो मुक्तः। यस्य च [1]निशि-तनाराचजर्जरितमत्तमातङ्गकुम्भस्थलविगलितमुक्ताफलनिक-रदन्तुरितपरिसरे[2] [3]पतत्पत्रथे [4]रक्तवारिसञ्चरदनेकच्छा-योत्पलपुण्डरीकवाहिनीशतसमाकुले नृत्यत्कबन्धे सुरसुन्द-

---

तलेन ताडनं पत्युर्मरणोत्तरमुरस्ताडनं तेन भीतैरिव मुक्ता-हारैः पयोधरपरिसरो मुक्तः। उत्प्रेक्षालङ्कारः। सम्भावना स्यादुत्प्रेक्षेति लक्षणात्। पर्यन्तभूः परिसर इत्यमरः।

यस्य कन्दर्पकेतोः समर एव सागरस्तस्मिन् खड्गो रराजे-त्यन्वयः। निशितनाराचैस्तीक्ष्णबाणैर्जर्जरितानि शिथिलावय-वानि यानि मत्तमातङ्गकुम्भस्थलानि तेभ्यो विगलितैः स्रस्तै-र्मुक्ताफलनिकरैर्दन्तुरितो दन्तुरवदाचरितः परिसरो यस्य तस्मिन्। दन्त उन्नत उरच्। उन्नता दन्ता अस्य दन्तुरः। अस्मादाचारे क्विप्। क्तः। इट्। यद्वा। दन्तुरं विषमान्तरं तद्वदाचरितम्।

दन्तुरं वाच्यवद्भिद्याद्दन्तुरे विषमान्तरे।

इति विश्वप्रकाशः।

पतत्पत्रथे पतद्बाणे। रक्तमेव वारि जलं तत्र सञ्चरदने-कच्छायमनेककान्ति उद्गतं पलं मांसं यस्मात् उत्पलं मांसशून्य

---

१ निशितनाराचराजिज- A B D F इति मर० ष। निशितनाराचव-भज E २ -फलदन्तुरितपरिसरे C D F H ३ सरत्न- A B D H ४ इति लग० ष मर० ष। रक्त० -मेककच्छप उत्पुण्ड- A रक्तवारिज० -देत्फुल्लपु- B रक्तवारिज० -द्दयकच्छपे उत्फुल्लपुण्डरीके वा- C रक्त० -द्दयकच्छपे उत्फुल्लपु- E रक्तवारिज- F रक्त० -पोत्फुल्लपु- H

रीसमागमोत्सुकचारुभटाहङ्कारसम्भारभीषणे समरसागरे[1] भिन्नपदातिकरितुरगरुधिरार्द्रजयलक्ष्मीपादालक्तकरागरञ्जित इव खड्गो रराज।

तथ पुण्डरीकं सितच्छत्रं च यत्र तादृशं यद्वाहिनीशतं सेनाशतं तेन समाकुले। नृत्यत्कबन्धे नृत्यच्छिन्नमस्तकवीरे। सुरसुन्दरीणामप्सरसां समागमोत्सुकानां चारुभटानां योधानामहङ्कारोऽहमहमित्यस्य सम्भारस्तेन भीषणे। वषट्कार इति निर्देशात् समुदायादपि कारः। यद्वाहङ्कारस्य गर्वस्य सम्भारेण भीषणे। भटा योधाश्च योद्धारः।

कबन्धोऽस्त्री क्रियायुक्तमपमूर्धं कलेवरम्।

इति द्वयोरमरः।

तरङ्गिण्यां च सेनायां वाहिनी परिकीर्तिता।

इति विश्वः। उत्पलं कुष्ठमुत्पले। इन्दीवरे मांसशून्य इति हैमः।

पुण्डरीकं सिताम्भोजे सितच्छत्रे च भेषजे।

इति विश्वप्रकाशः। पत्नरथो बाणपत्त इति धरणिः। पत्ते पत्त्ररथः पक्षी। उत्पलमिन्दीवरम्। पुण्डरीकं सिताम्भोजम्। कबन्धं जलम्। वाहिनी नदी। कबन्धमुदकं पाथ इत्यमरः। सुरसुन्दरी मत्स्यभेदश्चारुभटोऽपि। छेकानुप्रासार्थोपमाक्षेपरूप-

---

[1] -सरसि A B E -नीरधि C

अथ कदाचिदवसन्नायां यामवत्यां दधिधवले कालक्षपणकग्रासपिण्ड इव निशायमुनाफेनपुञ्ज[1] इव मेनकानखमार्जनशिलाशकल इव मधुच्छत्रच्छायमण्डलोदरे पश्चिमाचलोपधानसुखनिलीनशिरसो[2] राजतताटङ्क[3] इव शेषमधुभाजि

कोत्प्रेक्षालङ्काराणां यथासम्भवं सङ्करसंसृष्टी। ओजो गुणः। वैदर्भी रीतिः।

अथानन्तरं स इति शेषः। कन्दर्पकेतुः कदाचिदवसन्नायां समाप्तायां रजन्यामष्टादशवर्षदेशीयाम्। ईषदसमाप्तौ कल्पब्देश्यदेशीयर इति देशीयः। ईषदसमाप्ताष्टादशवर्षां कन्यां स्वप्नेऽपश्यदित्यन्वयः। अवसन्नायामित्यनेन स्वप्नस्य शीघ्रफलदत्वं ध्वनितम्। तदुक्तं गुरुणा।

अरुणोदयवेलायां दशाहेन फलं भवेत्।

इति। एतादृशे कुमुदिनीनायके चन्द्रेऽपरजलधिपयसि पश्चिमसमुद्रजले मज्जति सतीत्यन्वयः।

*काल एव क्षपणकस्तस्य दधिधवले ग्रासपिण्ड इव। क्षपणकस्य भक्षणार्थं दधिधवलः पिण्डो दीयत इति प्रसिद्धम्। निशा रात्रिः सैव यमुना तस्याः फेनपुञ्ज इव। मेनकानखक्षालनार्थं शिलाशकले झांवां इति भाषायाम्। मधुच्छत्रस्य छाया मधुच्छत्रच्छायम्। विभाषा सेनेति क्लीबत्वम्। तदन्मण्डलोदरं

---

१ -स्तबक A B C D E F G H   २ -कान्तशिरसो A D इति नर० च। -कान्तविश्राभिमो C H -कान्तविश्राशिन्या F   ३ -ताटङ्कपत्र A B D -ताटङ्क C

चषक इव विभावरीवध्वा अपरजलधिपयसि शशाङ्ककान्तिकामुके मज्जति कुमुदिनीनायके [1]शिशिरकर्दमितकुमुदधूलिमध्यबद्धचरणेषु[2] षट्चरणेषु [3]कलप्रलापबोधितचकिताभिसारिकासु सारिकासु प्रबुद्धाध्ययनकर्मठेषु मठेषु [4]विभासरागमुखरकार्पटिकजनोपगीयमानकाव्यकथासु[5] रथ्यासु

मण्डलमध्यो यस्य तस्मिन्। पश्चिमाचलोऽस्ताद्रिः स एवोपधानं शिरोऽवलम्बनं तत्र सुखेन निलीनं स्थितं शिरो यस्यास्तस्या विभावरीवध्वा रात्रिस्त्रिया राजततातङ्क इव रौप्यकर्णभूषणविशेष इव ठेंठी इति भाषायाम्। तस्या एव शेषमधुभाजि पीतशेषमद्यमहिते चषके पानपात्र इव। शशाङ्ककान्तेः कामुकेऽभिलाषुके तुल्ये वा। चषकोऽस्त्री पानपात्रम्। उपधानं तूपबर्हः। कामुके कमितानुक इत्यमरस्त्रिषु। उत्प्रेक्षालङ्कारः।

शिशिरेण तुषारेण कर्दमितः कर्दमवदाचरितः कुमुदधूलिसमूहमध्ये बद्धाश्चरणा येषां तादृशेषु षट्चरणेषु भ्रमरेषु।

शिशिरः स्यादृतोर्भेदे तुषारे शीतलेऽन्यवत्।

इति विश्वप्रकाशः। षट्पदभ्रमरालय इत्यमरः।

कलप्रलापोऽव्यक्तमधुरध्वनिस्तेन बोधिता अतएव चकिता अभिसारिका याभिस्तासु सारिकासु।

---

१ शि॰ -कुमुदवन- A B शि॰ -कुसुम- I' २ -पराममध्य॰ A B C D E F G H इति क्रम॰ च। ३ क॰ -प्रबो- A B F G क॰ -विबो- H क॰ -विबो- इति क्रम॰। ४ विभासमानमु- I' H ५ -कार्पटिकोपगीय॰ D F H इति क्रम॰ च।

[1]सकलनिपीतनिशातिमिरमतितनीयस्तया [2]वोढुमसमर्थे-
ष्विव कज्जलव्याजादुद्वमत्स्विव कामिमिथुननिधुवनलीला-
दर्शनार्थमिवोद्ग्रीविकाशतदानखिन्नेषु विविधबन्धरतक्रीडा-

कान्तार्थिनी तु या याति सङ्केतं साभिसारिका ।
इत्यमरः । सारिकाशब्दस्तालव्यादिर्दन्त्यादिश्च । तदुक्तमूष्मभेदे ।

स्त्रीलिङ्गोऽयं शारिः शकुनिविशेषे तु दन्त्यतालव्यः ।

इति ।

प्रवुद्धा अध्ययनकर्मठा अध्ययनशीला येषु तादृशेषु मठेषु छात्रादिनिलयेषु । कर्मणि घटोऽठजित्यठच् प्रत्ययः । कर्मशीलस्तु कर्मठः । मठश्छात्रादिनिलय इति द्वयोरमरः ।

विशासेन रागविशेषेण मुखरितकार्पटिकजनैर्वस्त्रयाचकभिक्षुभिः कपडिया इति भाषाप्रसिद्धैरुपगीयमाना काव्यकथा यासु तादृशीषु रथ्यासु प्रतोलीषु । गानेऽनतिपाटवं ध्वनयितुं मुखरशब्दप्रयोगः । रथ्या प्रतोली विशिखेत्यमरः । यमकालङ्कारः ।

प्रदीपेष्वेवं विधेषु सत्स्वित्यन्वयः । अतितनीयस्या तिक्षशलेन सकलं निपीतं निशातिमिरं तद्वोढुमसमर्थेष्विव । निधुवनलीला सुरतक्रीडा । मैथुनं निधुवनं रतमित्यमरः । उद्ग्रीविका ग्रीवोन्नमनक्रिया तस्याः शतं तद्दानं विधानम् । विविधबन्धो मयूरादिबन्धो यत्र तादृग्रतक्रीडानां साक्षिषु साक्षाद्द्रष्टृषु ।

---

१ स॰ ॰तिमिरमङ्गान॰ A B C D E H इति अर॰ च । २ वोढु॰ A B E F G H

साद्रिषु शरणागतमिवाधोलीनं तिमिरमवत्सु दुर्जनेष्विव दग्धस्नेहतया मन्दिमानमुपगतेष्वतिवृद्धेष्विव दशान्तमुपगतेषु विपन्नसदीश्वरेष्विव पात्रमात्रावशेषेषु दानवेष्विव

शरणागतमिवाधोलीनमधस्तालीनं तिमिरमन्धकारमवत्सु रक्षत्सु। तथाच वराहः ।

> नार्ता न भीता न तृणाननाश्च
> विमुक्तशस्त्रा विपलायमानाः ।
> क्षीणायुधा वाजिगजावतीर्णा
> ह्येते न वध्या न च पीडनीयाः ॥
> कुलैकतन्तुः शरणागतो वा
> कृताञ्जलिर्यश्च वदेत् तवास्मि ।

इति। उत्तरश्लोके वध्या इत्यादौ वचनविपरिणामः। शरणं गृहरक्षित्रोः। तमिस्रं तिमिरं तम इतिद्वयोरमरः। उत्प्रेक्षालङ्कारः।

दुर्जनेष्विव दग्धस्नेहतया नष्टप्रेमतया मन्दिमानं सुहृत्कर्मणि शिथिलताम्।

> स्नेहोऽनुरागश्चिक्कण्यं तैलेऽपिच निगद्यते।

इति धरणिः। पक्षे स्नेहस्तैलम्। मन्दिमानमल्पतेजस्त्वम्। अतिवृद्धेष्विव दशान्तं वयसोऽन्तमुपागतेषु। पक्षे दशान्तं वर्तिकान्तम्। दशा वर्तिर्दशा वय इतिहारावली। विपन्नसदीश्वरेष्विव सर्वस्वदानादिना प्राप्तदारिद्र्येष्विव। एतच्च सत्पदेन ध्व-

निशान्तमध्यचारिष्वस्तगिरिशिखरेष्विव [1]पतत्पतङ्गेषु [2]प्रदीपेष्वनवरतमकरन्दबिन्दुसन्दोहलुब्धमधुकरनिकुरम्बझङ्कारमुखरितेषु[3] म्लानिमानमुपगच्छत्सु वासागारकुसुमोपहा-

---

नितम्। पात्रमात्रावशेषेषु देहमात्रावशेषेषु तथाच कालिदासः।

शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः।
आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः॥

इति।

पात्रं तु भाजने योग्ये देहे तीरद्वयान्तरे।

इति महीपः। यद्वा पात्रममात्यः।

पात्रं स्रुवादौ पर्णे च राममन्त्रिणि चेष्यते।

इति विश्वप्रकाशः। पक्षे पात्रं भाजनम्। दानवेष्विव निशा रात्रिस्तस्या अन्तमध्ययोश्चरणशीलेषु। पक्षे निशान्तं गृहं तन्मध्यचारिषु। निशान्तवस्त्यसदनमित्यमरः। अस्तगिरिरस्ताचलस्तच्छिखरेष्विव। पतङ्गः सूर्यः। पक्षे पतङ्गाः शलभाः। पतङ्गः शलभादित्याविति विश्वः। अस्तस्तु चरमः क्ष्माभृदित्यमरः।

एतादृशेषु वासागारकुसुमोपहारेष्वित्यन्वयः। अनवरतं मकरन्दबिन्दुसन्दोहः पुष्परससमूहस्तत्र लुब्धमधुकराणाम-

---

१ परिपतत्पतङ्गेषु A प्रपतितपतङ्गेषु F २ प्र॰ -सन्दोहमोहलुब्धमधु- A प्र॰ -सन्दोहलुब्धमुग्धमधु B D E G H प्र॰ -सन्दोहमोहमुग्धमदमुदितमधु- C प्र॰ -सन्दोहपानमोहमुग्धमधु- F ३ -करनिकरम्भ॰ A B D G -करनिकरनिकुरम्भ॰ E

रेष [1]विगलत्कुन्दैरलकैः प्रियविरहशोकाद्बाष्पबिन्दूनिवो-
त्सृजतीषु[2] प्रियतमगमननिषेधमिव [3]कुर्वतीष वाचाल-
तुलाकोटिभिश्चरणपल्लवैः रजनिशेषसुरतभरपरिश्रमवि[4]-

भिलाषुकभ्रमराणां निकुरम्बं यूथं तस्य झङ्कारेण रवविशेषेण मुखरितेषु शब्दायमानेषु। सन्दोहविसरव्रजाः। लुब्धोऽभिलाषुकस्तृष्णक्। निकुरम्बं कदम्बकमिति चामरः।

एतादृशीषु प्रियतमास्वित्यन्वयः। विगलत्कुन्दैः पतत्कुन्दकुसुमैरलकैः। करणे तृतीया। प्रियविरहेण भाविप्रियविरहेण शोकस्तस्माद्बाष्पबिन्दूनिवोत्सृजतीषु। अनेन दृष्टिर्ध्वनिता। अतएव प्रियगमननिषेधमिव कुर्वतीषु। तदाह नारदः।

अकालजेषु नृपतिर्विद्युद्गर्जितवृष्टिषु।
उत्पातेषु त्रिविधेषु सप्तरात्रं तु न व्रजेत्॥

इति। प्रवत्स्यत्पतिका नायिका।

प्रवत्स्यति प्रियतमे प्रवत्स्यत्पतिकेष्यते।

इति रसरत्नहारः। अनयोश्चैतयोः सङ्करः।

वाचालास्तुलाकोटयो येषु तादृशैश्चरणपल्लवैरुपलक्षितासु। उपलक्षणे तृतीया। स्वनितमनेन ध्वनितम्। स्यात्जल्पाकस्तु वाचालः।

पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम्।

---

१ विगलितकु C D २ -कुन्दकलिकैरिव A B C D E F H ३ कुर्वद्भिर्वा- D F H ४ -सुरतपरि° C D E F H

॥

गलितकेशपाशदरदलितमालतीमालापरिमललुब्धमधुकर-
निकरपक्षानिलनिपीतनिदाघजलशीकराश्उद्देशभुजवल्लिक[3]-
णझणत्कारमुखरासु[4] [5]नवनखपदसंसक्तकेशनिर्मोक[6]-

इति द्वयोरमरः।

रजनिशेषः पद्मविकासकालस्तत्र सुरतभरस्तेन परिश्रमस्तेन विगलितः केशपाशः केशकलापस्तत्र दरदलितानामीषद्विकसितानां मालतीनां मालास्तासां परिमलो जनमनोहरो गन्धस्तल्लुब्धमधुकरनिकरपक्षानिलेन निपीताः शोषिता निदाघजलशीकरा श्रमकणा यासां तासु। पद्मिन्यः स्त्रिय इमाः। यत्तु।

प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट्।

इति तच्चिन्त्यादिविषयम्।

पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे।

ईषदर्थे दरोऽव्ययम्।

विमर्दोत्थे परिमलो गन्धे जनमनोहरे।

स्तोमौघनिकरव्रात इति चतुर्ष्वमरः।

उद्देशभुजवल्लिकङ्कणस्य झणत्कारः शिञ्जितं तेन मुखरासु। अनेनापि स्तनितं ध्वनितम्। नवनखपदं रात्रिजातं नखक्षतं तत्र संसक्तः केशस्तन्निर्मोको निर्मोचनं तेन वेदना तया क्षतः

---

१ ग॰ -लुब्धलुब्ध- C D G H इति क्रम॰ च। २ निकुरम्ब- A B C F G H ३ -करकणाद्य॰ A B C D F G H -करकणाद्युग्म- E ४ -रुंभगासु A B C D F H ५ ग॰ -पदद्दकेश- A C D E F H इति क्रम॰ च मर॰ च। ग॰ -पदांद्यकेश- B ६ -केशपाशनिर्मोक- A B D G इति मर॰ च।

वेदनाहतसीत्कारविनिर्गतदुग्धमुग्धदशनकिरणच्छटाधवलितभोगावासासु पुनर्दर्शनपृच्छाविधुरसखीजनानन्दलवोह्यमाणप्रियतमासु [1]क्षणदागतवैयात्यवचनशतस्मारकगृह[2]-[3]शुकचाटुव्याहृतिक्षणजनितमन्दाक्षासु शरद्वासरलक्ष्मीष्विव

सीत्कारश्वासादिविनिर्गताभिर्दुग्धमुग्धदशनकिरणच्छटाभिर्धवलितो धवलीकृतो भोगावासो वासगृहं याभिस्तासु। दशनकिरणच्छटाभिस्तडिद्धनिता। मुग्धौ बर्बरसुन्दराविति विश्वः। भोगावासो वासगृहमिति हारावली।

प्रियतमाः प्रेयांसः। क्षणं कामोत्सवं ददातीति क्षणदा रात्रिस्तद्गतं वैयात्यवचनशतं धृष्टतावचनानि तत्स्मारकगृहशुकस्य चाटुव्याहृतिभिः क्षणं क्षणमात्रं जनितं मन्दाक्षं लज्जा यासां तादृशीषु। तथाच माघः।

अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव॥

इति। चटु चाटु प्रिये वाक्ये। वैयात्यं धृष्टता मतेति हारावली। कलाविशेषोत्सवयोः क्षणः। मन्दाक्षं ह्रीस्त्रपा व्रीडा। व्याहार उक्तिर्लपितमिति इत्यमरः।

शरच्छरदृतुः। न खेनाकाशेनासङ्गताः पयोधरा मेघा यासु। मण्डनं मण्डनानामितिवदाकाशभूषणानामाकाशस्येव

---

१ क्षणदागत- A क्षणदाहृत- C २ -वचनशतधंष॰ A B C D E F G H इति क्वचि॰ पा। ३ शुक चाव- E

नखालङ्कृतपयोधरास्वासन्नमरणास्विव जीवितेशपुराभिमुखीषु[1] [2]वसन्तवनराजिष्विवोत्कलिकाबहुलासु[3] प्रियैरालिङ्ग्यमानासु कामिनीष्वान्दोलितकुसुमकेसरे[4] केशरेणुमुषि

भूषणलवर्णनम्। यद्वा न खेऽलङ्कृता भूषिताः सजला अतिनीला इति यावत्। तादृशाः पयोधरा मेघा यासु। शरत्काले निर्जलत्वादनलङ्कृतत्वमित्यर्थः। पक्षे। नखेन तत्क्षतं लक्ष्यते तेनालङ्कृताः पयोधराः स्तना यासां तादृशीषु। स्त्रीस्तनाब्दौ पयोधरावित्यमरः। जीवितेशो यमस्तस्य पुरं संयमिनी। पक्षे। जीवितेशः पतिः। तत्पुरं शरीरम्।

वल्लभे धर्मराजे च जीवितेशो धनागमे।

पुरं पुरि शरीरे च गुग्गुलौ कथितः पुरः।

इत्युभयत्र विश्वः।

वनराजिर्वनपरम्परा। उत्कलिकोद्गतकोरकः। कलिका कोरकः पुमानित्यमरः। पक्षे। उत्कलिकोत्कण्ठा। उत्कण्ठोत्कलिके समे इत्यमरः।

यमकेनाह। एतादृशे वाते वहतीत्यन्वयः। आन्दोलितकुसुमकेसरे कम्पितपुष्पकिञ्जल्के। रणितेन मधुरा मणयो यासां तादृशीनां रमणीनां केशरेणुमुषि केशपदेन तत्स्थानि पुष्पाणि लक्ष्यन्ते तद्रजोहारके। विकचानि विकसितानि च

---

१ -पुरोऽभिमुखीषु C F २ वसन्तारामरा- D ३ -बहुबहुलासु A C
४ -केसर- G H

रणितमधुरमणीनां[1] रमणीनां [2]विकचकुमुदाकरे [3]मुदाकरे सङ्गभाजि प्रियविरहितासु रहितासु सुखेन मुर्मुरमिव वर्षति समन्तादर्पके दर्पकेपुदहनस्य [4]दूरप्रसारितकोक-

---

तानि कुमुदानि च कैरवाणि तेषामाकरे। एतादृशे सरसि। सङ्गभाजि। अतएव मुदाकरे हर्षकारके। मुदेत्यत्र भागुरिमते टाप्। एतेन विशेषणद्वयेन शीतमन्दसुगन्धित्वं ध्वनितम्।

प्रियविरहितासु। अतएव सुखेन रहितासु। समन्तात् परितो दर्पकेपुदहनस्य कामवाणाग्नेरर्पके समर्पके। अतएव मुर्मुरमिव तुषाग्निमिव वर्षति। मुर्मुरस्तु तुषानल इति वैजयन्ती। कोकप्रियतमा चक्रवाकी। केसरे केशरे इत्यत्र स्वभेदयमकम्। भोजराजेनोदाहृतं च।

शालं वहन्ती सुरतापनीयं सालं तडिद्भासुरतापनीयम्।

रथोभरथोभरसन्निकूटा लङ्काकलङ्का कलिकाद्रिकूटे॥

इत्यत्र शाले सालमिति स्वभेदयमकमिति वर्णितम्। इदं स्थूलमव्यपेतयमकम्। केशर इति तालव्यमध्यपाठे त्विदमेव यमकप्रमाणम्।

अर्थे सत्यर्थभिन्नानां पदानां सा पुनः श्रुतिः।

यमकम्।

केसरो बकुले सिंहसटायां पुष्पमध्यगे।

---

१ ॰मधुकरमणीनां A F इति क्रम॰ च। ॰मधुरमणीनां D इति मर॰ च।
२ विकासितकु A B विकसितकु G ३ ॰कुमुद॰ D कुमुद॰ इति मर॰।
४ दूरप्रसारित॰ B

प्रियतमारुते मारुते वहति जघनमदनपुरतोरणेन [1]मदननगरमहानिधिकनकप्राकारेण रोमावलीलतालवालेन जघनचन्द्रमण्डलपरिवेषेण [2]त्रिभुवनविजयप्रशस्तिरोमावलीकनकपत्रेण [3]सकलहृदयवन्दिनिवासपरिखावलयेन जग-

---

इति विश्वः। किञ्जल्कः केसरोऽस्त्रियाम्। रेणुर्द्वयोः स्त्रियां धूलिः। मुत् प्रीतिः प्रमदो हर्षः। व्याकोशविकचस्फुटाः। फुल्लश्चैते विकसिते। सिते कुमुदकैरवे। कन्दर्पो दर्पकोऽनङ्गः। पत्नी रोप इपुर्द्वयोः। कोकश्चक्रश्चक्रवाक इत्यष्टस्वमरः।

मेखलादाम्ना काञ्चीदाम्ना परिवृतजघनस्थलीमित्यन्वयः। जानपदेति ङीष्। तोरणेन बहिर्द्वारेण। प्राकारेण वरणेन। आलवालेनावालेन। थाला इति भाषायाम्। परिवेषेण परिधिना। प्रशस्तिः प्रशस्तिवर्णः। सैव रोमावली तस्याः कनकपत्रेण कनकचित्रेण पत्रेण शाकपार्थिवादिः। यद्वा। ताम्रपत्रवत् कनकपत्रम्। सकलानां हृदयान्येव वन्द्यः प्रग्रहास्तेषां निवासः कारा तत्परिखावलयेन। खाई इति भाषायाम्। सर्वेषां हृदयानि तत्रैव निवसन्तीति भावः। जगल्लोचनानि सर्वजननेत्राणि तान्येव विहङ्गमाः पक्षिणस्तेषां माला पङ्क्तिस्तस्या स्नामकशलाकागुणः। कांपा इति भाषायाम्। सर्वेषां लोचनाकर्षकेणेति

---

१ मन्मथमन्दिरमहा- A B G मदनमन्दिरमहा- F इति सर० च। २ त्रि० -वर्णरो- A G त्रि० -रोमवर्णावली- B E F त्रि० -लेखरोमावली- D इति सर० च। ३ सकलजगद्- A B C D E F G H

[1]श्लोचनविहङ्गमभालालासकशलाकागुणेनेव[2] मेखलादाम्ना [3]परिवृतजघनस्थलीमुन्नतपयोधरभारान्तरितमुखचन्द्रदर्शना-[4]प्राप्तिजनितखेदेनेव [5]गुरुनितम्बबिम्बपयोधरकुम्भपीडाज-[6]नितायासेनेव गृहीतगुरुकलत्रानुशयेनेव [7]विधातुरतिपीड-

---

भावः। तोरणोऽस्त्री बहिर्द्वारम्। प्राकारो वरणः शालः। स्यादालवालमावालम्। परिवेषस्तु परिधिः।

प्रग्रहोपग्रहौ बन्द्यां कारा स्याद्बन्धनालये।

खेयं तु परिखा।

खगे विहङ्गविहगविहङ्गमविहायसः।

स्त्रीकट्यां मेखला काञ्चीत्यप्यमरः। गमेः सुपि वाच्य इति खश्। विहायसो विह इति वाच्यं खच् च डिद्वा वाच्य इति विहायसो विहादेशे खित्यनव्ययस्येति मुमागमः। खनु अवदारणे। अन्येभ्योऽपि दृश्यन्त इति डः। परितः खाता परिखा।

चलेचयाह। मध्यभागेनावलग्नेनालङ्कृतामित्यन्वयः। उन्नतपयोधराभ्यामन्तरितो व्यवहितो यो मुखचन्द्रस्तद्दर्शनाप्राप्त्या जनितखेदेनेव। गुरुर्महान् नितम्बबिम्बो नितम्बमण्डलं पयोधरकुम्भः स्तनकलशस्ताभ्यां पीडया जनितायासेनेव। गृहीतेति

---

१ लो॰ -विहङ्गमलाल॰ A C D F २ -कनककशा॰ C ३ परिगत- A B D F प॰ -स्थलाम् A B C D E F G H इति क्रम॰ च नर॰ च। ४ प्राप्तिं A B C F H इति क्रम॰ च। ५ गुरुनितम्बपयो॰ D H ६ -पयोधरकुम्भनिवहोभय-पार्श्वपीडा॰ B F G H पयोधरभारपीडा॰ D ७ विधातुरपि पी G

यतो [1]हस्तपाशजनितायासेनेव मम मूर्धजयोरियत्प्रमाणयोः स्तनकलशयोः कथं मय्येव निपातो भविष्यतीति चिन्तयेव[2] क्षीणतरतामुपगतेन मध्यभागेनालङ्कृतामनुरागरत्नमयकनकरुचकाभ्यां[3] चूचुकमुद्रासनाथाभ्यामतिगुरुपरिणाहतया पतनभयात् [4]कीलिताभ्यामिव चूचुकच्छलेन[5] गिरिसारेण सक-

---

बृहत्कलत्रस्य पृथुश्रोणिमण्डलस्यानुशयो दीर्घद्वेषो येन। विधातुर्ब्रह्मणः। मूर्धशब्देनोर्ध्वदेशो लक्ष्यते। तत्रोत्पन्नयोः स्तनकलशयोर्मय्येव पातो भविष्यतीति चिन्ता क्षीणताहेतुः। मध्यमं चावलग्नं च मध्योऽस्त्री। कलत्रं श्रोणिभार्ययोः। अनुशयो दीर्घद्वेषानुतापयोरिति त्रिष्वमरः। बृहत्कलत्रपदेन युवतीपतेः पौगण्डे वयसि वर्तमानस्य वृत्तान्तोऽपि प्रतीयते। गुरुकलत्रानुशयेनेति पाठस्त्वयुक्तत्वादुपेक्षितः।

पयोधराभ्यामुद्भासमानामित्यन्वयः। अनुराग एव रत्नं तत्प्रचुरौ कनकरुचकौ गुलिकामणी रत्नमये गुलिके यतोऽतः चूचुके एव मुद्रे जतुमये नामाक्षराङ्किते मुद्रे ताभ्यां सनाथाभ्यां सहिताभ्याम्।

रुचको मङ्गलद्रव्ये ग्रीवाभरणदन्तयोः।

इति विश्वप्रकाशः। रुचको गुलिकामणिः। अतिगुरुपरिणाह-

---

१ हस्तपाशपरामर्शज- D २ विचिन्तयत्वेव C ३ -कनककुरचकाभ्यां A D H -कनकसमुद्रकाभ्यां B -कमकपक्षवचकाभ्यां C ४ खिलि A B C D E इति नाम० च नए० च। ५ + विधिना C

लावयवनिषिक्ताशेषलावण्यपुञ्जाभ्यामिव हृदयतडागकम[१]-लाभ्यामिव हृच्छयकपोलचातुरिकाविभ्रमाभ्यां रोमावली-लताफलाभ्यां[२] [३]कन्दर्पदर्पवर्धनवशीकरणचूर्णपूर्णसमुद्गका[४]-भ्यामशेषजनहृदयपतनसञ्जातगौरवाभ्यां संसारमहातरु[५]-फलाभ्यां यौवनमहापादपप्रसवाभ्यां हारलतास्मरणालम्भ-

---

तया विशालतया पतनभयाद्धेतोश्चूचुकच्छलेन मिषेण गिरि-सारेण लोहकीलेन कीलिताभ्यामिव। सकलेष्ववयवेषु निषि-क्तस्यातएवावशिष्टस्य लावण्यस्य पुञ्जाभ्यामिव।

मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा।
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥

इति मेदिनी। हृदयतडागकमलाभ्यां कमलकोरकाभ्यामि-त्यर्थः। हृच्छयः कामः। कपोलचातुरिका गल्लमसुरिका इति भाषायाम्। रोमावलीलता तत्फलाभ्याम्। कन्दर्पः काम-स्तस्य दर्पस्तद्वर्धनं तद्वशीकरणचूर्णं तेन पूर्णसमुद्गकाभ्यां सम्पु-टाभ्याम्। स्तनदर्शनादेव कामाविर्भावो यूनामिति भावः। अशेषाणां सर्वेषां जनानां हृदयस्य मनसः पतनं तेन सञ्जात-गौरवाभ्याम्। यथा कठिनद्रव्यान्तराभिघाताच्छरीरे ग्रन्थि-सम्भवस्तथैतदपि युवमनसां पातात् पयोधरसम्भवः। एतेनैत-च्छरीरमार्दवं कुचयोः काठिन्यं च वर्णितम्। संसारमहातरु-

१ -सहागकमलकम- A २ -मराफलाभ्यां D + इव II ३ क॰ -विवर्धन- D इति भर॰ च। ४ समुद्गको॰ A B C F G इति भर॰ च। ५ संसारवाटि-कातरु- A G H संसारवाटिजातकमहा॰ B

नीयचक्रवाकाभ्यां [१]हारलतारोमावलीसङ्गमव्याजप्रयाग[२]-[३]तरुफलाभ्यां त्रिभुवनविजयपरिश्रमखिन्नस्य मकरकेतोर्विजनवासगृहाभ्यां[४] पयोधराभ्यामुद्भासमाना [५]मुखचन्द्रसन्नि-[६]हितसन्ध्यारागेण[७] [८]दन्तमणिरत्तासिन्दूरमुद्रानुकारिणा

फलाभ्याम्। संसारखेदमेवैकं फलमिति भावः। यौवनं तारुण्यं तदेव पादपो वृक्षस्तत्प्रसवाभ्यां पुष्पाभ्याम्। तारुण्यं यौवनं समे। विटपी पादपस्तरुरित्युभयचामरः।

पुष्पं प्रसूनं सुमनः प्रसवश्च मणीवकम्।

इति हैमः। त्रिभुवनविजयपरिश्रान्तस्येत्यनेन सैधनिवासो ध्वनितोऽतएव विजनवासगृहाभ्यां पटमण्डपाभ्यामित्यर्थः। तदाकारानुकारित्वादिति भावः। जनराहित्यवर्णनात् सुन्दरच्छिन्नत्वं ध्वनितम्।

उत्प्रेक्षया प्रौढोक्त्या चाह। अधरपल्लवेनाधरोष्ठकिसलयेनोपशोभमानामिति सम्बन्धः। पल्लवोऽस्त्री किसलयमित्यमरः। मुखचन्द्रसन्निहितस्तत्समीपवर्ती सन्ध्यारागस्तात्कालिकलौहित्यविशेषः। दन्तमणीनां रक्षा कान्तिविशेषसंरक्षणम्। तदर्थं या सिन्दूरमुद्रा तदनुकारिणा। निःसरता हृदयानुरागेण रञ्जितेनेव। कीर्तौ श्वैत्यवदनुरागे लौहित्यवर्णनं कविसम्प्रदायः। तथाच माघः।

---

१ च॰ -मङ्गमजया- C D २ -सङ्गमप्रयाग- E G H ३ — तरु- F ४ -वासस्थान॰ A B F ५ मुखचन्द्रसन्निहित॰ C ६ हितसन्ध्यातप- A C F G हितसन्ध्यातप- D ७ + इव A B C E ८ द्विज॰ A B C D F G H इति अन॰ च मट॰ च।

निःसरता [1]हृदयानुरागेणेव [2]रञ्जितेन [3]रागसागरविद्रुम-[4]नवपल्लवेनेवाधरपल्लवेनोपशोभमानां तरुणतरकेतकदलद्राघीयसा पक्ष्मलचटुलालसेन हृदयवासगृहावस्थितहृच्छय[5]-विलासिनो, गवाक्षशङ्कामुपजनयता सरागेणापि निर्वाणं

क्षालितः कथमपि त्रपयान्तर्यः प्रियं प्रति चिराय रमण्या।
वारुणीमदविशङ्कमथाविश्चुपोऽभवदसाविव रागः॥

इति। रागसागरोऽनुरागसमुद्रस्तत्सम्बन्धिविद्रुमस्य प्रवालतरोर्नवपल्लवेनेव। अत्र प्रौढोक्तिरपि।

प्रौढोक्तिरुत्कर्षाहेतौ तद्धेतुत्वप्रकल्पनम्।

विद्रुमः पुंसि प्रवालः पुंनपुंसकमित्यमरः।

नयनयुगलेन भूषितामित्यन्वयः। तरुणतरकेतकदलद्राघीयसा तद्वद्दीर्घेण। ईयसुनि प्रियस्थिरेत्यादिना दीर्घशब्दस्य द्राघादेशः। दलं पर्णं छदः पुमानित्यमरः। पक्ष्मलं पक्ष्मयुक्तं चटुलं चञ्चलमलसं मन्दं तादृशेन। हृदयमेव वासगृहं तत्रावस्थितस्य हृच्छयविलासिनः। कामविलासिनो गवाक्षशङ्कां वातायनशङ्कामुपजनयता। वातायनं गवाक्ष इत्यमरः। सरागेण सानुरागेण निर्वाणं मोक्षं कुर्वतेति विरोधः। मुक्तिः कैवल्यनिर्वाणमित्यमरः। परिहारस्तु निर्वाणं निवृत्तिः। एतद्दर्शनाज्जनानां पदार्थान्तरेभ्यश्चेतसो निवृत्तिरिति भावः। नि-

---

१—हृदय- E २ चतुर- A B G ३ रागसागरप्रवालसव- G रागसागरविद्रुमेणेवाधरपल्लव- H ४ नवपल्लवे- A B C D E F H इति नर॰ च। ५ -हृदयमय- F

कुर्वता[1] [2]गतिप्रसररोधकश्रवणकृतकोपेनेवोपान्तलोहितेन[3] धवलयतेव जगदशेषमुत्फुल्लकमलकाननसनाथमिव गगनं कुर्वता दुग्धाम्भोधिसहस्राणीवोद्गमता[4] कुन्दनीलोत्पलमालालक्ष्मीमिवोपहसता नयनयुगलेन [5]भूषितां दशनरत्नतुलाद-

---

र्घोणोऽवात इति निपातः। गतिप्रसररोधकश्रवणकृतकोपेनेव। अन्तस्य समीपमुपान्तं प्रान्तदेशस्तत्र लोहितेन रक्तेन। उपान्तमिति विभक्तीत्यादिना सामीप्येऽव्ययीभावः। रोहितो लोहितो रक्त इत्यमरः।

दृष्टिसञ्चारजन्यं विशेषं वर्णयन्नाह। धवलयता धवलं कुर्वता जगदशेषम्। उत्फुल्लानि व्याकोशानि कमलानि तेषां काननं तेन सनाथं गगनमन्तरिक्षं कुर्वता।

प्रफुल्लोत्फुल्लसम्फुल्लव्याकोशविकचस्फुटाः।

नभोऽन्तरिक्षं गगनमित्युभयत्रामरः।

दुग्धाम्भोधिसहस्रमिवोद्गमतोद्गिरता। टुवम उद्गिरणे। कुन्दनीलोत्पलमालालक्ष्मीमिवोपहसता। तदधिकशोभत्वादिति भावः।

नासावंशेन परिष्कृतां भूषितामित्यन्वयः। भूषितस्तु परिष्कृत इत्यमरः। दशनरत्नानि दन्तरत्नानि तेषां तुलादण्डेन।

---

१ वमयता A B C D F G H इति नर॰ च। २ गतिप्रसरावरो C D E F H ३ -मोपान्तलो॰ D ४ -मतोत्फुल्लनीलो- H ५ विभूषितां A B D F इति नर॰ च।

षण्डेन [१]नयनसमुद्रसेतुबन्धेन[२] [३]यौवनमन्मथमत्तवारणयोर्वरण्डकेनेव नासावंशेन परिष्कृता [४]विलोचनेन्दीवरभ्रमरपङ्क्तिभ्यां मुखमदनमन्दिरतोरणाभ्यां रागसागरवेलाभ्यां[५] यौवननर्तकलासिकाभ्यां भ्रूलताभ्यां विराजमाना[६] घनसम-

---

नयनसमुद्रस्य सेतुबन्धेन। सेतुराली स्त्रियां पुमानित्यमरः। यौवनमन्मथावेव मत्तवारणौ मत्तगजौ तयोर्वरण्डकेन।

भित्तेरुभयपार्श्वे द्वौ स्थापयित्वा मतङ्गजौ।

शोधयन्तीति प्रसिद्धं भित्तिः सा तु वरण्डकम्॥

अगड इति भाषायां प्रसिद्धम्। कुञ्जरो वारणः करीत्यमरः।

रूपकातिशयोक्त्याह। भ्रूलताभ्यां विराजमाना शोभमानामित्यन्वयः। विलोचनेन्दीवरस्य नेत्रनीलोत्पलस्य भ्रमरपङ्क्तिभ्याम्। इन्दीवरं च नीलेऽस्मिन्निति कुमुदप्रकरणेऽमरः। मुखमदनमन्दिरस्य तोरणाभ्यां बहिर्द्वाराभ्याम्। तोरणोऽस्त्री बहिर्द्वारमित्यमरः। रागसागरोऽनुरागसमुद्रस्तद्वेलाभ्याम्।

अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि।

इत्यमरः। यौवननर्तकलासिकाभ्याम्। नर्तकीलासिके समे इत्यमरः।

श्लेषेणाह। घनसमयो वर्षाकालस्तस्य लक्ष्मीः शोभा तामि-

---

१ नयनयुगलस- B २ -बन्धेनेव D E H ३ यौवनमन्मथमत्तावा- H ४ विलोचनकुवलयभ्र- A B C D E F G H ५ -वेलिकाभ्यां A B C D F H इति नाग० च मर० च। ६ इति नाग० च। विराजिता A B C D E F G इति मर० च।

याकाशलक्ष्मीमिवोल्लसच्चारुपयोधरां [1]जयशब्दघोषणापन्नजनमूर्तिमिवोल्लसत्तुलाकोटिप्रतिष्ठितां सुयोधनधृतिमिव[2] कर्णविश्रान्तलोचनां वामनलीलामिव दर्शितवलिविभङ्गां[3] [4]वृश्चिकराशिरविस्थितिमिवातिक्रान्तकन्यातुलामुषामिवानिरु-

---

वोल्लसचारुपयोधराम्। स्त्रीस्तनाब्दौ पयोधरावित्यमरः। जयशब्दस्य घोषणामापन्ना प्राप्ता या जनमूर्तिस्तामिवोल्लसत्तुलाकोटौ प्रस्फुरमाणतुलाग्रे प्रतिष्ठितां स्थिताम्। परीक्षासमये शुद्धीभवन् सर्वैर्जयजयेत्युच्यते। उच्चैर्घुष्टं तु घोषणेत्यमरः। पक्षे। उल्लसत्तुलाकोटिना शोभमानपादाङ्गदेन प्रतिष्ठितां प्राप्तप्रतिष्ठाम्। तदस्य सञ्जातमिति तारकादित्वादितच्। पादाङ्गदं तुलाकोटिरित्यमरः।

सुयोधनो दुर्योधनस्तस्य धृतिर्धैर्यमिव कर्णविश्रान्तलोचनाम्। यावत्कर्णं पश्यति तावत्तस्य धृतिरिति भावः। पक्षे। कर्णयोः श्रोत्रयोर्विश्रान्ते लोचने यस्यास्ताम्। कर्णशब्दश्रुती श्रोत्रमित्यमरः।

वामनलीलामिव वामनावतारविष्णुलीलामिव दर्शितो बलेस्तन्नाम्नो दैत्यस्य विभङ्गो यस्यां ताम्। पक्षे। दर्शितो वलीनां त्रिवलीनां विभङ्गो यस्यां ताम्। वलिः प्राण्यङ्गजे स्त्रियामित्यमरः।

---

१ जयघोष- C D F २ -धीतिमिव C -मूर्तिमिव D -धिमहतिमिव G H
३ -वलिभङ्गां C ४ वृश्चिकरवि- A B D F

द्दर्शनसुखां शचीमिव नन्दनेक्षणरुचिं पशुपतिताण्डवलीलामिवोल्लसच्चक्षुःश्रवसमटवीमिवोत्तुङ्गश्यामलकुचां वानर-

---

वृश्चिकराशौ रविस्थितिमिवातिक्रान्ते कन्यातुले तन्नामकराशी यया ताम्। तयोस्तत्पूर्वत्वादित्यर्थः। पक्षे। अतिक्रान्ता कन्यानां तुला तुलना यया ताम्। उषा बाणासुरस्य कन्या तामिवानिरुद्धस्य दर्शनेन सुखं यस्याः। पक्षे। अनिरुद्धमनिवारितं दर्शनसुखं यस्यास्ताम्।

शचीमिवेन्द्राणीमिव नन्दनस्येन्द्रवनस्येक्षणे रुचिर्यस्यास्ताम्। पुलोमजा शचीन्द्राणी। नन्दनं वनमितीन्द्रप्रकरणे द्वयोरमरः। पक्षे। नन्दयतीति नन्दना। नन्द्यादित्वात् कर्तरि ल्युः। अजादित्वाट्टाप्। तादृशी ईक्षणरुचिर्नेत्रकान्तिर्यस्यास्ताम्। ईक्षणं चक्षुरक्षिणी इत्यमरः।

पशुपतेः शिवस्य ताण्डवलीलामिवोल्लसच्चक्षुःश्रवसमुल्लसत्सर्पाम्। ईशः पशुपतिः शिवः। ताण्डवं नटनं नाट्यम्। चक्षुःश्रवाः काकोदरः फणीति चित्यमरः। पक्षे। उल्लसच्चक्षुःश्रवसं शोभमाननेत्रकर्णाम्। अटवीमिवारण्यमिवोत्तुङ्ग उच्चः श्यामो लकुचो यस्यां ताम्। लकुचो लिकुचो डहुरित्यमरः। बडहर इति भाषायाम्। अटव्यरण्यं विपिनमिति च। पक्षे। उत्तुङ्गौ श्यामलौ कुचौ स्तनौ यस्यास्ताम्। दग्धः पट इतिवदवयवधर्मस्य समुदाये समारोपात् कुचयोः श्यामलतावर्णनम्। कालश्यामलमेचका इत्यमरः।

सेनामिव, सुग्रीवाङ्गदोपशोभितां [१]भास्वतालङ्कारेण [२]चन्द्रेण [३]वदनमण्डलेन [४]लोहितेनाधरपल्लवेन[५] सौम्येन दर्शनेन गु-रुणा नितम्बबिम्बेन[६] विकचेन[७] नेत्रकमलेन[८] शनैश्चरेण पा-देन [९]तमसा केशपाशेन ग्रहमयीमिव संसारभित्तिचित्र-

---

वानरसेनामिव सुग्रीवेणाङ्गदेनोपशोभिताम्। पक्षे। शोभ-ना ग्रीवा यस्याः सा चासावङ्गदेन केयूरेणोपशोभिता ताम्। केयूरमङ्गदं तुल्ये इत्यमरः।

रत्नावलीश्लेषाभ्यामाह। ग्रहमयीमिवेत्यन्वयः। भास्वता शोभमानेनालङ्कारेण भूषणेन। पक्षे। भास्वान् सूर्यः। भास्व-द्विवस्वत्सप्ताश्वेत्यमरः। चन्द्रेणाह्लादकेन। चदि आह्लादे। स्फायितञ्चीति रक्। वदनमण्डलेन। पक्षे। चन्द्रेण चन्द्रमसा। हिमांशुश्चन्द्रमाश्चन्द्र इत्यमरः। लोहितेन रक्तेनाधरपल्लवेन। रोहितो लोहितो रक्त इत्यमरः। पक्षे लोहितेन भौमेन। कुजो भौमो लोहिताङ्गो महीसुत इत्यमरः। सौम्येन मनो-हरेण दर्शनेन विलोकनेन। पक्षे। सौम्येन बुधेन। रौहिणेयो

---

१ भास्वतेत्यादिकेशपाशेनेत्यन्तस्य स्थाने सर्वेषु मूलपुस्तकेषु जगद्धरनरसिंहटी-कयोश्चान्यक्रमावस्थो पाठोऽस्ति। तथाहि। शनै॰ पा॰ कौ॰ दर्श॰ गु॰ नि॰ लो॰ वि॰ ने॰ भा॰ च॰ वद॰ त॰ के॰। इत्येतद्दर्शे च पाठान्तराणि विद्यन्ते। २ कुमुदेन चन्द्रमण्डलेन काव्यैकालापेन H ३ कुमुदेन A B C D F G ४ लोहि-तेनाधरेण A B C D E F G H ५ + चेतरोचिषा स्मितेन C D इति मर॰ च। ६ नितम्बेन A B C D E F G H ७ विलोचनोत्पलेन A B C E F G H मद-नोत्पलेन D ८ + काव्यामृतेन C + स्मितेन हारेण C D इति मर॰ च। ९ —तमसा केशपाशेन B C E F G

लेखामिव त्रैलोक्यसौन्दर्यसङ्केतभूमिमिव रसायनसिद्धिमिव यौवनमदायोगिनः सङ्कल्पभित्तिमिव[१] शृङ्गारस्य निधानमिव

बुधः सौम्य इत्यमरः। गुरुणा महता नितम्बबिम्बेन। पक्षे। गुरुणा वृहस्पतिना। गीष्पतिर्धिषणो गुरुरित्यमरः। विकचेन विकसितेन विलोचनोत्पलेन नेत्रकमलेन। पक्षे। विगतः कचो वृहस्पतिपुत्रो यस्माद्विकचः शुक्रः।

शुक्रे केतौ च विकच उत्फुल्ले च निगद्यते।

इति विश्वः। शनैर्मन्दं चरति गच्छति तादृशेन पादेन। तया गजगामितयेति भावः। पक्षे। शनैश्चरः सौरिः। समौ सौरिशनैश्चरावित्यमरः। तम इव तमस्तादृशेन केशपाशेन मार्दवदैर्घ्यश्यामतादिगुणेन। अन्यपदार्थे चतुर्गतिप्रतिरोधकत्वादिति भावः। कचः केशः शिरोरुहः।

पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे।

इत्यमरः। पक्षे तमसा राहुणा। तमस्तु राहुः स्वर्भानुरित्यमरः। सर्वत्रोपमत्वणे तृतीया। राहुकेत्वोरेकत्वात् शुक्रे केतौ च विकच इति विश्वकोशादिविकचशब्देन वा केतोरपि सङ्ग्रहः।

क्रमिकं प्रकृतार्थानां न्यासं रत्नावलीं विदुः।

संसारभित्तिचित्रलेखामिव। चित्रलेखेवेयं शोभिकेति भावः। यौवनस्य रसायनसिद्धिमिव। जराव्याधिजित् सद्यःसमाप्तिकृत् स्वर्णरोग्यजनको यौषधिविशेषो रसायनम्। शृङ्गारस्य सङ्कल्पभित्तिमिव। सङ्कल्पः कर्म मानसमित्यमरः। कौतुकस्य कौतु-

---

१ भत्तिमिव A B C F H

कौतुकस्य [1]त्रिभुवनविजयपताकामिव मकरध्वजस्याविर्भूतिमिव मनसोऽभिभूतिमिव[2] मदनस्य [3]स्तम्भनचूर्णमिवेन्द्रियाणां मोहनशक्तिमिव मन्मथस्य विहारस्थलीमिव[4] सौन्दर्यस्यैकायतनशालामिव[5] सौभाग्यस्योत्पत्तिस्थानमिव [6]लावण्यस्याक-

---

रत्नस्य निधीयन्तेऽस्मिन् निधानमाश्रयः। कौतूहलं कौतुकं चेत्यमरः। मकरध्वजस्य कामस्य त्रिभुवनविजयपताकामिव। हनुमत्पताकादिवदिति भावः। पुष्पधन्वा रतिपतिर्मकरध्वज इत्यमरः। मनस आविर्भूतिमिव। मदनस्याभिभूतिमिव। अभिभवकारणमिवेत्यर्थः। इन्द्रियाणां धीन्द्रियकर्मेन्द्रियाणां स्तम्भनचूर्णमिव। एतद्दर्शनादेव स्तम्भरूपसात्त्विकभावाविर्भाव इति भावः। मन्मथस्य मोहनशक्तिमिव। मदनो यया जगन्मोहयति सैवेयं मूर्तिमतीति भावः।

सौन्दर्यस्य विहारस्थलीमिव। विहारः क्रीडा तदर्थं स्थली पुरुषेणासंस्कृता भूमिस्तामिव। एतेनेयमलङ्कारादिपुरुषसंस्काररहितापि रम्यैवेति स्वाभाविकसौन्दर्यातिशयो ध्वनितः। तथाच कालिदासः।

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।

---

१ विजयप- C D H २ -स्याभिरतिभूमिमिव B -स्यातिभूमिमिव C -स्याभिभूमिमिव D -स्यातिभूमिमिव F -स्याविर्भूतिमिव मनसोऽतिभूमिमिव G ३ स्तम्भनमिवेन्द्रियाणां इति नाग०। ४ विहारस्थलीमिव H ५ -यतनमिव A B D H ६ कान्तेराकर्ष- D

र्षणसिद्धिमिव[1] मनसश्चक्षुर्बन्धमिव[2] मन्मथेन्द्रजालिनस्त्रिभुवनविलोभनदृष्टिमिव प्रजापतेः [3]कन्यकामष्टादशवर्षदेशीयामपश्यत् स्वप्ने।

अथ तां प्रीतिविस्फारितेन चक्षुषा पिबन्निव जनितेर्ष्ययेव निद्रया चिरसेवितया मुमुचे। [4]विबुद्धस्तु विषसरसीव[5] दुर्ज-

---

इयमधिकमनोज्ञा वल्कलेनापि तन्वी

किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

इति। सौभाग्यस्य सुभगताया एका प्रधानायतनशाला चैत्यशाला तामिव।

एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा।

चैत्यमायतनं तुल्ये इत्यमरः। लावण्यस्योत्पत्तिस्थानमिव।

मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा।

प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते॥

इति मेदिनी। मनस आकर्षणसिद्धिमिव। स्वर्णाकर्षणभैरवादिसिद्धिमिवेत्यर्थः। मन्मथेन्द्रजालिन इन्द्रजालविद्यानिपुणस्य चक्षुर्बन्धमिव। प्रजापतेर्ब्रह्मणस्त्रिभुवनविलोभनदृष्टिमिव।

अथ स्वप्नदर्शनोत्तरं प्रीतिविस्फारितेन विकसितेन चक्षुषा तां पिबन्निव। अतएव चिरसेवितया निद्रया जनितेर्ष्ययेव।

---

१ ॰र्षणमन्त्रसिद्धिमिव A D F G H २ ॰मोषधीमिव A B F अमरौषधीमिव C D G H ३ कन्यकां धायदशनाम H ४ तत्र D ५ विसंरमसरसीव A C D F इति सर॰ च।

नवचसीव निमग्नमात्मानं धारयितुं न शशाक। तथाहि क्षण-माकाशतलमालिङ्गन् प्रसारितबाहुयुगल एह्येहि प्रियतमे[1] क्व गच्छसीति[2] दिक्षु[3] लिखितामिवोत्कीर्णामिव[4] चक्षुषि नि-खातामिव हृदये प्रियतमामाजुहाव। ततस्तत्रैव शय्यातले [5]निमीलितनयनो निषिद्धाशेषपरिजनो[6] दत्तकपाटः परि-

---

मयि विद्यमानायां मत्सम्बन्धात् प्राप्तायामत्यासक्तिरस्येति मेऽर्थ-लम्। सतां माने म्लाने मरणमथवा दूरगमनमिति। मुमुचे मुक्तः। स इति शेषः। विबुद्धस्तु जागरितस्तु विषसरसीव दुर्ज-नवचसीव निमग्नमात्मानं धारयितुं सावधानतया व्यवहारे प्रवर्तयितुं न शशाक।

चक्षुःप्रीतिरित्यादिदशावस्थासून्मादावस्थां वर्णयति। क्षणं तावत्कालमाकाशतलमालिङ्गन्। आकाशतलालिङ्गनेन मोह-वशात् परितो दृश्यमानायाः प्रियतमाया आलिङ्गनं लक्ष्यते। अतएवाग्रे क्व गच्छसि प्रियतम इत्याद्युक्तम्। प्रसारितबाहुः। एह्येहीति सम्भ्रमे द्विलम्। प्रियतमे क्व गच्छसीति दिक्षु लि-खितामिव। चक्षुष्युत्कीर्णामिव विक्षिप्तामिव। कॄ विक्षेपे। हृदये निखातामिव प्रियतमामाजुहाव।

ततस्तत्रैव शय्यातले निमीलितनयनो निषिद्धाशेषपरिजनो

---

१ + मामनुगच्छ A B F G २ मा गच्छ मा गच्छेति D ३ + विदिक्षु A B D E F G H + दिक्षु C ४ + -द्विर्मामिव मभमि प्रिय- D ५ निमीलितो A B C E ६ -शेषजनदर्शनो D

हृतताम्बूलाहारादिसकलोपभोगस्तद्दिनमनयत्। तथैव निशामपि [1]स्वप्नसमागमेच्छाभिरनैषीत्।

अथ तस्य प्रियसखो मकरन्दो नाम[2] कथमपि लब्धप्रवेशः कन्दर्पसायकप्रहारपरवशं कन्दर्पकेतुमुवाच। सखे [3]किमि-

---

निवारितसकलसेवकवर्गो दत्तकपाटः। परिहृतताम्बूलादिसकलोपभोगः। व्यग्रत्वादिति भावः। तथाच भारविः।

आतपे धृतिमता सह वध्वा यामिनीविरहिणा विहगेन।
सेहिरे न किरणा हिमरश्मेर्दुःखिते मनसि सर्वमसह्यम्॥

इति। तद्दिवसमनयत्। कपाटमररं तुल्ये इत्यमरः। तथैव पूर्वोक्तप्रकारेणैव तस्याः स्वप्ने समागमस्तस्येच्छाभिर्निशामप्यनयत्।

अथ तादृगवस्थोत्तरं तस्य कन्दर्पकेतोः प्रियसखो मकरन्दो नाम कथमपि कपाटविघटनादिमहाक्लेशाल्लब्धप्रवेशः। कन्दर्पसायकपरवशान्तःकरणं कन्दर्पकेतुमुवाच। प्रियसख इत्यच राजाहःसखिभ्यष्टजिति समासान्तष्टच्।

सखे किमिदमसाम्प्रतमनुचितमसाधुजनोचितमध्यानं व्यवहारमाश्रितोऽसि। सन्तस्तव प्रज्ञामत्वयोरतिभ्रमेरेतच्चरितमालोक्य वितर्कदोलासु संशयदोलासु निवसन्ति। संशयिता भवन्तीति भावः।

---

१ स्वप्नदर्शनसमा॰ A B F G २ मकरन्दः कथं A B G ३ कि॰ ॰अनोचितं माचि॰ A B कि॰ ॰अनोचितं चरितमाचि॰ C D E F G H

दमसाम्प्रतमसाधुजनोचितमध्वानमाश्रितोऽसि [1]तवैतच्चरितमालोक्य वितर्कदोलासु [2]निवसन्ति सन्तः खलाः [3]पुनस्तद्निष्टमनुचितमेवावधारयन्त्यनिष्टोद्भावनरसोत्तरं हि खलहृदयं[4] को नामास्य तत्त्वनिरूपणे समर्थः।

तथाहि भीमोऽपि न वकद्वेष्याश्रयाशोऽपि[5] मातरिश्वातिकटु-

काव्यलिङ्गेनाह। खलाः पुनस्तदनिर्वाच्यमनिष्टमेवावधारयन्ति निश्चिन्वन्ति। अनिष्टोद्भावनेऽनभिमतप्रकाशने यो रसोऽनुरागस्तदुत्तरं प्रधानं यस्य तादृक्। अस्य खलस्य।

भीमोऽपि युधिष्ठिरानुजोऽपि वकद्वेषी वकद्वेष्टा नेति विरोधः। भीमो भयानकोऽपि नवकान् स्तुत्यान् द्वेष्टि तादृक्। अपिरर्थे। इत्यविरोधः। णू स्तवने। आश्रयाशो वह्निरपि मातरिश्वा वायुरिति विरोधः।

स्पर्शनः स्पर्शनो वायुर्मातरिश्वा सदागतिः।

इत्यमरः। आश्रयमश्नाति तादृशः। यमाश्रयति तस्यैव भक्षक इत्यर्थः।

आश्रयाशो कृतवहे भवेदाश्रयनाशके।

इति विश्वप्रकाशः। मातरि जनन्यां तत्सदृशे पोषके। श्वा कुक्कुरः। अनुचिताचरणत्वात् तत्सदृश इति भावः। इत्यविरोधः।

---

१ तव चैतच्च E G २ विशन्ति A E ३ पुनस्तद्- A B ४ + भवति C D E H ५ + न पावको मातरिश्वा न पवमानोऽतिकटुरपि A B + न पावकोऽपवमानोऽपि मातरि- H

रपि महारसः सर्पपस्नेह इव करयुगललालितोऽपि शिरसा धृतोऽपि न [1]कटुत्वं [2]जहाति तालफलरस इवापातमधुरः परिणामविरसस्तिक्तश्च पादपराग इवावधूतो[3] मूर्धानं कषाययति विपतरुप्रसव इव यथा यथानुभूयते तथा तथा मोह-

---

अतिकटुर्महारसः। अतिकटोर्महारसत्वं विरोधः। अतिकटुरतिकटुप्रकृतिर्महांश्चासावरसश्चेति महारसः। सर्पपस्नेह इव करयुगललालितोऽपि शिरसा धृतोऽपि पादप्रणामादिना। पक्षे। अधिकरणस्य करणत्वेन वर्णनम्। शिरसि धृतोऽपि कटुत्वं न जहाति। काटवमिति पाठस्त्वसभ्यत्वात्कलादुपेक्ष्यः।

तालफलरस इवापातमधुरो भोजनप्रारम्भ एव मधुरः परिणामविरसस्तिक्तश्च। पक्षे। पातो दोषस्तमभिव्याप्यापातं मधुरः। हिताभासाचरणेन मधुरः। परिणामे दोषज्ञानोत्तरं विरस उदासीनः। तिक्तः प्रतिजनं मर्मप्रकाशकः। पादपराग इव चरणरेणुरिवावधूतः क्षिप्तस्तिरस्कृतश्च। मूर्धानं शिरः कषाययति धूसरयति पीडयति च।

परागः कौसुमे रेणौ स्नानीयादौ रजस्यपि।
पादः पदङ्घ्रिश्चरणोऽस्त्रियाम्। मूर्धा ना मस्तकोऽस्त्रियामिति चिश्वमरः।

विपतरुप्रसव इव यथा यथानुभूयते सेव्यते तथा तथा मोहमेव मूर्च्छां वैचित्त्यं वा दृढयति स्थिरीकरोति। नीचदेवस्तेव

---

[1] काटवं B C D E F G H [2] त्यजति G [3] + अपि C D E F H

मेव द्रढयति न वारिविरहोऽस्य[१] जायते नीचदेशस्येव निदाघदिवस इव बद्धमत्सरो वहति तापं[२] सुमनसामन्धकार[३] इव दोषानुबन्धचतुरो[४] [५]विश्वकर्मावलेपनोद्यतस्य विरूपाक्षो-

---

निम्नभूभागस्येव वारिविरहो जलविरहो न जायते। पक्षे। अव्ययानामनेकार्थत्वाद्वाशब्द एवार्थे। न वा नैवास्य खलस्यारिविरहः शत्रुविरहो जायते। सर्वनाशोद्यतत्वादिति भावः।

रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः।

इत्यमरः। निदाघदिवस इव ग्रीष्मर्तुदिवस इव बद्धमत्सरो बद्धमक्षिकः। सुमनसां पुष्पाणां तापं वहति।

मक्षिका मत्सरा ज्ञेया भ्रमराली च सा मता।

इत्युत्तरतन्त्रम्।

मत्सरः कृपणे काये मक्षिकासु च मत्सरः।

इति धरणिः। स्त्रियः सुमनसः पुष्पम्।

निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः।

इति द्वयोरमरः। पक्षे। बद्धमत्सरो बद्धमात्सर्यवान् क्रोधी वा। सुमनसां शुद्धान्तःकरणानाम्। मत्सरोऽन्यशुभद्वेष इत्यमरः। क्वचित् क्रोधोऽपि मत्सर इति रत्नकोशः।

अन्धकार इव दोषा रात्रिस्तस्या अनुबन्धे चतुरः। विश्वकर्मादित्यस्तस्यावलेपनमग्लानं तदोद्यतः।

---

१ ०स्यक E H २ भवन्ति A B C D F G ३ ०मन्धकार F ४ ०बन्धं करोति D ५ विश्वकर्मविलो० B H इति क्व० पा०। विश्वकर्मावलेपोद्यतस्य D

पि चक्रधर शक्राश्व इवोच्चै श्रवा नदेशजप्रशसी च शरस्येव
¹विभिन्नस्यापि सत स्नेहं दर्शयतोऽपि तक्राट इव हृदयं

विश्वकर्मा देवशिल्पी विश्वकर्मा दिवाकर ।

इत्युत्तरतन्त्रम्। पचे। दोषस्यानुबन्ध आरोपे चतुर । विश्वेषा कर्म क्रिया तस्या अवलोपन छेदन तत्रोद्यत । विरूपाच शिव-शक्रधरो विष्णुरिति विरोध । विरूपाचो विषमव्यवहार । चक्रधरो दम्भभेदधर ।

अचो ज्ञानार्थशकटव्यवहारे च पाशके ।

इति मेदिनीकार ।

जनावने समूहे च दम्भभेदरथाङ्गयो ।
शस्त्रभेदे च सेनाया चक्र चापि विहङ्गके ॥

इति रन्तिदेव । इति परिहार ।

शक्राश्व इवेन्द्राश्व इवोच्चै श्रवा उच्चै श्रव सञ्ज्ञक । इय उच्चै श्रवा इतीन्द्रप्रकरणेऽमर । नदेशात् समुद्राज्जातस्तादृश-स्तासो प्रशसावांस्तथाभूत । पचे। उच्चै श्रवा वधिर । पर-कीयकार्यश्रवणे देशजान् प्रशसितु शीलमस्य तादृशो न भवति तथाविध । शरस्येव दध्यग्रभागस्येव विभिन्नस्यापि सङ्गतस्यापि सत साधोर्विद्यमानस्य च स्नेहमनुराग चैक्कण्य दर्शयतोऽपि त-क्राट इव मन्थान इव हृदय विलोडयति। शरो दध्यग्रभाग स्यादिति रत्नकोश । भिन्नो दारितसङ्गताविव्यमर ।

---

¹ विभिन्न A B C F H भिन्न D

विलोडयति यत्त्वबलिरिवात्मघोषमुखरो मण्डलभ्रमणकथकश्च मत्तमातङ्ग इव स्ववशालोलमुखोऽधरीकृतदानश्च वृषभ इव सुरभियानविकलः कामीव गोत्रस्खलनविधुरो वामाध्वा-

---

स्नेहोऽनुरागस्यैक्षणं तैलेऽपि च निगद्यते।

इति धरणिः।

वैशाखो दधिचारः स्यात् तक्राटकरघर्षणौ।

इति हारावली।

यत्त्वबलिरिवात्मघोषेण काकेन मुखरः काकशब्देन सशब्दः। मण्डलभ्रमणं कुक्कुरभ्रमणं तत्कथकस्तत्सूचकः।

ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि।

इत्यमरः।

कौलेयकः सारमेयो मण्डलः श्वा गतत्रपः।

इति व्याडिः। पक्षे। आत्मघोषेणात्मश्लाघया मुखरः। मण्डले देशादौ भ्रमणं तत्कथकः। मत्तमातङ्ग इव स्ववशायां निजकरण्यामालोलं मुखं यस्य सः। अधरीकृतदानः। मदजलस्यातिवर्षणादधरीकरणम्। पक्षे। सुष्ठुवशमवाच्यवाचित्वादालोलं मुखं यस्य सः। अधरीकृतं दानं वितरणं येन।

वृषभ इव सुरभेर्गोर्यानेन गमनेन विकलो विह्वलस्तदनुधावनेन वा विह्वलः। पक्षे। सुरभिया देवभयेन न विकलः। भीतिर्भीः साध्वसं भयमित्यमरः। कामीव गोत्रस्खलनं नामस्खलनं तेन विधुरः। वामानां स्त्रीणामध्वा मार्गस्तत्रानुरक्तः।

नुरक्तस्याजीर्णविकार इव कलेवरे वचसि मन्दिमानमावहति वञ्चक इव [1]कटपले [2]रक्तो विभावरीरक्तश्च परेत इव

प्रतीपदर्शिनी वामा वनिता महिला तथा।

गोत्रं तु नाम्नि चेत्युभयत्रामरः। पक्षे। गोत्रस्खलनं वंशजस्खलनम्। वामाख्या विपरीताचरणम्। वामौ वल्गुप्रतीपौ चेत्यमरः। अजीर्णविकार इव कलेवरे शरीरे वचसि वचने मन्दिमानमावहति। अथ कलेवरम्। गात्रं वपुः संहननमित्यमरः। पक्षे। कलेऽव्यक्तमधुरे वरे श्रेष्ठे वचसि वचने मन्दिमानमावहति वाचाट इति भावः।

वञ्चक इव शृगाल इव श्वेव वा कटपले मृतमांसे रक्तः। विभावर्यां रात्रौ रक्तश्च। शृगालवञ्चकक्रोष्टु-। विभावरीतमस्विन्यौ रजनीत्युभयत्रामरः।

प्रतारकचौरेषु वञ्चकः परिकीर्तितः।

इति शाश्वतः।

कटः समयबन्धेऽपि तृणेऽपि मृतकेऽपिच।

इति विश्वः।

पलः प्रतारणे काले शय्यामांसे पलं मतम्।

इति धरणिः। पक्षे। कटे समयबन्धे पलः प्रतारणं तस्मिन् रक्तः शपथपूर्वकप्रतारक इति भावः।

---

१ कटफले D इति ज्ञग० च नर० च। २ रक्तो II

L 2

बन्धुतापदर्शनः परशुरिव भद्रश्रियमपि खण्डयति कुद्दाल इव [1]दलितगोत्रः क्षमाभाजः प्राणिनो [2]निकृन्तति[3] रत-

---

विभौ स्वामिन्यरिः शत्रू रक्तो धनलोभादिना। अरी रक्त इत्यत्र रो रीति लोपे ढ्रलोप इति दीर्घः।

समयाः शपथाचारकालसिद्धान्तसंविदः।

इत्यमरः।

परेत इव बन्धुताया बन्धुसमूहस्यापगतं दर्शनं यस्य।

ज्ञातेयं बन्धुता तेषां क्रमाद्भावसमूहयोः।

इत्यमरः। ग्रामजनबन्धुभ्यस्तलिति तल् प्रत्ययः। पक्षे। बन्धून् तापयति तादृशं दर्शनं यस्य।

परशुरिव भद्रश्रियं चन्दनं खण्डयति। भद्रश्रीश्चन्दनो-ऽस्त्रियामित्यमरः। पक्षे। भद्रं कल्याणम्। श्रियं लक्ष्मीम्। शिवं भद्रं कल्याणं मङ्गलं शुभमित्यमरः। यद्वा भद्रश्रियं साधु-सम्पदम्।

सश्रीके चन्दनेऽपि स्याद्भद्रश्रीः साधुसम्पदि।

इति धरणिः।

कुद्दाल इव दलिता गोत्रा पृथ्वी येन। क्षमां पृथ्वीं भजन्ति तादृशान् प्राणिनो वृक्षादीन् निकृन्तति छिनत्ति। वृक्षादीनां प्राणित्वं भवेरहिंसार्थस्य नेति वार्तिके भाकरे स्पष्टम्। कुदा-

---

१ भिद्- D H * २ निष्कृन्तति A B D। ३ + लौकिकं A B G H

कील इव जघन्यकर्मलग्नो[1] ह्रेपयति साधून् दुष्टशूर्पश्रुति-
रिव काननरुचिरनुगतमपि [2]यवसं ततं नानुमोदते। अत्री-

रीति भाषायाम्। पक्षे। दलितगोत्रो नाशितवंशजः। क्षमा-भाजः शान्तियुतान् प्राणिनो मनुष्यान्। चितिक्षान्त्योः क्षमेत्यमरः।

रतकील इव कुक्कुर इव जघन्यकर्मलग्नो मार्ग एव सुरतादौ प्रवृत्तः। ह्रेपयति साधून्। कुक्कुरो रात्रिजागरः।

रसनालिट् रतपराः कीलशायिमृगान्दुकाः।

इति हेमचन्द्रः। रतपरा रतशब्दात् पराः कीलादयः। तथाच रतकीलादयश्चत्वारः शब्दा इति कोशार्थः। पक्षे। जघन्यकर्म नीचकर्म।

दुष्टशूर्पश्रुतिरिव दुष्टगज इव कानने वने रुचिर्यस्य। अनुगतम्। ततं विस्तृतम्। यवसं तृणम्। नानुमोदते। द्विपायि-शूर्पश्रुतिकुम्भिसामजा इति हारावली। यवसं तृणमर्जुन-मित्यमरः। पक्षे। केषदाननरुचिर्वदनकान्तिर्यस्य। ईषदर्थे चेति कादेशः। लोकानां धिक्काराद्धीनकान्तिरिति भावः। अनुगतमपि यवसं दत्तं ततं वीणादिवाद्यं च नानुमोदते। यवसो दत्तघासयोः।

ततं वीणादिवाद्येऽपि विस्तारेऽपि ततं मतम्।

इत्युभयत्र विश्वः।

---

१ -लग्नो D २ कान सतत B C F

जादेव जायन्तेऽकाण्डादेव प्ररोहन्ति[1] खलव्यसनाङ्कुरा दुरुच्छेदा[2] भवन्त्यसतां हि[3] हृदि प्रविष्टो दोषलवः करालायते। सतां तु [4]हृदि न [5]विशत्येव[6] यदि [7]कदाचिद्विशति[8]

खलव्यसनाङ्कुरा अबीजादेवाकारणादेव जायन्ते। अकाण्डादेवाप्रस्तावादेव प्ररोहन्ति। अतएव दुरुच्छेदा भवन्ति। यो हि बीजाज्जायते काण्डात् स्कन्धात् प्ररोहति स सूच्छेदो भवति मूर्तत्वादिति भावः। हेतुर्ना कारणं बीजम्। अस्त्री प्रकाण्डः स्कन्धः स्यादित्युभयत्रामरः।

असतां हृदि प्रविष्टो दोषलवः करालायते भयावहो भवति। सतां हृदि तु न विशत्येव। दोषलव इति शेषः पूर्वोत्तरयोरपि। यदि कदाचिद्विशति। पारद इव क्षणमात्रमपि नावतिष्ठते। रसः सूतश्च पारद इत्यमरः। हृदय इति शेषः।

अथ यदि वदति किमर्थमुपदिशसि। असदृशं वा न तमुपदेशमुरीकरोमीति तत्राह। माधवः सन्तो मृगा इव हरिणा इव विनोदबिन्दोर्विनोदवेदितुर्मृगरमणपटोः पुंसः श्रवणेनाकर्णनेन वशगा भवन्ति। ज्ञाता तु विदुरो विन्दुरित्यमरः। वीणा श्रूयते मृदङ्गः श्रूयत इत्यादौ तद्ध्वनिवत् पुंसः श्रवणेन तद्गीतश्रवणं लक्ष्यते। तथाच माघः।

---

१ -मम् प्रसरन्ति A B C F G प्रभवन्ति D H २ -द्या A B -दाश्च D ३ पुमर् D ४ —हृदि C D F H ५ प्रवि- A B F G ६ + भूयो A B C F G + भूयोऽपि H ७ कथमपि A B C D F G H ८ + तदा C D E F G H

पारद[१] इव [२]क्षणमात्रमपि [३]नावतिष्ठते साधवो मृगा इव विनोदबिन्दोः [४]श्रवणवशगाः सुखं जनाः [५]शरत्समया इव भवादृशा [६]मित्रस्य हृदयं हरन्ति न च सचेतना[७] विसदृशमुपदिशन्त्यचेतनानामपि मैत्री [८]समुचितपक्षे[९] निक्षिप्ता। तथा-

---

अश्रावि भूमिपतिभिः क्षणवीतनिद्रै-
रश्नन् पुरो हरितकं मुदमादधानः।
ग्रीवाग्रलोलकलकिङ्किणिकानिनाद-
मिश्रं दधद्दशनचर्वुरशब्दमश्वः॥

इति। पक्षे। विनोदबिन्दोर्ज्ञातुः। आख्यातोपयोग इति पञ्चमी। श्रवणेन समुपदेशश्रवणेन वशगास्तदधीनास्तादृशाः शरत्समया इव भवादृशा जनाः सुखं जनयन्ति। पिण्डीमित्यादौ भक्षणादिक्रियाक्षेपवत् सुखमित्यनेन जननक्रियाक्षेपः। अतएव मित्रस्य हृदयं हरन्ति। पक्षान्तरे। शरत्समयाः सुखञ्जनाः शोभनाः खञ्जना येषु तादृशाः। खञ्जरीटस्तु खञ्जन इत्यमरः। सचेतना मित्रस्येति शेषः। विसदृशमयोग्यं नोपदिशन्ति। अचेतनानामपि मैत्री समुचितपक्षे योग्यपक्षे निक्षिप्ता तर्हि सचेतनमैत्र्याः का कथेति भावः। समानशील-

---

१ + -विष्ड D २ क्षणमपि A B C D F G H ३ न तिष्ठति A B C F G H ४ श्रवणवशगा A B H नवशगा C E श्रवशगा D इति काश० च। ५ शर-दागमा D इति नर० च। ६ इति नर० च। सुखमावहन्ति A D —मित्रस्य हृदय C D E H इति काश० च। ७ सचेतसो D इति नर० च। ८ समुचिता भवति इति नर०। ९ -पक्षनि C D E F H

हि माधुर्यशैत्यशुचित्वसन्तापशान्तिभिः पयः पय इवेति[1] मित्रतामुपगतस्य[2] दुग्धस्य [3]तत्सङ्गमादर्धितस्य[4] क्राथेन[5] ममैव पुरो युक्तः क्षय इति विचिन्त्येव वारिणापि[6] क्षीयते। तदिदमसाम्प्रतमाचरितं[7] सखे गृहाण साधुजनोचितमध्वानं सा-

---

व्यसनेषु सख्यमितीममर्थं द्योतयन्नुभयसाधारणानि विशेषणान्याह। माधुर्येत्यादि।

माधुर्यशैत्यशुचित्वसन्तापशान्तिभिर्गुणैः पयो जलं पय इव दुग्धमिवेति मित्रतामुपगतस्य तत्सङ्गाद्दुग्धसङ्गादर्धितस्य बहुमूल्यतामापन्नस्य पुरः पूर्वं ममैव क्षयो युक्त इति विचार्य वारिणा क्षीयते। भावे प्रत्ययः। मीलितालङ्कारोऽत्र।

समेतलक्षणा वापि वस्तुना यन्निगूह्यते।
निजेनागन्तुना वापि तन्मीलितमिति स्मृतम्॥

इति लक्षणात्।

तत् तस्मादिदमाचरितमसाम्प्रतमयुक्तम्। सखे साधुजनोचितमध्वानं व्यवहारं गृहाण। साधवो हि दिङ्मोहात् परं खेदसमुत्पथप्रवृत्ता उन्मार्गप्रवृत्ता भवन्ति न तत्सङ्गव्यवहार इत्यर्थः। इत्यादि तस्मिन् मकरन्दे वदति सति। स्मरशर-

---

१ पय इति A B C D H इति नास्ति च मत० च। २ ०तामुपेतस्य D H ३ स्माद A B C D E F H इति नास्ति च। ४ ०दभिवर्धितस्य A B E G वृद्ध धितस्य D ५ क्राथे C D E G ६ वारि इति अस०। + प्रथम A B ७ + स यता A B G

धवो हि दिङ्मोहात् परमुत्पथप्रवृत्ता' भवन्तीत्यादि वदति तस्मिन् कथमपि स्मरशरनिकरप्रहारपरवशः परिमिताक्षरमुवाच 'कन्दर्पकेतुः। वयस्य दितिरिव शतमन्युसमाकुला भवति 'मनोवृत्तिः। नायमुपदेशकालः" पच्यन्त इवाङ्गानि'

निकरप्रहारपरवशः कामबाणव्यथाव्याकुलः। कथमपि महाक्लेशात् परिमिताक्षरमुवाच।

वयस्य मम चित्तवृत्तिर्दितिरिव दैत्यजननीव शतमन्युसम्बन्धेन समाकुला व्याकुला भवति। पक्षे। शतसङ्ख्याका मन्यवस्तैः समाकुला शाकपार्थिवादिः। दितेर्गर्भनाशाय दितिप्रमादाद्दितिगर्भं प्रविष्टः शक्र एकं गर्भं सप्तधा विभज्य सप्तधा विभक्तं प्रतिव्यक्ति सप्तधा बभञ्जेति। त एवोनपञ्चाशद्वाता बभूवुरिति पुराणे प्रसिद्धम्। शतमन्युर्दिवस्पतिः। मन्युशोकौ तु शुक् [illegible]

क्षथ्यन्त इवेन्द्रियाणि भिद्यन्त[1] इव मर्माणि [2]निःसरन्तीव प्राणा उन्मूल्यन्त[3] इव विवेका नष्टा[4] स्मृतिः। तदधुना यदि त्वं[5] [6]सहपांशुक्रीडनसमदुःखसुखोऽसि तदा मामनुगच्छेत्युक्त्वा [7]परिजनालक्षितस्तेन सह [8]नगरान्निर्जगाम।

अनन्तरं कतिपयनल्वशतमध्वानं गत्वागस्त्यवचनसंहृत-

भवन्तीत्यर्थः। प्राणा निःसरन्तीव। विवेका उन्मूल्यन्त इव। उत्पाट्यन्त इव। स्मृतिर्नष्टा। मागधी रीतिरत्र। ततोऽधुना यदि पांशुक्रीडने समदुःखसुखः। एतेन बालसखत्वं ध्वनितम्। राजकुमाराणामेतादृक्क्रीडासम्भवेऽपि लोकप्रवादानुकरणम्। तेन लोकोक्तिरलङ्कारोऽत्र।

लोकप्रवादानुकृतिर्लोकोक्तिरिति भण्यते।

इति लक्षणात्। तदा मामनुगच्छेत्युक्त्वा परिजनेनालक्षितस्तेन मकरन्देन सह नगरान्निर्जगाम।

अनन्तरं नगराद्बहिर्गमनोत्तरं कतिपयनल्वशतं तावत्परिमितमध्वानं मार्गं गत्वा ताभ्यामिति शेषः। विन्ध्यो नाम गिरिरदृश्यतेति सम्बन्धः। किष्कुर्हस्ते वितस्तौ च। नल्वः किष्कुचतुःशतम्। इत्युभयत्रामरः।

अगस्त्यवचनेन संहृतं ब्रह्माण्डगतं शिखरसहस्रं येन सः। कूटोऽस्त्री शिखरं शृङ्गमित्यमरः।

---

१ भिद्यन्त A B C F G H २ नि सरन्त इव A B ३ उन्मथ्यन्त H ४ नष्टेव D ५ + मया D E F G H इति क्वा० च। ६ सह० -क्रीडित C D H इति क्वा० च। ७ परिजनानुपलक्षित A B F G ८ पुरा० A B C H

[1]ब्रह्माण्डगतशिखरसहस्रः [2]कन्दरान्तरालतागृहसुखे[3]-
[4]सुप्तविद्याधरमिथुनगीताकर्णनसुखितचमरीशतमारणोत्सुकि-
[5]तशबरशतसम्बाधकच्छः कटककरिकराकृष्टभग्नस्यन्दमा-

अनुप्रासनाह। कन्दरा दरी तदन्तराले लतागृहं तत्र सुखेन सुप्तानि विद्याधरमिथुनानि तेषां गीतं गानं तदाकर्णनेन सुखितं चमरीणां मृगभेदस्त्रीणां शतं तन्मारणोत्सुकितं शबरशतं तेन सम्बाधः सङ्कटः कच्छस्तटो यस्य सः। दरी तु कन्दरो वा स्त्री।

निषादश्वपचावन्तेवासिचाण्डालपुक्कसाः।
भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः।
गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगाः।
सङ्कटं ना तु सम्बाधः कलिलं गहनं समे।

इति पञ्चस्वमरः। कूलं प्रतापः कच्छरोधसी। तटं तीरं प्रतीरं चेति हैमः। कच्छालिरिति भाषायाम्।

कटकेऽद्रिनितम्बे करिकरैर्हस्तिशुण्डाभिराकृष्टान्यतएव भग्नान्यतएव स्यन्दमानानि प्रस्रवमाणानि हरिचन्दनानि तेभ्य

---

१ ब्रह्माण्डखण्ड- A C G H इति सम० च। ब्रह्माण्डखण्डन- D इति मर० च। ब्रह्माण्डकाण्ड E २ कन्दरान्तरगतलता- A B F कन्दरान्तरलता- C D ३ -गृहसुखप्रसुप्त- A C D F G -गृहसुप्त- B ४ सुप्तप्रबुद्धविद्याधर- D सुप्त० -जीवमानगीता- D सुप्त० -चमरीशत- A B C F H सुप्त० -चमरशत D० ५ शकिरातशत- A B

न्दहरिचन्दनामोदवाहिगन्धवाहशिशिरितशिलातलः सुदूरपतनभग्नतालफलरसार्द्रकरतलास्वादनोत्सुकशाखामृगः[1] प्रल-[2]म्बमाननिर्झरोपविष्टजीवञ्जीवमिथुनलेलिह्यमानविविधफल-

---

आमोदोऽतिनिर्हारिगन्धस्तद्वाही गन्धवाहो वायुस्तेन शिशिरित शिशिरवदाचरित शिलातल यत्र सः। कटकोऽस्त्री नितम्बोऽद्रेः। आमोदः सोऽतिनिर्हारी। गन्धवाहानिलाशुगाः। सुषीमः शिशिरो जड.। तुषारः शीतलः शीतः।

पञ्चैते देवतरवो मन्दारः पारिजातकः।

सन्तान. कल्पवृक्षश्च पुंसि वा हरिचन्दनम्॥

इति पञ्चस्वमर'। हस्तिनासा करः शुण्डा हस्त इति हैमः। स्यन्दू प्रस्रवणे।

सुदूरपतनेन भग्नानि तालफलानि तेषां रसेनार्द्रयोः करतलयोरास्वादनेन लेहनेनोत्सुकाः शाखामृगा वानरा यत्र स.। वृणराजाह्वयस्ताल'। शाखामृगवलीमुखाः। मर्कटो वानरः कीश इत्युभयत्रामरः।

प्रलम्बमानान्यतएव निर्झरेषूपविष्टानि यानि जीवञ्जीवमिथुनानि चकोरमिथुनानि तैर्लेलिह्यमानानि पुनः पुनरास्वाद्यमानानि तादृशानि च तानि विविधफलानि तेषां रसामोदेन सुरभित. परिसरः प्रान्तदेशो यस्य। लेलिह्यमानेति

---

१ -शगकदम्ब A B C E F G इति नग॰ च मर॰ च। शगकदम्बक D H
२ म्बमाननिर्झरचरणविशेष C म्बमाननिर्झरशिखरोपान्तोप D

रसामोदसुरभितपरिसरः सरभसकेसरिसहस्रखरनखर[1]-धाराविदारितमत्तमातङ्गकुम्भस्थलविगलितमुक्ताफलप्रबलि[2]-तशिखरतया शिरोलग्नं तारागणमिवोद्वहन् सुग्रीव इव

यङ्लुगन्तात् कर्मणि शानच्। जीवञ्जीवश्चकोरकः। पर्यन्तभूः परिसर इत्युभयत्रामरः।

सरभस सवेगं केसरिसहस्रस्य सिंहसहस्रस्य खरनखरधारया विदारितानि मत्तमातङ्गकुम्भस्थलानि तेभ्यो विगलितानि मुक्ताफलानि तैः प्रबलितशिखरतया शिरोगतं तारागणमिव नक्षत्रसमूहमिवोद्वहन्। हर्यक्षः केसरी हरिः। नखोऽस्त्री नखरोऽस्त्रियाम्। नक्षत्रमृक्षं भं तारेति त्रिष्वमरः।

पुनः श्लेषेणाह। सुग्रीव इव। ऋक्षो जाम्बवान् गवयः शरभः केसरी कुमुद एतत्प्रभृतिभिर्वानरैः सेव्यमानपादच्छायः। ते च रामायणे।

गजो गवाक्षो गवयः शरभो गन्धमादनः।

इति। पक्षे। ऋक्षो भल्लूकः। गवयो वनगवः। शरभः कुञ्जरद्विट्। केसरी सिंहः। कुमुदं कैरव दिग्गजो वा। तैः सेव्यमाना पादानां प्रत्यन्तपर्वतानां छाया यस्य सः। ऋक्षाच्छभल्लभल्लूकाः। पादाः प्रत्यन्तपर्वताः। इत्युभयत्रामरः।

---

१ खरतरनखर D २ फलपटलान्वित D रा॰ -फलप्रकरश॑त A B C D II -फलविगलित E

[1]ऋक्षगवयशरभकेसरिकुमुदसेव्यमानपादच्छायः[2] पशुपतिरिव नागनिःश्वाससमुत्क्षिप्तभूतिर्जनार्दन इव विचित्रवनमालः सहस्रकिरण इव सप्तपत्रस्यन्दनोपेतो[3] विरूपाक्ष इव

गवयः स्यादनगवो गोमदृशोऽश्ववारणः।

शरभः कुञ्जरारातिरुत्पादकोऽष्टपादपि।

इत्युभयत्र हैम'।

कपीन्द्रः कुमुदः कोऽपि कुमुदः कोऽपि दिग्गजः।

इति शाश्वतः।

पशुपतिरिव शिव इव नागनिःश्वासेन सर्पनिःश्वासेन समुत्क्षिप्ता भूतिर्भस्म यस्य सः। पक्षे। नागनिःश्वासेन गजनिःश्वासेन समुत्क्षिप्ता भूतिः सम्पत्तिर्यस्य स.। यद्वा। नागानां निधिस्थागस्थितसर्पाणां निःश्वासेनेत्यादि।

जनार्दन इव विष्णुरिव विचित्रा वनमाला यस्य सः।

आपादपद्मं या माला वनमालेति सा स्मृता।

इति शाश्वतः। पक्षे। विचित्रा वनमाला वनपरम्परा यस्य स।

सहस्रकिरण इव सूर्य इव सप्त पत्राणि वाहनानि यस्मिन् तादृशो रथो यस्य। पत्रं वाहनपक्षयोरित्यमरः। पक्षे। सप्तपत्रो विषमच्छदः। स्यन्दनस्तिनिशः। सप्तपर्णो विशालत्वक्। तिनिशे स्यन्दनो नेमिरित्युभयत्रामरः।

---

१ ऋक्षगवयशरभकेसरिकुमुदसेव्यमानपादच्छाय D २ पादच्छाय B C इति ज्ञात० च। ३ सप्तपत्रकुम्भोपेतो E

सन्निहितगुहः [1]शिवानुगतश्च कामीव कान्तारोपरसानुगतः समदनश्च श्रीपर्वत इव सन्निहितमल्लिकार्जुनो नरवाहनदत्त

विरूपाक्ष इव शिव इव सन्निहितो गुह: कार्तिकेयो यस्य स. । शिवया पार्वत्यानुगतश्च । पक्षे । संनिहिता गुहा गह्वरं यस्य स: । शिवाभिर्धीवोभि: क्रोष्टीभिरनुगतश्च ।

शिवा गौरी शिवा क्रोष्टी भवेदामलकी शिवा ।

इति शाश्वत. । देवखातबिले गुहा । गह्वरम् । शिवा गौरी फेरवयोरित्युभयत्रामरः ।

श्रीपर्वत इव सन्निहितो मल्लिकार्जुनो यस्य । मल्लिकार्जुनो नाम हरः । पक्षे । सन्निहितौ मल्लिकार्जुनौ यस्य ।

दण्डशून्ये मल्लिकायां त्रिपु स्यात् केतकीफले ।

इति विश्वमेदिन्यौ ।

नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुन. ।

इत्यमरः ।

कामीव कामुक इव कान्तानां रोपरसाभ्यामनुगत. । समदनश्च । पक्षे । कान्तारमूपरसाभ्यामनुगतः । समदनः सधत्तूरः । धत्तूरः कनकाह्वयः । मातुलो मदनश्च । कान्तारं वर्त्म दुर्गमम् । अथवामूपरौ दावणव्यलिङ्गाविति त्रिष्वमरः ।

नरवाहनदत्तसनामको राजा तद्वत् प्रियङ्गुश्यामया तन्नामकस्त्रिया सनाथ. । पक्षे । प्रियङ्गुः फलिनी । श्यामा रोच-

---

१ शिवानुगतश्च १ B

इव प्रियङ्गुश्यामासनाथः शिशुरिव [1]कृतधात्रीधृतिर्वासरारम्भ[1] [2]इव गैरिकारुणप्रभापाटलितवनराजिः कृष्णपक्ष इव वकुलतागहनः कर्ण इवानुभूतशतकोटिदानो भीष्म इव शि-

---

नी। प्रियङ्गुः फलिनी फलीत्यमरः। त्रिभण्डी रोचनी श्यामेति च। श्वेतत्रिधारेति ख्याता।

शिशुरिव बालक इव कृता धात्र्या आमलक्या धृतिरवस्थानं येन। पक्षे। धात्र्युपमाता।

धात्री स्यादुपमातापि क्षितिरप्यामलक्यपि।

इत्यमरः।

वासरारम्भ इव गैरिकारुणप्रभया पाटलिता वनराजिर्वनपङ्क्तिर्यस्य। श्वेतरक्तस्तु पाटल इत्यमरः। अव्यक्तरागस्त्वरुण इति च। पक्षे। गैरिकवदरुणस्य सूर्यसूतस्य प्रभा तया। सूर्यसूतोऽरुणोऽनूरुरित्यमरः।

कृष्णपक्ष इव वकुलता कृष्णता तया गहनः। भावे तल्।

वकुलः कृष्णपक्षेऽग्नौ शितौ च वकुला गवि।

इति विश्वप्रकाशः। कोशे शितौ कृष्णे। पक्षे। वकुलताभिर्गहनः सान्द्रः। वल्ली तु व्रततिर्लतेत्यमरः।

कर्ण इवानुभूतं शतकोटीनां तत्संख्याकधनानां दानं येन-

---

[1] ॰कृतधा॰ A D F H' [2] -वृतिर्वासरारम्भ A B F [3] इवाचल A B C D F H इति अत्र॰ च भट॰ च। [4] ॰-प्रभया॰ A B

खण्डिमुक्तैरर्धचन्द्रैराचितः कामसूत्रविन्यास इव [1]मल्लनागघटितः कान्तारसामोदश्च[2] हिरण्यकशिपुरिव शम्बरकुलाश्रयो [3]गैरिकव्याजाद्रविरथमार्गमार्गणार्थमिवारुणेनोपास्य-

---

रणं येन। पक्षे। अनुभूतं शतकोटिना वज्रेण दानं येन। दो अवखण्डने। शतकोटिः स्वरुः शम्ब इत्यमरः।

भीष्म इव शान्तनव इव शिखण्डिमुक्तैरर्धचन्द्रैस्तदाकारैर्बाणैराचितो व्याप्तः। पक्षे। शिखण्डो बर्हं तदस्ति येषां ते शिखण्डिनो मयूरास्तैर्मुक्तैरर्धचन्द्रैरर्धमेचकाङ्कैः पक्षैः। अर्धचन्द्रेण तदाकारयुक्ता लक्ष्यन्ते। शिखण्डस्तु पिच्छबर्हे नपुंसके। समौ चन्द्रकमेचकाविति द्वयोरमरः।

कामसूत्रविन्यास इव मल्लनागेन मुनिविशेषेण। पक्षे। गजविशेषेण। घटितो रचितो युक्तश्च।

मल्लनागोऽभ्रमातङ्गे वात्स्यायनमुनावपि।

इति विश्वप्रकाशः। कान्तानां रसामोदौ शृङ्गारहर्षौ येन। पक्षे। कान्तारे दुर्गवर्त्मनि कानने वा सामोदोऽतिसुगन्धः।

हिरण्यकशिपुरिव शम्बरो दैत्यविशेषस्तत्कुलाश्रयः। पक्षे। शम्बरो हरिणविशेषो जलं वा द्रव्यं वा। रङ्कुशम्बररौहिषाः। नीरक्षीराम्बुशम्बरमित्युभयत्रामरः।

---

१ मल्लनाग- इति भट०। २ -रसामोदश्च A B ३ गैरिकव्याज- A C D E F इति भट० च। गै० -व्याजादुपरिरमणरवि- A B गै० -व्याजादुपरिरवि- C D E G H गै० -व्याजादुपरिद्वारवि- F

मानः शिखरगतसूर्याचन्द्रमस्तया विस्तारितलोचनोऽगस्त्यमार्गमिवोद्वीक्षमाणः स्रस्तान्त्रजाल[1] इव [2]जरदजगरभोगैः कुम्भकर्ण इव दन्तान्तरालगतवानरव्यूहः[3] [4]पिण्डालक्त-

अम्बरं सलिले वित्ते बौद्धव्रतविशेषयोः ।
अम्बरो दैत्यहरिणमत्स्यशैलजिनान्तरे ॥

इति विश्वप्रकाशः ।

गैरिकव्याजाद्रविरथमार्गस्य मार्गणार्थमन्वेषणार्थमिवारुणेनानूरुणोपास्यमानः । मृग अन्वेषणे ।

शिखरगतसूर्याचन्द्रमस्तया । देवताद्वन्द्वे चेत्यानङ् । विस्तारितलोचनो विकासितनेत्रोऽगस्त्यमार्गमुद्वीक्षमाण इव । यावदहमागच्छामि तावत् त्वमुपविशेत्युक्त्वा गतो मुनिरायाति न वेति मार्गावलोकनमिति पुराणप्रसिद्धम् ।

जरदजगरभोगैर्वृद्धशयुशरीरैः स्रस्तान्त्रजालो विगलितान्त्रसमूह इव । अन्त्रं पुरीतत् । इत्यमरः ।

तिलित्सः स्यादजगरे शयुर्वाहस इत्युभौ ।

इति च ।

कुम्भकर्ण इव दन्तान्तराले दशनान्तराले गतो वानरव्यूहो यस्य । पक्षे । दन्तः कटकः सानुतिर्यग्विनिर्गतः शिलाविशेषो वा । तदन्तरालगतवानरयूथः ।

---

१ -साल A B -शाल C E　२ अरदजगराभोगै D　३ दन्तान्तरालगतैर्वानरसमूहै C दन्तान्तरालगतैर्वानरव्यूहै D E G — समूहः F　४ पिण्डालककादि- A B C D G H.

करागाङ्कितपादपङ्क्तिसूचितसञ्चरितशचीपतिवारविलासिनी-
सङ्केतकेतकीमण्डपोऽकुलीनोऽपि सद्वंशभूषितो दर्शिताभ-
योऽपि मृत्युफलदायी सप्रस्थोऽप्यपरिमाणः सनदोऽपि निः-

दन्तो गिरिनितम्बे च दशने मानुषि स्मृतः।

इति विश्वः।

दन्तकास्तु बहिस्तिर्यक्प्रदेशान्निसृता गिरेः।

इति हैमः।

पिण्डीभूतमलक्तकं पिण्डालक्तकं तद्रागेणाङ्कितानां पादानां चरणानां पङ्क्तिभिः परम्पराभिः सूचितं सञ्चरितं सञ्चरणं येषु। भावे क्तः। तादृशाः शचीपतिवारविलासिनीनामुर्वश्यादीनां सङ्केतकेतकीमण्डपा यस्मिन् सः।

विरोधाभासेनाह। अकुलीनोऽपि निन्द्यगोत्रोऽपि सद्वंशेनोत्तमकुलेन भूषितो मण्डित इति विरोधः। न कौ पृथिव्यां लीनोऽकुलीनोऽत्युच्चत्वात्। शोभनैर्वंशैर्वेणुभिरलङ्कृत इति परिहारः।

दर्शितमभयं येन स मृत्युजनकं फलं दातुं शीलमस्य तादृश इति विरोधः। दर्शिताभया हरीतकी येन। मृत्युफलं महाकालफलं कदलीफलं च। ते दातुं शीलमस्य तादृगिति परिहारः। अभया त्वव्यथा पथ्येत्यमरः।

मृत्युफलं महाकाले कदल्यां मृत्युफल्यपि।

शब्दो भीमोऽपि कीचकसुहृत् पिहिताम्बरोऽप्युल्लसदंशुको विन्ध्यो नाम [1]महागिरिरदृश्यत।

इति विश्वः। सप्रस्थः परिमाणविशेषविशिष्टः। अपरिमाणः परिमाणरहित इति विरोधः।

कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक्।

इत्यमरः। सप्रस्थः ससानुरित्यविरोधः। स्नुः प्रस्थः सानुरस्त्रियामित्यमरः। नदेन शब्देन सहितः सनदो निःशब्द इति विरोधः। णद अव्यक्ते शब्दे। नदेन शोणाख्यनदेन सहितो निःशब्द इत्यविरोधः।

भीमोऽपि युधिष्ठिरानुजोऽपि कीचकसुहृत् तन्नामराजसुहृत्। विराटगृहावस्थितः कीचकः पाञ्चाल्यां साभिलाष इति भीमेन हत इति भारते प्रसिद्धमिति भीमस्य कीचकसुहृत्त्वं विरोधः। भीमो भयानकः कीचका वंशविशेषास्तेषां सुहृत्।

वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः।

इत्यमरः।

पिहिताम्बरम्छादितवस्त्रः। उल्लसत् स्फुरमाणमंशुकं वस्त्रं यस्य स इति विरोधः। चेलं वसनमंशुकमित्यमरः। पिहितमाच्छादितमम्बरमाकाशो येन। उल्लसन्तः स्फुरमाणा अंशव एवांशुकाः स्वार्थे कः। किरणा यस्य सः। इति परिहारः। अम्बरं व्योम्नि वाससि। किरणोऽस्त्रमयूखांशुरित्युभयत्रामरः।

---

१ गिरिरदृश्यत D E G H इति ग्रन्थ० च।

यस्य प्रवृद्धगुल्मतयेव दृश्यमानबहुधातुविकारः साधुरिव सान्वग्रहप्रचारप्रकटितमहिमा मीमांसान्याय इव पिहितदिगम्बरदर्शनः। यस्य हरिवंशैरिव पुष्करप्रादुर्भावरस-

---

श्लेषेणाह। यो विन्ध्यः प्रवृद्धगुल्मतया प्रवृद्धस्तम्बतयेव दृश्यमानो बहुधातूनामनेकगैरिकादीनां विकारो यत्र तादृक्। अप्रकाण्डे स्तम्बगुल्मौ। धातुर्मनःशिलाद्यद्रेरित्युभयत्रामरः। पक्षे। प्रवृद्धगुल्मतया प्रवृद्धप्लीहतया दृश्यमानो बहुधातूनां रसादीनां विकारो यस्य सः। गुल्मस्तु प्लीहा पुंसीत्यमरः।

रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः।
सप्तैव दश वैकेषां रोमत्वक्स्नायुभिः सह॥

इति हैमः। मता इति शेषोऽत्र।

साधुरिव सानुग्रहः सदयः प्रचारश्चरणं तेन प्रकटीकृत उद्योतितो महिमा लोत्कर्षो येन सः। पक्षे। सानुषु शिखरेषु ग्रहाणां सूर्यादीनां प्रचारेण भ्रमणेन प्रकटीकृतो महिमोन्नत्यं येन सः।

मीमांसान्याय इव तच्छास्त्रमिव पिहितं तिरोहितं दिगम्बरदर्शनं दिगम्बरमतं येन। पक्षे। पिहितं छादितं दिगम्बरयोर्दिगाकाशयोर्दर्शनं येन सः।

यो विन्ध्यो देवयातिरुपशोभितोपान्त इत्यन्वयः। हरि-

णीयैः राशिभिरिव मीनमिथुनकुलीरसङ्गतैः करणैरिव शकुनिनागभद्रवालबकुलोपेतैर्देवखातैरुपशोभितोपान्तः[१]। यश्च कुसुमविचित्राभिर्वंशपत्रपतिताभिः सुकुमारललिताभिः पुष्पि-

---

वंशैरिव पुष्करप्रादुर्भाव आख्यानविशेषस्तेन। पक्षे। पुष्कराणां कमलानां जलानां वा प्रादुर्भावेण रमणीयैः। पुष्कराम्भोरुहाणि च। पुष्करं सर्वतोमुखमित्युभयत्रामरः।

राशिभिरिव ज्योतिःशास्त्रप्रसिद्धैर्मेषादिराशिभिरिव मीनो मिथुनं कुलीरः कर्कटस्तैः सङ्गतैः। पक्षे। मीनमिथुनं कर्कटास्तैः सङ्गतैः।

करणैरिव ज्योतिषागमवित्तैर्बवादिकरणैरिव शकुनिनागभद्रवालवानां तत्सञ्ज्ञकानां कुलैः समुदायैरुपेतैः। पक्षे। शकुनिः पक्षी नागो गजः सर्पो वा भद्रो मुस्ता वालवकुलो लघुवञ्जुलः। अथवा वालं ह्रीवेरं वकुलो वञ्जुलस्तैरुपेतैः।

शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः।

मुस्ता मुस्तकमस्त्रियाम्। स्याद्भद्रमुस्तकः। वकुलो वञ्जुलः। वालं ह्रीवेरबर्हिष्ठोदीच्यमिति चतुर्ष्वमरः।

यो विन्ध्यो लताभिर्दर्शितानेकहस्तविलास इति सम्बन्धः। कुसुमैर्विचित्राभिर्वंशपत्रेषु पतिताभिः शिखरिणीभिः। शिखरमयं तदतीभिः मायाभिरित्यर्थः। प्रहर्षिणीभिः। अन्तर्भावितण्यर्थोऽत्र हृषिः। प्रकर्षेण हर्षकारिणीभिः। सुकुमाराश्च

---

१ -शोभितप्रान्त F -शोभितान्तः H इति नर० च।

नाग्राभिः शिखरिणीभिः [1]प्रहर्षिणीभिर्लताभिर्दर्शितानेकवृत्तविलासः।

यश्च [2]मदकलकलहंससारसरसितोद्भ्रान्तभाःकूटविकटपुच्छच्छटाव्याधूतविकचकमलखण्डविगलितमकरन्दबिन्दुसन्दोहसुरभितसलिलया [3]सायन्तनमज्जनपुलिन्दराजसुन्दरी-

---

लक्षिताश्च ताभिः। पुष्पितानि सञ्जातपुष्पाण्यग्राणि यासां ताभिः। पक्षे। तत्तदभिधानैश्छन्दोभिः। म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्। रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी। नयसहितौ न्यौ कुसुमविचित्रा। कुमारललिता ज्सौ ग्। दिङ्मुनि वंशपत्रपतितं भरनभनलगैः।

पुनरनुप्रासेनाह। यो विन्ध्यो रेवयोपगूढ इत्यन्वयः। मदेन कलमव्यक्तमधुरं कलहंसानां कादम्बानां सारसानां पुष्कराख्यानां रसितं शब्दस्तेनोद्भ्रान्ता भाःकूटा मत्स्यविशेषास्तेषां विकटपुच्छच्छटाभिर्व्याधूतविकचकमलखण्डाद्विगलितमकरन्दबिन्दुसन्दोहेन सुरभितसलिलया। कादम्बः कलहंसः स्यात्। पुष्कराह्वस्तु सारस इत्युभयत्रामरः।

भाःकूटः कथ्यते मीनभेदे शैलान्तरेऽपि च।

---

१ प्रहर्षिणीभिर्लताभिश्छन्दोभिर्विविधैरभिदर्शितवि- D इति मर॰ च। २ यश्च मद- C D इति मर॰ च। मद॰ -भाकूटकूट A B C इति मर॰ च। मद॰ -गलज्ज-लकुलपुच्छघटाव्या- F मद॰ -पुच्छच्छटा- B D इति मर॰ च। मद॰ -भाक्ता-कूटविकटपुच्छच्छटा- इति जम॰। ३ सायन्तनमज्जनोद्यतम् A B C E F G सायन्तनमज्जनपु- D सायन्तनसमयमज्जम् F H.

नाभिमण्डलनिपीतसलिलया मदमुखरराजहंसकुलकोलाहलमुखरितकूलपुलिनया[1] [2]तटनिकटमत्तमातङ्गगण्डपि-[3]ण्डविनिर्गतमदधारास्तबकितसलिलया तीरप्ररूढकेतकी-[4]काननिपतितधूलिनिकुरम्बजातसैकतसुखोपविष्टतरुणसुर-[5]

इति विश्वप्रकाशः। भागुर इति भाषायाम्।

सायन्तने सायङ्कालिके मज्जने पुलिन्दराजसुन्दरीणां शबराङ्गनानां नाभिमण्डलेनिपीतसलिलया। सायं चिरमित्यादिना ट्युट्टुडागमश्च।

मदमुखरराजहंसकुलस्य कोलाहलः कलकलस्तेन मुखरितं कूलपुलिनं यस्यास्तया।

राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः।

कोलाहलः कलकलः। कूलं रोधश्च तीरं च। तोयोत्थितं तत् पुलिनमिति चतुर्थ्वमरः। कोशे तदित्यनेन तटम्।

तटनिकटमत्तमातङ्गगण्डपिण्डविनिर्गतमदधाराभिः स्तबकितं सञ्जातस्तबकं सलिलं यस्यास्तया। गण्डः कटो मदो दानमित्यमरः।

तीरप्ररूढकेतकीकाननिपतितधूलेर्निकुरम्बं समूहस्तेन जातं यत् सैकतं तत्र या।

---

१ मद॰ -मुखरितपुलिनया C D H २ तटनिकटविकटमत्त- B D F तट॰ मत्तमत्त- A ३ -ण्डनिर्गलित- A B D E G -ण्डनिर्गत- C F H ४ काननकुसुमनि- D ५ -तरुणतरसुर- D.

मिथुननिधुवनलीलापरिमलसाचिकूलोपवनया [1]तटाटवीनिकटनिपतितजम्बूखण्डमण्डपावस्थितजलदेवतावगाह्यमानतोयया [2]तीरप्ररूढवेतसलताभ्यन्तरलीनदात्यूहव्यूहमदक-

---

सुखोपविष्टसुरमिथुननिधुवनलीला तस्यां परिमलो विमर्दजन्मा जनमनोहरो गन्धस्तत्साचि कूलोपवनं तीरकृत्रिमवनं यस्यास्तया। उपवनस्य परिमलसाचिलवर्णनेन सर्वथा जनसञ्चाररहितत्वं ध्वन्यते। अत्र सैकतशब्दप्रयोगस्तल्लक्षणया औपचारिकः।

विमर्दोत्थे परिमलो गन्धे जनमनोहरे।

मैथुनं निधुवनं रतम्।

आरामः स्यादुपवनं कृत्रिमं वनमेव यत्।

इति चामरः।

तटेऽटवी वनं तस्या निकटे निपतितानि जम्बूखण्डानि तेषां मण्डपेष्ववस्थितजलदेवताभिरवगाह्यमानतोयया। अटव्यरण्यं विपिनमित्यमरः।

तीरप्ररूढवेतसलताभ्यन्तरलीनदात्यूहव्यूहः कालकण्टकसमूहस्तस्य मदकलो यः कुहकुहारावः कुहकुहशब्दस्तेन कौतुकं तदाकृष्टसुरमिथुनैः संस्तूयमान आभोगः परिपूर्णता

---

१ तटावटविघटितजम्बू- D तटाटवीनिकटविघटितजम्बू- F तटाटवीघटितजम्बू- H २ तीरप्ररूढवेतसमयमाभ्य- A B Γ तीर° -निलीन- A B C E Γ G H तीर° -विलीन D

लकुचकुचारावकौतुकाकृष्टसुरमिथुनसंस्तूयमानाभोगयोप[१]-
[२]कूलसञ्जातनलनिकुञ्जपुञ्जितकुलायकुक्कुटघटाघूत्कारभैर-
वतीरया [३]जलमानुषीमृदितसुकुमारतीरयोपवनवातान्दो-

यस्यास्तया। दात्यूहः कालकण्टकः। आरवारावसंरावविरा-
वा इति द्वयोरमरः। आभोग. परिपूर्णतेति च। उपवनोप-
भोग- इत्यपि पाठः।

उपकूलं सामीप्येऽव्ययीभावः। तत्र सञ्जातो नलनिकुञ्जो
लतादिच्छादितो देशस्तत्र पुञ्जितः पुञ्जवदाचरितोऽनेक इत्य-
र्थः। तादृक् कुलायो नीडं यस्याः सा चासौ कुक्कुटघटा.
कुक्कुटसमूहस्तस्या घूत्कारेण तादृशशब्देन भैरवं भयानकं तीरं
यस्यास्तया। शैलोपशल्यनिपतद्रथनेमिधारा इत्यादौ उप-
शल्यशब्दस्यात्र इवात्र घटाशब्दस्य समुदाये प्रयोगो भाक्तः।
कुक्कुटश्चरणायुधः। अथ भैरवम्। दारुणं भीषणं भीष्मम्।

निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे।

कुलायो नीडमस्त्रियाम्। नडस्तु धमनः पोटगल इति चतु-
र्थ्यमरः।

जलमानुषीमृदितसुकुमारपुलिनया। जलमानुषश्चजलमा-
नुषः प्राणिविशेषः। जातेरस्त्रीविषयादिति ङीप्।

---

१ -गामकूलोपभोगयोप- A B -भागोपभोगयोप- C D L F G H २ कू॰ -मच्चन्न F कु॰ कुञ्जपुञ्जपुञ्जित- D ३ जलमानुषस्य- C D H मानु॰ -कुसुम- सुकुमार- A B I F

लिततरलतरङ्गया [1]नलनिकुञ्जपुञ्जनिविष्टावकोटककुटुम्बिनीनिरीच्यमाणार्द्धशफरया [2]पोताधानलुब्धकोयष्टिकस्कभनभीमवेतसवनया [3]तरलतरङ्गमालासञ्चरद्दण्डपाल-

---

उपवनपवनान्दोलिततरलतरङ्गया। एतेनात्र वाते गुणत्रयं वर्णितम्। तेन कामिनां सर्वदा सुखकारिताञ्च ध्वनिता।

नलनिकुञ्जपुञ्जे निविष्टोऽवकोटको बकस्तत्कुटुम्बिनी स्त्री तया निरीच्यमाणोऽर्धशफरो दण्डपालो यस्यां तया।

बकोऽवकोटकश्चाथ बलाका तु बकी स्मृता।

इति हारावली। दण्डपालोऽर्धशफर इति च।

पोताधानं चुद्राण्डमत्स्यसङ्घातस्तत्र लुब्धकोयष्टिकस्य टिट्टिभकस्य स्कभनं शब्दस्तेन भीमं वेतसवनं यस्यास्तया। स्कभः सौत्रो धातुरनेकार्थत्वाच्छब्दार्थः। चुद्राण्डमत्स्यसङ्घातः पोताधानम्। कोयष्टिकष्टिट्टिभक इति द्वयोरमरः।

तरलतरङ्गमालायां सञ्चरद्दण्डपालो मत्स्यविशेषस्तद्दर्शनेन धावदतिचपला या राजिलराजिर्डुण्डुभसमूहस्तेन रञ्चितमुपकूलं यस्यास्तया। समौ राजिलडुण्डुभावित्यमरः।

भवेद्दण्डपालस्तु सर्पमत्स्यप्रभेदयोः।

---

१ नलिनकु C न॰ -निविष्टमद्यवकोट- A न॰ -निविष्टमद्धूर्तबकोट- B म॰ -निविष्टष्टबकोट- C F न॰ निविष्टबद्दकोटि- D H न॰ -निविष्टबटबकोट- E न॰ -निविष्टबककोक- G २ पो॰ स्कम्भनभी A E F G इति मर॰ च। पो॰ -स्तमभी C पो॰ स्थम्भणभी- D ३ तरङ्गमा- A B C F H तरलतरङ्ग- F तर॰ -मालामरम्य \ B तर॰ -मद्यानिमाद्दण्ड- D

[1]र्शनधावदतिचपलराजिलराजिरञ्जितोपकूलसलिलया [2]क-
णाटीरमिथुनमैथुनदर्शनोपजातनिधिग्रहणकौतुककिरातश-

इति विश्वप्रकाश.।

कणाटीर. खञ्जनस्तन्मिथुनमैथुनदर्शनेनोपजातं निधिग्रहणकौतुक येषां तादृक्किरातशतेन खन्यमानतीरया। कणाटीरः। खञ्जलेखस्तु खञ्जन इति हारावली। कौतूहलं कौतुक च।

भेदा. किरातशबरपुलिन्दा म्लेच्छजातयः।

इति द्वयोरमरः। तथाच वराहमिहिरः।

तस्मिन् निधिर्भवति मैथुनमेति यस्मिन्
यस्मिन् पुनर्वमति तच तलेऽस्ति काच.।
अङ्गारमप्युपदिशन्ति पुरीषणेऽस्य
तत्कौतुकाय नयनस्य खनेद्धरित्रीम्॥

इति। वसन्तराजोऽपि।

अङ्गारखण्ड किल भूमिभागे
तस्मिन् भवेद्यत्र करोति विष्ठाम्।
यत्रावनौ खञ्जनको विधत्ते
रत भवेत् तत्र महानिधानम्॥

इति।

---

१ शनधावित्व B H शंन॰ राजिविराजितेप C D नद॰ -राजिराजितेप I २ कनाटीरमि ३ कर्णाटीरमि B खञ्जरीटमि C E कर्णाटीरमि D कर्णाटीरमि H इति नद॰ च। कर्णाटीरमि इति ज्ञ॰।

तखन्यमानतोरया क्रुद्धयेव दर्शितमुखविभङ्गया[1] मत्तयेव [2]स्खलितगत्या दिनारम्भलक्ष्म्येव [3]वर्धमानवेलया भारतस-मरभूम्येव नृत्यत्कबन्धया प्रावृषेव विजृम्भमाणशतपत्रपिहित-

---

क्रुद्धयेव दर्शितो मुखस्य वदनस्य विभङ्ग ओष्ठभ्रूकुटीवि-कारादिर्यया। पक्षे। मुखविभङ्गौ निःसरणतरङ्गौ यया। मुखं निःसरणास्ययोरिति धरणिः। भङ्गस्तरङ्ग ऊर्मिर्वेत्यमरः। म-त्तयेव स्खलिता गतिर्यस्यास्तया। पक्षे। स्खलिता तिर्यग्गतिः प्रवाहो यस्यास्तया। दिनारम्भलक्ष्म्येव वर्धमाना वेला कालो यस्यां तया। पक्षे। वेला मर्यादा।

अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि।

इत्यमरः।

भारतसमरभूम्येव नृत्यत्कबन्धमपमूर्द्धं कलेवरं यस्यां। पक्षे। जलम्।

कबन्धः सलिले रुद्रे कबन्धो राहुभान्तरे

इति विश्वः।

कबन्धोऽस्त्री क्रियायुक्तमपमूर्द्धं कलेवरम्।

इत्यमरः।

प्रावृषेव विजृम्भमाणैः शतपत्रैर्मयूरैः पिहिता मयूरभक्षण-भयादितस्ततश्छन्ना विषधराः सर्पा यस्यां तया।

---

१ ०मुखभङ्गया A B C F H इति [illegible] २ स्खलद्गत्या C D F
३ प्रवर्ध° A B C G

विषधरया[१] धनकामयेव कृतभूभृत्सेवया[२] रेवया प्रियतमयेव प्रसारितवीचिहस्तयोपगूढः। यश्च[३]

हरिखरनखरविदारितकुम्भस्थलविकलवारणध्वानैः।
अद्यापि कुम्भसम्भवमाह्वयतीवोच्चतालभुजः"

ततो मकरन्दस्तमुवाच।

शतपत्रः सितापाङ्गः प्रचलाकी च चन्द्रकी।

इति हारावली। पक्षे। विजृम्भमाणशतपत्रैः कुशेशयैः पिहिताच्छन्ना विषधरा जलधरास्तडागादयो यस्यां तया। विषं च्वेडे जलेऽपि चेति विश्वः। शतपत्रं कुशेशयमित्यमरः। धने द्रव्ये कामोऽभिलाषो यस्यास्तयेव। कृता भूभृतो राज्ञः सेवा यया। पक्षे। विन्ध्यस्य प्रसारितवीचिहस्तया प्रियतमयेवोपगूढः।

हरीति। यो विन्ध्यः। उच्चस्ताल एव भुजो यस्य सः। हरिखरनखरविदारितकुम्भस्थलविकलवारणध्वानैरद्यापि कुम्भसम्भवमगस्त्यमाह्वयतीवागच्छागच्छेत्याह्वानं करोतीवेत्यर्थः। कुञ्जरो वारणः करीत्यमरः। अगस्त्यः कुम्भसम्भव इति च। उत्प्रेक्षालङ्कारः। आर्या वृत्तम्।

ततो गिरिदर्शनोत्तरं मकरन्दस्तं कन्दर्पकेतुमुवाच। स्वभावोक्त्याह। पश्येति। उदञ्चदुत्तिष्ठद्वाञ्चदधोगच्छदञ्चितं

---

१ -धारया A B इति नग० च। २ -भूभृद्दुत्सवया D ३ + -विन्ध्यशैलशेखरः। H

पश्चादङ्घ्रिदवाञ्चदञ्चितवपुः पश्चार्द्धपूर्वार्द्धभाक्
स्तब्धोत्तानितपृष्ठनिष्ठितमनाग्भुग्नाग्रलाङ्गूलभृत्।
दंष्ट्राकोटिविशङ्कटास्यकुहरः कुर्वन् सटामुत्कटा-
मुत्कर्णः कुरुते क्रमं करिपतौ क्रूराकृतिः केसरी॥

अपिच।

उत्कर्णोऽयमकाण्डचण्डिमपटुः स्फारस्फुरत्केसरः[१]
क्रूराकारकरालवक्त्रविकटस्तब्धोर्ध्वलाङ्गूलभृत्।

वपुः पूर्वार्धपश्चार्धं भजति तादृक्। अपरस्यार्धं पश्चभावो वक्तव्य इति पश्चादेशः। स्तब्धोत्तानितपृष्ठे निष्ठितं स्थितं तादृक्। मनागीषद्भुग्नमग्रमस्य तादृक्। लाङ्गूलं पुच्छस्तं बिभर्ति तादृक्। दंष्ट्राकोटिभिर्विशङ्कटं बृहदास्यकुहरं मुखगर्भो यस्य तादृक्। उद्बुद्धौ कर्णौ यस्य सः। सटामुत्कटां कुर्वन् क्रूराकृतिः। केसरी सिंहः। करिपतौ गजवरे क्रमं पादविक्षेपं कुरुते पश्य। पश्य मृगो धावतीत्यादाविवात्र क्रियायाः कर्मत्वम्। पुच्छोऽस्त्री लूमलाङ्गूलम्। विशङ्कटं पृथु बृहदित्यमरौ द्वयोः। सटाजटा-केसरयोरिति हैमः। स्वभावोक्तिरलङ्कारः।

स्वभावोक्तिस्तु तस्यैव जात्यादिस्थस्य वर्णनम्।

इति लक्षणात्। शार्दूलविक्रीडितं वृत्तम्। सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितमिति लक्षणात्।

उत्क्रममाणं वर्णयित्वाक्रान्तगजं वर्णयति। उत्कर्ण इति।

---

१ -कटुस्फारस्फुरत्केसर A B F इति क्रम॰ प।

चित्रेणापि न शक्यतेऽभिलिखितुं सर्वाङ्गसङ्कोचनाच्[1]
चीत्कुर्वद्गिरिकुञ्जकुञ्जरशिरःकुम्भस्थलस्थो हरिः ॥
अनन्तरं नीचदेशनद्येव न्यग्रोधोपचितयोत्तरगोग्रहस-

उत्कर्णे। अकाण्डचण्डिमपटुः। स्फार वक्र स्फुरन्तः केसरा यस्य। क्रूराकार कराल वक्त्रं मुख तेन विकटो भयानकः। स्तब्ध निश्चलमूर्ध्वमुत्क्षिप्तं लाङ्गूल बिभर्ति तादृक्। चीत्कुर्वन् गिरि-कुञ्जकुञ्जरशिरःकुम्भस्थलस्थोऽय पुरोवर्ती हरिः सिंहः सर्वाङ्गसङ्कोचनाच्चित्रेणाप्यभिलिखितु न शक्यते। अत्र शिरःपद-मधिकम्।

तुरङ्गसिंहयोः स्कन्धकेशेषु बकुलद्रुमे।
पुन्नागवृक्षे किञ्जल्के केसर. स्यात्। इति हैमः।

अनन्तरं सिंहावलोकनानन्तरं विन्ध्याटव्या विन्ध्यारण्येन कतिचित् पदानि गत्वा कामिन इव मदनशलाकाङ्कितस्य ज-म्बूवृक्षस्य शीतलच्छायायां विशश्रामेत्यन्वयः। मदनशलाका सारिर्या पाठशालिनीति हारावली। पक्षे। मदनशलाका कामोद्बोधको वर्तिविशेषः।

मदनशलाकां कामी सिद्धौषधमव्ययं वहति।
इति गर्ग.। स्यान्मदनशलाकापि सार्यां कामोदयौषधाविति विश्वप्रकाश.। नखक्षतमिति केचित्।

---

१ सर्वाङ्गसङ्कोचभाक A B C D F H

मरभूम्येव [1]विजृम्भमाणवृहन्नलया मरुदेशढक्कायात्रयेव[2] घनसारसार्थवाहिन्या विदग्धजनमधुपानगोष्ठ्येव नानाविटपी-

---

नीचदेशनद्येव निम्नभागनद्येव न्यग्रोधोऽधःप्रदेशावरोधस्तेनोपचितया वृद्धया । पक्षे । न्यग्रोधैर्वटैरुपचिता तया । न्यग्रोधो बहुपादवट इत्यमरः ।

उत्तरगोग्रहसमरभूम्येव विजृम्भमाणो वृहन्नडोऽर्जुनः ।

उत्तरस्तु विराटस्य तनये दिशि चोत्तरे ।

इति विश्वप्रकाशः । पक्षे । वृहन्नडो धमनश्च यस्यां तया ।

ढक्काया ढक्काध्वनेर्यात्रा गमनं ढक्कायात्रा मरुदेशस्य ढक्कायात्रा तयेव घनो मेघस्तस्मात् सारः पानीयं तदर्थं सार्थः समूहस्तदाह्विनी तत्नापिका । यद्वा ढक्केत्यनेन तद्ध्वनिः स चासौ यात्रोत्सवः । उदकमुदकं कूपादित्येवंरूपस्तदत्या । अन्यत् पूर्ववत् । गमनोत्सवयोर्यात्रेति विश्वः । मरुदेशे जलार्थिनो ढक्काध्वनिश्रवणाज्जलमुद्गतमन्योरिति निकषा प्रयान्तीति प्रसिद्धम् । पक्षे । घनसारः कर्पूरम् । पुष्पफलहीनः करवीरसमानाकारपत्रः क्षुपभेदो वा ।

घनसारस्तु कर्पूरे वृक्षभेदे जलेऽपि च ।

इति विश्वः । ढक्कयात्रेति लघपाठः । श्रमक्लमालान्द्याघोः सङ्कुाकन्दसोरित्यमरप्रवृत्तेः ।

विदग्धजनमधुपानगोष्ठ्येव नानाविटैरनेकखिड्गैः पीत आ-

---

[1] विजृम्भित A B C F G H [2] -ढक्कयेव F

तासवया नलकूबरचित्तवृत्त्येव सततधृतरम्भया मत्तमातङ्गगत्येव [१]घण्टारवावेदितमार्गया, सदीश्वरसेवयेवादूरोद्गतबहुफलया[२] विराटलक्ष्म्येवानन्दितकीचकशतया विन्ध्याटव्या कतिचित् पदानि[३] गत्वा कामिन इव मदनशलाकाङ्कितस्य[४] जम्बूवृक्षस्य [५]शीतलच्छायायां विशश्राम।

सवो मद्यं यस्याम्। खिङ्गः पाल्लविको विटः। मैरेयमासवः शीधुरित्यमरः। पक्षे। नानाविटपिस्थितं जातमासवं लाक्षादिकं यस्यां तया। नलकूबरः कुबेरपुत्रस्तच्चित्तवृत्त्येव सततं धृता रम्भा तन्नामिकाप्सरसो यया। अस्येत्यनुवृत्तौ पुत्रस्तु नलकूबर इति कुबेरप्रकरणेऽमरः। पक्षे। सततं धृता रम्भा कदली यया।

कदली वारणबुसा रम्भा मोचांशुमत्फला।

इत्यमरः।

मत्तमातङ्गगत्येव घण्टाया रवः शब्दस्तेनावेदितमार्गया। पक्षे। घण्टारवा वृक्षभेदः। घण्टारवा तु शणपुष्पिकेत्यमरः। सदीश्वरसेवयेवादूरोद्गतानि बहूनि बहुविधानि भूयांसि वा फलानि यस्यां तया। पक्षे। अदूर शीघ्रमुद्गतानि बहूनि

---

१ घण्टारवविदित- A C घण्टारवाविदित- B D F H २ -बीफलया F H
३ इति अग० च नर० च। कतिपयपद दूर A B कतिपयपद C कतिपयमदूरमध्वान E कतिपयदूर F कतिपयपदानि G ४ + विकर्तनस्येव स्निग्धच्छायस्य वैकुण्ठस्येव सुघोभृतो याचोयतस्पतेरिव घनपत्रशोभितस्य राजावचयस्येव भूरिशालालङ्कृतस्य गाणिक्यस्येवानेकपल्लवोऽम्भवस्य B C ५ तलच्छायायां A B C D F इति नर० च।

अत्रान्तरे[1] भगवानपि मरीचिमाल्यातपक्लान्तमत्तम-[2]द्विपलोचनपाटलमण्डलश्चरमाचलशृङ्गमारुरोह। ततो मकरन्दः फलमूलान्यादाय [3]कथं कथमपि तमभिनन्दिता-हारपरिचयमकार्षीत् स्वयं च तदुपभुक्तशेषमशनमकरोत्। अथ तामेव प्रियतमां हृदयफलके सङ्कल्प्य तूलिकया लिखि-

धनाद्यनिष्टनिवारणादीनि फलानि यस्यां तया। विराटल-क्ष्म्येवानन्दित कीचकानां तत्कुलानां शत यया। पक्षे। कीचका वंशविशेषाः।

वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धता।

इत्यमरः।

अत्रान्तरेऽस्मिन्नवसर आतपक्लान्तमत्तमद्विपलोचनवत् पाटलो मण्डलो यस्य तादृङ्मरीचिमाली सूर्यश्चरमाचलशृङ्ग-मस्तगिरिशिखरमारुरोह। श्वेतरक्तस्तु पाटल। अस्तस्तु चरमः क्ष्माभृदिति द्वयोरमर।

ततोऽस्तमनोत्तर मकरन्द फलमूलान्यादाय त कन्दर्प-केतुमभिनन्दिताहारपरिचयमकार्षीत्। स्वय च तद्भुक्तशेषा-शनमकरोत्।

अथ फलाद्यशनोत्तर हृदयफलके हृदयपट्टे सङ्कल्प्य तू-लिकया कूर्चिकया लिखितां तामेव स्वप्नदृष्टामेव प्रियतमा-

१ यनन्तर A B २ द्विपले द्विलोचनपमानमण्डल- II ३ — कथ C D II

तामिवावलोकयन्[१] निस्पन्दकरणग्राम कन्दर्पकेतुर्मकरन्द-विरचितपल्लवशयने सुष्वाप।

अथार्धयाममात्रावखण्डितायां[२] यामवत्यां तत्र जम्बूतरुशिखरे शुकसारिकयोर्मिथः कलहायमानयोः कलकलं श्रुत्वा कन्दर्पकेतुर्मकरन्दमुवाच। वयस्य [३]शृणुवस्तावदेतयोराला-

---

मवलोकयन् ध्याने पश्यन् निस्पन्दकरणग्रामो निश्चलसकलेन्द्रिय. कन्दर्पकेतुर्मकरन्दविरचितपल्लवशयने सुष्वाप। अथ तूलिका कूर्चिकेति हैमः। नक्तव्रतकन्दमूलाशनपल्लवशयनशयनेन गिरौ तपश्चरण ध्वनितम्।

गिरेः सद्य. फलदातृत्व दर्शयति। अथेत्यादिना। अथ शयनोत्तरमर्धयाममात्रावखण्डितायां विभावर्यां तत्र जम्बूतरुशिखरे तस्मिन् जम्बूवृक्षाग्रे मिथः कलहायमानयोः शुकसारिकयोः कलकलं श्रुत्वा कन्दर्पकेतुर्मकरन्दमुवाच। मिथोऽन्योन्य रहस्यपि। द्वौ यामप्रहरौ समावित्युभयत्रामरः।

किमित्याह। वयस्येति। वयस्यैतयोरालापं तावच्छृणुव इति। ततः कलहानन्तरं सारिका। प्रकोपतरलाचर क्रियाविशेषणम्। उवाच। कितव धूर्त सारिकान्तरमन्विष्य। अन्वेषणेन तया सह सम्बन्धो लक्ष्यते। समागतोऽसि। अन्यथा सारिकान्तरसम्बन्धाभावे। तवेत्यस्य तदागमने लक्षणा। इयती रात्रिरिति।

---

१ ह्लोकयन C F G २ -मात्रखण्डितायां C यामखण्डितायां D -मात्रपरिखण्डितायां H ३ शृणुवस्तावदनयो- F शृणुवस्तावदेनयो- G]

पमिति। [1]ततः सारिका[1] प्रकोपतरलाचरमुवाच। कितव सारिकान्तरमन्विष्य समागतोऽसि कथमन्यथा[2] रात्रिरियती [3]तवेति। तच्छ्रुत्वा शुकस्तामवादीत्। [4]भद्रेऽपूर्वाद्य कथा[4] मया श्रुता प्रत्यचीकृता च तेनायं [6]कालातिपातः। अथ समुपजातकुतूहलया सारिकयानुरुध्यमानः[7] कथयितुमारेभे।

तच्छ्रुत्वा शुकस्तां सारिकामवादीत्। भद्रेऽद्यापूर्वा कथा श्रुता प्रत्यचीकृता च। कथायाः शब्दप्रबन्धस्य प्रत्यचासम्भवात् तदर्थभूतक्रियाया अपि प्रत्यचासम्भवात् तदाश्रया जना लच्यन्ते। तेनायं कालातिपातः। मदागमनेऽतिकाल इत्यर्थः।

अथ शुकवाक्यश्रवणोत्तर समुपजातकुतूहलया सारिकयानुरुध्यमानः शपथादिना भूयो भूयोऽर्थ्यमानः। शुक इति शेषः। कथयितुमारेभे।

कुसुमपुरं नाम नगरमस्तीत्यन्वयः। कीदृक्षैर्गृहैरुपशोभितम्। सुधाधवलैः। सुधा लेपोऽस्त्र स्त्रुहीत्यमरः। कुही इति प्रसिद्ध लेपनद्रव्यम्।

बृहत्कया गुणाढ्यकृतिस्तदारम्भैरिव शालभञ्जिकोपेतैः। शालभञ्जिका नायिकाविशेषः। पचे। शालभञ्जिका पुत्तलिका। शालभञ्जी पाञ्चालिका च पुत्तलिकेति हैम.।

---

१ ततस्तचसारिका जम्बूतरुशिखरस्थित चिरायागत शुक प्रको D २ + स्वकुञ्जस्थिता चिरादागत शुक D ३ कथमितरथा C E F ४ भद्रेऽपूर्वा कथा A C E F G भद्रे मा प्रकोप कुरुपूर्वा मया कथा B H ५ कथापि D ६ कालोऽतिपात G ७ निरुध्यमान A ऽनुरुध्यमान C F + कथा C + शुक कथा D

अस्ति [1]सुधाधवलैर्बृहत्कथारम्भैरिव[1] [2]शालभञ्जिकोपेतैर्वृत्तैरिव समाणवकक्रीडितैः करियूथैरिव समत्तवारणैः सुग्रीवसैन्यैरिव सगवाक्षैर्बलिभवनैरिव सुतलसन्निवेशैर्वेश्मभि-

---

वृत्तैरिव छन्दोभिरिव समाणवकक्रीडितैः । माणवकक्रीडितं नाम छन्दोविशेषः । माणवकं भात्तलगाः । पक्षे । माणवकानां शिशूनां क्रीडितानि तैः सहितानि तैः ।

करियूथैरिव समत्तवारणैः समत्तगजैः । पक्षे । सनिर्यूहैः ।

मत्तवारणमिच्छन्ति दानक्लिन्नकरे द्विपे ।

महाप्रसादवीथीनां वरण्डे चाप्यपाश्रये ॥

इति विश्वप्रकाशः । निर्यूहो मत्तवारणमिति वैजयन्ती ।

मत्तालम्बोऽपाश्रयः स्यात् प्रग्रीवो मत्तवारणः ।

इति हैमः ।

निर्यूहः शेखरे द्वारे निर्यासे नागदन्तके ।

इति विश्वप्रकाशः ।

सुग्रीवसैन्यैरिव सगवाक्षैः । गवाक्षो वानरविशेषस्तत्सहितैः । पक्षे । सगवाक्षैः सवातायनैः ।

बलिभवनैरिव सुतले पातालविशेषे सन्निवेशो येषां तैः । पक्षे । शोभनस्तलसन्निवेशो येषां तैः ।

---

१ इति अग० च भर० च । मन्दरगिरिशिखरैरिव प्रशस्तसु- A मयूरशिखरैरिव प्रशस्तसु- B मन्दरप्रष्ठैरिव प्रशस्तसु- C मन्दरगिरिशिखरैरिव प्रशस्तसु- D प्रशस्तसु- E G मन्दरगिरिरिव प्रशस्तसु- H २ -शालभञ्जैरिव D -शालभैरिव F इति अग० च । ३ मा० -चोपशोभितैः- C D F

रूपशोभितं[१] धनदेनापि [२]प्रचेतसाजापालेनापि रामेण प्रियंवदेनापि पुष्पकेतुना भरतेनापि शत्रुघ्नेन तिथिपरेणाप्यति-

---

पौरजनेनानुगतमित्यन्वयः। धनदेनापि कुवेरेणापि प्रचेतसा वरुणेनेति विरोधः। धनदो धनदाता प्रहृष्टं चेतो यस्य स इत्यविरोध.।

अजापालो जाबालो रामः पशुविशेष इति, विरोधः। केचित् लजापालो रामपूर्वजो रामो दाशरथिरिति विरोधः। जाबालः स्यादजाजीवः। रामः स्मरो गवय. शशः इत्यादयो मृगेन्द्राद्या इत्युभयत्रामरः। अकारो वासुदेवस्तस्माज्जातोऽज. कामस्तमापालयति तादृक्। अतएव रमयतीति रामः। णिजन्तादच्। ततोऽण्। स्त्रीणां क्रीडाकारकस्तादृशेनेत्यविरोधः।

प्रियंवदो गन्धर्वविशेषः पुष्पकेतुः काम इति विरोधः। प्रियं वदति तादृक् तेन। प्रियवशे वद. खजिति खच्। अरुर्द्विषदिति मुम्। पुष्पकेतुः पुष्पाभरणस्तेनेत्यविरोधः।

भरत. कैकेयीतनय. शत्रुघ्नः सौमित्रिरिति विरोधः। भे नक्षत्रे रतस्तेन ज्योतिषिकेन शत्रुघातकेनेति परिहारः।

तिथौ विहिततत्तत्तिथिकर्मणि परेण रतेन। न तिथिसत्कारपरोऽतिथिसत्कारपर इति विरोधः। अतिथीनामाग-

---

१ रूपशोभित A B C D G H इति अग॰ च नर॰ च। रूपशोभित F
२ प॰ साजपा C

[1]थिसत्कारपरेणासङ्ग्रेनापि सङ्ग्रावतामर्मभेदिनापि वीरतरेणापतितेनापि नानासवासक्तेन[2] सुदर्शनेनाप्यचक्रेणाजात-

---

न्तूनां सत्कारपरेणेति परिहारः। आगन्तुरतिथिर्ना गृहागते। इत्यमरः।

असङ्ग्रेन बङ्गत्वाद्गणनारहितेन सङ्ग्रावता सङ्ग्रासहितेनेति विरोधः। असङ्ग्रेनायुद्धेन सङ्ग्रावता पण्डितेनेत्यविरोध.। मृधमास्कन्दनं सङ्ग्रम्। सङ्ग्रावान् पण्डित कविरित्युभयत्रामरः।

अमर्मभेदिना पीवरतरेण काण्डेन। काण्डस्य मर्मभेदित्व प्रसिद्धम्। तद्भिन्नत्वेन वर्णन विरोध.। अजिह्मगो वीरतरोऽस्त्रकण्टक इति हारावली। मर्म रहस्य तदभेदकेन वीरतरेणातिशूरेणेति परिहार ।

अपतितेन भूमावपतितेन नानासवासक्तेनानेकमद्यासक्तेनेति विरोध.। मेरेयमासव. शीधुरित्यमर.। अपतितेनाप्रायश्चित्तार्हेण। नाना सवा अनेकयज्ञास्तेष्वासक्तेनेति परिहार.। यज्ञः सवोऽध्वरो याग इत्यमर ।

अजातमदेनासम्भूतदानेन सुप्रतीकेन तन्नामकगजेनेति विरोध.। अजातमदेनासञ्जाताहङ्कारेण सुष्ठु प्रतीकमङ्ग यस्य तेनेति परिहारः। अङ्ग प्रतीकोऽवयव इत्यमर.।

सुदर्शनेनाचक्रेण। विष्णुचक्रस्य सुदर्शन इति सञ्ज्ञेति विरोध । अचक्रेणादम्भेन।

---

१ थिपरेणा A B थिसत्कारप्रवणना C H थिप्रवणेना F २ सवसक्तेन D -सवासक्तेन I H

मदेनापि सुप्रतीकेनापक्षपातिनापि हंसेनाविदितस्नेहक्षये-णापि कुलप्रदीपेनाप्रग्रन्थिनापि वंशपोतेन निदाघदिवसेनेव वृषविवर्धितरुचिना माघविरामदिवसेनेव तपस्यारम्भिणाग्रहे-

---

जनावने समूहे च दम्भे भेदरथाङ्गयोः।

इति रन्तिदेवः। शोभनं दर्शनं यस्येत्यविरोधः।

न पक्षेण गच्छता पततीत्यपक्षपाती तेन हंसेन पक्षिणेति विरोधः। अकारे विष्णौ पक्षपाती तादृशेन हंसेन विशुद्धेन निर्लोभेन वेति परिहारः। अकारो वासुदेवः स्यादित्येकाक्षरः।

हंसो विशुद्धे निर्लोभे श्रेष्ठे च विहगान्तरे।

इति विश्वः।

न विदितः स्नेहस्य तैलस्य क्षयो येन तेनापि कुलप्रदीपेनेति विरोधः। न विदितः स्नेहक्षयोऽनुरागक्षयो येन। कुलस्य वंशस्य प्रदीपेन प्रकाशकेनेति परिहारः।

अग्रन्थिना पर्वरहितेन वंशपोतेन वंशाङ्कुरेणेति विरोधः। अग्रन्थिना शुद्धहृदयेन वंशपोतेन सत्कुलार्भकेणेत्यविरोधः।

निदाघदिवसेनेव वृषेण वृषभसङ्क्रमणेन विवर्धितरुचिना प्रवृद्धतापेनेत्यर्थः। पक्षे। वृषे धर्मे विवर्धितरुचिना। माघविरामदिवसेनेव तपस्यस्य फाल्गुनस्यारम्भिणा। स्यात् तपस्यः फाल्गुनिक इत्यमरः। पक्षे। तपस्या तपश्चरणं तदारम्भिणा।

अग्रहेणापि काव्यजीवशेन शुक्रगुरुबुधेन। पक्षे। काव्यस्य जीवज्ञेनाशयज्ञेन।

णापि काव्यजीवज्ञेन [1]पौरजनेनानुगतं [2]घनागमदिवसेनेव दर्शितखण्डाभ्रेण वेलातटेनेव प्रवालमणिमण्डितेन[3] देवाङ्गनाजनेनेवेन्द्राणीपरिचयविदग्धेन[4] वनगजेनेव [5]पल्लव-

---

वेश्याजनेनाधिष्ठितमित्यन्वयः। घनागमदिवसेनेव दर्शितखण्डाभ्रेण दर्शितखण्डमेघेन। पक्षे। खण्डाभ्रं दन्तक्षतविशेषः। तथाच वामनः।

विचित्रमीषत्परिमण्डलं च क्षतैः समन्तादिशदैरुपेतम्।
खण्डाभ्रकं तद्दशनाग्रलेखं बिम्बाधरोत्सङ्गविभूषणाय॥

इति।

वेलातटेनेव प्रवाला विद्रुमा मणयश्च तैर्मण्डितेन। पक्षे। प्रवालैरुत्तमकेशैर्विद्रुमैर्वा मणिभिर्मण्डितेन। यद्वा। प्रवालमणिर्दन्तक्षतविशेषः। तथाच वामनः।

गाढं दन्तौष्ठसंयोगात् स प्रवालमणिर्भवेत्।

इति।

देवाङ्गनाजनेनेवेन्द्राणी शची तस्याः परिचयाद्विदग्धेन। पक्षे। इन्द्राणी रतौ बन्धविशेषः।

निजकचद्वयसङ्गतजानुभ्यां भवति चाभ्यासात्।
इन्द्राणीरचितत्वादिन्द्राणीत्याख्यया बन्धः॥ इति।

---

१ निवासिजनै- A B C F विलासिजनै- D H इति नर० च। २ घनागम- A D घनागमेनेव इति जग०। ३ -मण्डनेन C F H इति जग० च। ४ -परिचित-विदग्धेन C F G ५ नवपल्लव- A B C D E F G H इति नर० च।

पल्लवितरुचिना[१] कोकिलेनेव परपुष्टेन भ्रमरेणेव कुसुमेषु लालितेन जलौकसेव रक्ताकृष्टिनिपुणेन [२]याजकेनेव सुरतार्थिना महानटबाहुनेव[३] [४]वन्नाङ्गजङ्गेन गरुडेनेव विनासिङ्ह-

---

वनगजेनेव पल्लवे किसलये पल्लविता विवृद्धा रुचिरिच्छा येन तेनेव। पक्षे। पल्लवैः पल्लवेषु वा विटैर्विटेषु वा विवर्धितरुचिना।

पल्लवः किसलये खिङ्गे विस्तारे विटपेऽपि च।

इति विश्वः।

कोकिलेनेव परस्मात् पुष्टेन। पक्षे। परमत्यर्थं पुष्टेन। भ्रमरेणेव कुसुमेषु पुष्पेषु लालितेन। पक्षे। कुसुमेषुणा कामेन लालितेन।

जलौकसेव रक्ताकृष्टौ रुधिराकृष्टिसात्र निपुणेन। रक्तं घतजशोणितमित्यमरः। जलौकसेनेति पाठे पूर्वमोकःशब्दात् स्वार्थेऽण् पश्चात् समासः। पक्षे। रक्तानामनुरक्तानामाकृष्टिसात्र निपुणेन।

शाब्दिकैस्तु जलौकाभि कथितोऽयं जलौकसः।

इति शब्दभेदप्रकाशः।

याजकेनेव सुरता सुरत्व तदर्थिना। भावे तल्। तलन्त स्त्रियामिति स्त्रीलम्। पक्षे। सुरतं निधुवनं तदर्थिना।

---

१ नवपल्लवरुचिना D इति मट॰ च। २ यायजूकेनेव D ३ बाहुवन्मेनेव ४ वद्दहद्भुज A B F वद्भुज C, D H

दयतापकरेणान्धासुरेणेव[१] शूलानामुपरिगतेन वेश्याजनेना-धिष्ठितं[२] कुसुमपुरं नाम नगरम्।

[३]यत्र च [४]सुरासुरमौलिमालालालितचरणारविन्दा शुं-

महानटबाहुनेव शिवभुजेनेव वल्लाहुजङ्गेन। पक्षे। वल्ला-द्विलासिना। भुजङ्गोऽहिविलासिनोरिति विश्वः। गरुडेनेव बिल आसितुमुपवेष्टुं शीलं येषां तेषां सर्पाणां हृदयतापक-रेण। पक्षे। विलासिनां स्वासङ्गतविलसनशीलानां हृदय-तापकरेण।

अन्धासुरेणेव शूलानामुपरिगतेन। दारा इत्यादाविवा-वयवाभिप्रायेण बहुवचनम्। अन्धासुरो भैरवेण शूलाग्रे रोपित इति कथा। पक्षे। शूलानामुपरिगतेन। अन्यत्र स्थिताभ्यो वेश्याभ्योऽधिकेनेति भावः।

> मृत्यौ प्रहरणे शूलः केतने योगरोगयोः।
> खलादेश्च वधार्थाय कीलके पण्ययोषिति॥

इति विश्वप्रकाशः।

यत्र कुसुमपुरे वेतालाभिधाना स्वयं प्रतिवसतीति सम्ब-न्धः। सुरासुरेति स्पष्टम्। शुम्भनिशुम्भाविव महावनं तस्य

—१—तापकेनान्धकासुरेणेव D -णान्धासुरेणेव इति क्वाग॰। २ -नानुगत H इति क्वाग॰ च। ३ यत्र सु- A B G H ४ सुरासुरमुकुटमणिमाला- D E सुरासुर-मुकुटमौलिमाला F

म्भनिशुम्भमहावनदावज्वाला[1] महिषमहासुरगिरिवज्रसार-धारा[2] [3]प्रणयप्रणतगङ्गाधरजटाजूटस्खलितजाह्नवीजलधा-राधौतपादपद्मा[4] भगवती कात्यायनी [5]वेतालाभिधाना स्वयं प्रतिवसति।

यस्य च परिसरे [6]सुरासुरमुकुटकुसुमरजोराजिपरिमल-

दावज्वालारण्याग्निशिखा। दवदावौ वनारण्यवह्नी इत्यमरः। महिषेति रूपकम्।

विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्।

इति लक्षणात्।

प्रणयेन प्रीत्या प्रणतो गङ्गाधरस्तस्य जटाजूटात् स्खलिता या जाह्नवीजलधारा तया धौतपादपद्मा। एतेन न केवलं भर्त्त्रैव प्रणाम किन्तु सपत्न्यापि पादक्षालनमाचरितमिति ध्वनितम्। तेनातिवल्लभात्व ध्वनितम्।

यस्य पुरस्य परिसरे प्रान्ते भागीरथी गङ्गा वहतीति सम्बन्धः। सुरासुरेति। पितामहस्य ब्रह्मणः कमण्डलोर्धर्मद्रवरूपा धारा। धरातलगतसगरसुतशतस्य सुरनगरसमारोहणार्थं पुण्यरज्जुः। ऐरावतस्य कटकषणेन गण्डस्थलघर्षणेन कम्पित-

---

१ महादानवदावज्वाला A B महावनदहनज्वाला C महावनदावानल॰ज्वाला D महासुरवनदावज्वाला H २ गिरिवरवज्रसारधारा C F H गिरिदारणवज्रधारधारा D गिरिवज्रधारा B D E H ३ प्रणयकलहप्र A B D F H प्रणयकोपप्रसादप्र D इति क्रम॰ च। प्र॰ जूटकूट A B C F H ४ पदपद्मा A B ५ वैतण्डाभि D ६ सुरासुरमज्जनमर्गलितम् C सुरासुरावज्जनमलिमम्लितम् D

वाहिनी [१]पितामहकमण्डलुधर्मद्रवधारा [२]धरातलगतसगर-सुतशतसुरनगरसमारोहणपुण्यरज्जुरैरावणकटकपणकम्पित-[३]तटहरिचन्दनस्पन्दनसुरभितसलिला [४]सलीलसुरसुन्दरी-नितम्बबिम्बाहतितरलिततरङ्गा [५]स्नानावतीर्णसप्तर्षिजटाटवी-[६]परिमलपुण्यवेणिरेणतिलकमुकुटजटाजूटविकटकुहरभ्रा-न्तिजनितसंस्कारतयेव कुटिलावर्ता धरणीव सार्वभौमकरस्प-र्शोपभोगक्षमा जलदकालसरसीव गन्धाम्भोपरिभ्रमद्भ्रमर-

---

तटहरिचन्दनस्य स्यन्दनेन प्रस्रवणेन सुरभितसलिला। सलील क्रियाविशेषणम्। सुरसुन्दरीनितम्बबिम्बाहतिभिस्तरलतरङ्गा। स्नानावतीर्णसप्तर्षिजटाटव्याः परिमलपुण्यवेणिः पुण्यप्रवाहा। एणतिलकश्चन्द्रो मुकुटे यस्य तस्य जटाजूटविकटकुहरे भ्रान्ति-भ्रमणं तेन जनितसंस्कारतयेव कुटिल आवर्ती जलभ्रमस्तद्वती। स्यादावर्तोऽम्भसां भ्रम इत्यमरः।

धरणीव सार्वभौमश्चक्रवर्ती। पक्षे। सार्वभौम उत्तरदिग्गजस्तस्य करस्पर्शोपभोगक्षमा। उभयोरेकदिक्स्थत्वादिति भावः। स्पर्शः स्पर्शनदानयोरिति विश्वः।

जलदकालसरसीव गन्धाम्भोपरिभ्रमन्ती चासौ भ्रमर-

---

१ पि॰ निर्गलितधर्म D २ रसातल A B G ३ स॰ -स्यन्दमानरसधाराद्युर- D स॰ -स्यन्दनसन्दोहसुर- F ४ स॰ -सुरासुरसुन्दरी B C ५ स्ना॰ -मालाविमल जटाजूटाटवी A B स्ना॰ -मालाजटा- C D स्ना॰ विमलजटा- E F G स्ना॰ -मालाविमलजटा- H ६ प॰ -रेणाङ्कित- A B F प॰ -जूटकूट- B C D H

मालानुमीयमानजलमग्नकुमुदपुण्डरीका छन्दोविचितिरिव मालिनीसनाथा[1] हृतान्धतमसापि तमसान्विता [2]वीचिकलिताप्यवीचिदुर्गमा भगवती भागीरथी [3]वहति।

यच्च दिशि दिशि तारागणमिव कुसुमनिकरमुद्वहद्भिरुत्त-

माला, तथानुमीयमानानि जलमग्नकुमुदपुण्डरीकाणि यस्यां सा। पक्षे। कुमुदपुण्डरीकौ दिग्गजौ।

छन्दोविचितिर्ग्रन्थविशेषस्तद्वन्मालिनी छन्दोविशेषस्तेन सनाथा। ननमयययुतेयं मालिनी भोगिलोकैः। पक्षे। मालिनीनामिका नदी।

हृतान्धतमसापि नाशितान्धकारापि तमसान्धकारेणान्वितेति विरोधः। तमसानामिकया नद्यान्वितेति परिहारः।

वीचिभिस्तरङ्गैः कलिता व्याप्तापि न वीचिभिर्दुर्गमेति विरोधः। पक्षे। अवीचिर्नरकभेदः।

सङ्घातापनावीचिमहारौरवरौरवाः।

इत्यमरः।

सम्बन्धातिशयोक्तिश्च। उपवनपादपैरुपशोभितमित्यन्वयः। दिशि दिशीति स्पष्टम्। अतएवोत्तंसितजलदैः। अनूरुरिति। अश्वादेस्ताडनी कशेत्यमरः। धाम भवनम्। शेषं स्पष्टम्। चन्द्रेति स्पष्टम्।

---

१ + पक्षद्विरिव सर्वामृता पराजरेण च C २ वीचिकलिता- H
३ प्रवहति A B G H

म्भितजलदैरनूरुकरकशाभिघातपरवशरविरथतुरगश्वासविष-[1]मितपल्लवैश्चन्द्रचमूरुचरणसङ्क्रान्तामृतकणनिकरसेकसञ्जातबहलसुकुमारनवकिसलयसहस्रदर्शिताकालसन्ध्याविभ्रमैर्भरतचरितैरिव सदारामाश्रितैर्महावीरैरिव नारिकेलीधरैरसंसक्ततरुणैरिवातिदूरप्रसारिताक्षैर्मत्तमातङ्गकुम्भस्थलदारणोद्यतसिंहैरिवोद्यतकेसरैः[2] सारिष्टैरपि चिरजीविभिरुपवनपादपै-

---

भरतचरितैरिव सदा रामाश्रितैः । पक्षे । सन् श्रेष्ठो य आरामस्तदाश्रितैः ।

असक्ततरुणैरिवातिदूर प्रसारिते अक्षिणी यैस्तैः । कटाक्षदर्शनानभिज्ञत्वादिति भावः । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षजिति षच् । यद्वातिदूरं प्रसारिता अक्षाः पाशका यैस्तैः । अक्षायमिन्द्रिये । ना द्यूताङ्ग इत्यमरः । पक्षे । अक्षा विभीतकाः । विभीतकः ।

नाक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः ।

इत्यमरः ।

मत्तमातङ्गकुम्भस्थलदारणोद्यतसिंहैरिवोद्यतकेसरैरुद्धूतस्कन्धकेशैः । जातिवर्णनमेतत् । पक्षे । केसरा वृक्षाः । चाम्पेयः केसरो नागकेसर इत्यमरः ।

---

१ म्भि॰ विषरणस D H २ वोत्फुल्लकेसरै A B C H वोल्लसत्केसरै D -वोल्लासितकेसरै F -रोपितकेसरै G

सुप्रशोभितमदितिजठरमिवानेकदेवकुलाध्यासितं[1] पातालमिव महाबलिशोभितं भुजङ्गाधिष्ठितं च सुरालयैरपि पवित्रं भोगिभिरपि [2]निरुपद्रवम्।

यत्र[3] च [4]सुरतभरखिन्नसुप्तसीमन्तिनीरत्नताटङ्कमुद्राङ्कितवाहुदण्डः प्रचण्डप्रतिपक्षलक्ष्मीकेशपाशकुसुममाला-

---

मारिष्टैरपि मरणसूचकयोगविशेषसहितैरपि चिरजीविभिः। पक्षे। मारिष्टैः फेनिलवृक्षसहितैः। अरिष्टः फेनिलः समावित्यमरः।

अदितिजठरमिव देवमातुरुदरवदनेकं देवकुलं देवसमूहस्तेनाध्यासितम्। पक्षे। देवकुलं देवगृहम्।

सुरालयैर्मद्यगृहैरपि पवित्रमिति विरोधः। सुरालयैर्देवगृहैरित्यविरोधः।

भोगिभिः सर्पैरपि निरुपद्रवमिति विरोधः। भोगिभिः सुखिभिरिति परिहारः।

यत्र कुसुमपुरनामनगरे शृङ्गारशेखरो नाम राजा प्रतिवसतीति सम्बन्धः। सुरतेति स्पष्टम्। प्रचण्ड इति स्पष्टम्। अनेन कचग्रहणपूर्वकमरिलक्ष्मीः स्वायत्तीकृतेति ध्वनितम्।

प्रशस्ताकेदार इव विपुलक्षेत्रमिव सकलधान्यकार्यसम्पादकः।

---

१ -ध्याधिष्ठित D -देवताश्रित F २ निरुपद्रुतम् A B C F G H निरुपद्रवितम् D ३ तत्र C D ४ सुरतभरदरखिन्नसु E G सु॰ सुप्तमन्मोर- D F.

मोदसुरभितकरकमलः[१] प्रशस्तकेदार इव [२]बहुधान्यकार्यसम्पादकः शृङ्गारशेखरो नाम राजा प्रतिवसति।

यो बलभित् पावको धर्मराण् निर्ऋतिः प्रचेताः सदागतिर्धनदः शङ्कर इत्यष्टमूर्तिरप्यनष्टमूर्तिः पार्थ इव सुभद्रोपेतः सभीमसेनश्च कृष्ण इव सत्यभामोपेतः सबलश्च।

पुञ्जपुमकयोर्वप्रः केदारः क्षेत्रमित्यमरः। पक्षे। बहुधा बहुप्रकारेणान्यकार्यसम्पादकः।

यः शृङ्गारशेखरो बलभिच्छत्रुबलभेत्ता। पावकः पवित्रकर्ता। धर्मेण राजते धर्मराट्। निर्गतार्तिः स्पर्धा यस्य।

ऋतिर्गतौ घृणायां च स्पर्धायां च शुभेऽपि च।

इति रभसः। प्रकृष्टं चेतो यस्य प्रचेताः। सतामा साकल्येन गतिर्निर्वाहो यस्मात्। धनदो धनदाता। शङ्करः कल्याणकारी। पक्षे। बलभिदिन्द्रः। पावको वह्निः। धर्मराड् यमः। निर्ऋती राक्षसः। प्रचेता वरुणः। सदागतिर्वायुः। धनदः कुबेरः। शङ्करः शिवः। इत्यष्टमूर्तिरष्टगुणविशिष्टा मूर्तिरस्येत्यष्टमूर्तिरप्यनष्टमूर्तिः। नाष्टौ मूर्तयोऽस्येत्यनष्टमूर्तिरिति विरोधः। अनष्टा मूर्तिरस्येत्यनष्टमूर्तिरिति परिहारः।

पार्थ इवार्जुन इव सुभद्रयोपेतः। भीमसेनेन सहितः सभीमसेनः। पक्षे। शोभनभद्रेण कल्याणेन युतः। भीमया सेनया सहितः।

---

१ -करमल. L. २ बहुधान्यार्थ P.

सुराणां[1] पातासौ स पुनरतिपुण्यैकहृदयो[2]
ग्रहस्तस्यास्थाने गुरुरुचितमार्गे स निरतः ।
करस्तस्यात्यर्थं वहति शतकोटिप्रणयितां
स सर्वस्वं दाता तृणमिव सुरेशं विजयते ॥

कृष्ण इव सत्यभामयोपेतः । सबलः सबलभद्रः । पक्षे । सत्यं च भा च दीप्तिश्च मा च लक्ष्मीश्च ताभिर्युतः । सबलः ससैन्यः ।

सुराणामिति । असाविन्द्रः सुराणां देवानां पाता रक्षकः । मद्यप इत्यपि श्लेषमहिम्नार्थः । स शृङ्गारशेखरः पुनरतिपुण्यं पवित्रमेकं हृदयं यस्येत्युत्कर्ष इन्द्रात् । तस्येन्द्रस्यास्थाने सभायां गुरुर्बृहस्पतिर्ग्रहो ग्रहेषु पठितः । तस्येन्द्रस्यास्थाने गुरुर्महान् ग्रहो निर्बन्ध इत्यर्थश्च । निर्बन्धोपरागार्कादयो ग्रहा इत्यमरः ।

स राजोचितमार्गे निरतः सक्तः । तस्येन्द्रस्य करो हस्तः शतकोटिप्रणयितां वज्रप्रणयितां वहति ।

शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः ।

इत्यमरः । शतकोटिसङ्ख्याकद्रव्यप्रणयिता साभिलाषतेति याचकरूपोऽर्थश्च ।

स राजा सर्वस्वं दाता । न लोकेति निषेधात् कर्मणि षष्ठी न । सुरेशमिन्द्रं तृणमिव विजयते । विपराभ्यां जेरि-

---

१ -मूर्ति । सुराणां A B C D E F H इति अग० च मर० च । २ -कनिष्ठो G इति अग० च ।

जीवाकृष्टिं स चक्रे मृधभुवि धनुषः शत्रुरासीद्गतासु-
र्लक्षाप्तिर्मार्गणानामभवदरिबले [१]तद्यशस्तेन लब्धम्।
मुक्ता तेन क्षमेति [२]त्वरितमरिबलैरुत्तमाङ्गैः प्रतिष्ठा
पञ्चत्वं द्वेषिसैन्ये स्थितमवनिपतिर्नाप सङ्ग्रामान्तरं सः॥

त्यात्मनेपदम्। विरोधाभासोऽलङ्कारः। शिखरिणी छन्दः।
रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी।

जीवेति। स शृङ्गारशेखरो मृधभुवि धनुषो जीवायाः प्रत्यञ्चाया आकृष्टिमाकर्षणं चक्रे। शत्रुर्गतासुरासीत्। धनुषो जीवाकृष्टिः शत्रोर्मरणमित्यसङ्गत्यलङ्कारः। चपलातिशयोक्तिश्च।

मौर्वी जीवा गुणो गव्या शिञ्जा बाणासनं गुणे।

इति हैमः। अरिबले मार्गणानां लक्षाप्तिरभवत्। तेन राज्ञा तेषामरीणां यशो लब्धम्। तेन राज्ञा क्षमा क्षान्तिर्मुक्तेत्यरिबलैस्त्वरितमुत्तमाङ्गैः प्रतिष्ठा मुक्ता। द्वेषिसैन्येऽरिबले पञ्चत्वं मृत्युः स्थितम्। स्यात् पञ्चता कालधर्म इत्यमरः। स राजा सङ्ग्रामान्तरं युद्धान्तरं न प्राप। एकस्मिन्नेव युद्धे रिपूणां नाशा-दिति भावः। मृधमास्कन्दनं सङ्ख्यमित्यमरः। लक्ष्यं लक्षं शरव्यं चेति च। श्लेषोऽप्यत्र। स्रग्धरा छन्दः।

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्।

---

१ यश॰ A २ इति क्रम॰ च। त्वरितरिपुबलै A B त्वरितमरिबलै C D E F G इति भर॰ च।

यत्र च राजनि राजनीतिचतुरे [1]चतुरुदधिमेखलाया[2] भुवो नायके शासति वसुमतीं पितृकार्ये[3] वृषोत्सर्गः शशिनः कन्यातुलारोहणं[4] योगे[5] शूलव्याघातचिन्ता दानच्छेदः करिकपोलेषु दक्षिणवामकरणं [6]दिङ्निश्चये शरभेदो दधिषु

यत्र यस्मिन् चतुरुदधिमेखलाया भुवो नायके राजनीतिचतुरे राजनि वसुमतीं पृथिवीं शासति सति ।

परिसङ्ख्याह । पितृकार्ये वृषस्य नीलस्यान्यस्य वोद्वाहपूर्वकस्त्यागः । वृषो धर्मश्च । एवकारः सर्वत्र योज्यः । यद्यपि पदार्थान्तरेणापि परिसङ्ख्योपपद्यते तथापि सन्ततिकस्यैव स्मृतिरिति ध्वनयितुममङ्गलस्य पितृकार्यस्य वर्णनमिति भावः ।

शशिन एव कन्यातुला चराशिस्तस्यामारोहणम् । तुलारोहणयोग्यस्यान्यस्यापराधिनोऽभवादिति भावः ।

योगे विष्कम्भादियोग एव शूलव्याघातौ योगविशेषौ तयोश्चिन्ता न तु शूलेन व्याघातस्ताडनं तस्य चिन्ता ।

करिकपोल एव दानस्य मदस्य विच्छेदो न तु वितरणस्य विच्छेदः ।

दिङ्निश्चय एव दक्षिणवामकरणम् । अस्मादयं दक्षिणोऽस्मादयं वाम इति । दक्षिणवामौ हस्तौ पादौ कर्णौ वा । तयोः करणं छेदनम् । कृञ् हिंसायाम् । बाहुलकाद्भावे ल्युट् ।

---

१ चतुरम्बुधि- A B २ -मालामेखलाया C ३ पितृकर्मोदये A पितृकार्योदये B पितृकार्येषु D H ४ -तुलाधिरोहो C D इति भाग० च । ५ योगेषु C D F G H ६ दिक्कोरेषु A B F दिङ्निश्चयेषु C D E G H

चलरागता गीतेषु न विदग्धेषु वृषहानिर्निधुवनलीलासु न पौरेषु भङ्गुरत्वं रागविकृतिषु न [1]चित्तेष्वनङ्गता कामदेवे न परिजने मारागमो यौवनोदयेषु न प्रकृतिषु द्विजाघातः सुरतेषु न प्रजासु रशनाबन्धो[2] रतिकलहेषु[3] न दानानुमति-

निशास्वेव मलिनाम्बरत्वं न जनेषु। अम्बरं वस्त्रमाकाशश्च।

गीतेष्वेव गानेष्वेव चलरागता न विदग्धेषु। रागो मालवादिरनुरागश्च।

निधुवनलीलास्वेव वृषस्य शुक्रस्य हानिर्न पौरेषु वृषस्य धर्मस्य हानिः।

ज्येष्ठाम्बुधर्मशुक्रेषु स्त्रतोऽसौ वृषभे वृषः।

इत्युत्पलिनी।

रागविकृतिष्वेव भङ्गुरत्वं न चित्तेषु भङ्गुरत्वं कुटिलत्वम्।

कामदेव एवाङ्गताशरीरत्वं न परिजनेऽनङ्गतासम्बन्धिता।

यौवनोदय एव मारस्य कामस्योदयो न परिजने मारस्य मारणस्योदयः। मृङ् प्राणत्यागे। भावे घञ्।

सुरतेष्वेव द्विजैर्दन्तैराघातो न तु प्रकृतिषु राज्याङ्गेषु प्रजासु च द्विजानां ब्राह्मणानां पक्षिणां वा घातः।

रतिकलहेष्वेव रशनायाः काञ्च्या बन्धनं न दानानुमतिषु रशनाया जिह्वाया बन्धो जडता।

१ कलहान्तरेषु A B G चाटुरेषु C F कलहेषु H रति कल० च कल० च।
२ बन्धो C ३ रतिकलिषु F.

ष्वधररागिता तरुणीषु[१] न परिजनेषु कर्तनमलकेषु न पुरन्ध्रीषु निस्त्रिंशत्वमसीनां न पुरुषाणां करवालनाशो योधानां परं व्यवस्थितः।

[१]यस्य च महिषी दिग्गजकपोलमदलेखेवानन्दितालिगणा[१]

स्त्रीकट्यां मेखला काञ्ची सप्तकी रसना तथा।
रसज्ञा रसना जिह्वेत्युभयत्रामरः।

तरुणीष्वेवाधरस्याधरोष्ठस्य रागिता न परिजनेष्वधरे नीचेऽनुरागिता।

अलकेष्वेव कर्तनं छेदनं न पुरन्ध्रीषु स्त्रीषु सूत्रोत्पादनम्।
दाराः स्यात् तु कुटुम्बिनी। पुरन्ध्रीत्यमरः।

कर्तनं च द्वयोश्छेदे नारीणां सूत्रनिर्मितौ।
इति विश्वः।

असीनामेव खड्गानामेव निस्त्रिंशत्वम्। निर्गतस्त्रिंशद्भ्योऽङ्गुलिभ्यो निस्त्रिंशस्तत्त्वम्। सङ्ख्यायास्तत्पुरुषस्य वाच्य इति डच्। न पुरुषाणां निस्त्रिंशत्वं क्रूरत्वं निःकृपत्वं वा।

निष्करुणेऽथ निस्त्रिंशः क्रूरे खड्गेऽपिचेष्यते।
इत्युत्तरतन्त्रम्।

योधानामेव परं केवलं करवालेन खड्गेन नाशो व्यवस्थितो नान्यच करस्य राजभागस्य हस्तस्य वा बालानां शिशूनां केशानां वा नाशः।

---

१ -रागवतीषु इति अग॰ च नर॰ च। २ तत्र A B C D E F इति नर॰ च। ३ -माला C -कुला F

पार्वतीव सुकुमारा सर्वान्तःपुरप्रधानभूतानङ्गवती नाम। तयोश्च मध्यमोपान्ते वयसि वर्तमानयोः कथमपि दैववशात् [१]त्रिभुवनविलोभनीयाकृतिः पुलोमतनयेवानन्दितसहस्रनेत्रा तनया वासवदत्ता नाम बभूव।

अथ सा [२]रावणभुजेवोल्लासितगोत्रा[३] परिणाममुपयात्यपि यौवनभरे परिणयपराङ्मुखी तस्थौ।

यस्य शृङ्गारशेखरस्य महिष्यनङ्गवती। नामेति प्रसिद्धावित्यन्वयः। दिग्गजकपोलमदलेखेवानन्दितो स्त्रीनाम्। पक्षे। आलीनां सखीनां गणो यया सा।

पार्वतीव शोभनः कुमारः कार्तिकेयो यस्याः। पक्षे। सुकुमारातिमृदुला सर्वेष्वन्तःपुरेषु प्रधानभूता।

प्रधानं क्लीबमेकत्वे प्रधानस्तूत्तमे पुमान्।

इति मेदिनी।

तयोरनङ्गवतीशृङ्गारशेखरयोः। कथमपि यत्नेन। यत्नस्यापि स्वतोऽप्रभुत्वादाह। दैववशात्। त्रिभुवने विलोभनीयाकृतिरभिलषणीयाकृतिः। अतएव पुलोमतनयेव शचीवानन्दितः सहस्रनेत्र इन्द्रो यया सा। पक्षे। आनन्दितं सहस्राणां नेत्रं यया। वासवदत्ता नाम तनया बभूव।

---

१ इति जग० च। त्रिभुवनलोभनी A B E F H त्रिभुवनलोकनी C २ रावणभुजवन इवो A B C D रावणभुजेव समुल्लसित H ३ गोत्रे A B C F +विन्ध्याचल इव मदनाधिष्ठिते पारावार इव सञ्जातत्रासङ्गे नन्दनवन इव सदा कल्पतरुणाभिनन्दिते पवन इव सुमनोधारिणि B C

एकदा तु[१] विजृम्भमाणसहकारकोरकनिकुरम्बनिपतित-[२]मधुकरमालामदकलझङ्कारजनितपथिकजनसञ्ज्वरः[३] को-[४]मलमलयमारुतोद्धूतचूतप्रसवरसास्वादकषायकण्ठकलकण्ठ-[५]कुहरुतभरितसकलदिङ्मुखो विकचकमलखण्डलीयमान[६]-

---

अथ सा वासवदत्ता रावणभुजेवोल्लासिता गोत्रः पर्वतः । पक्षे । गोत्रं कुलं यया सा । दोर्दोषा च भुजा भुज इति मेदिनी । परिणाममुपयात्यपि यौवनभरे परिणयपराङ्मुखी तस्थौ ।

एकदा वसन्तकाल आजगामेत्यन्वयः । विजृम्भमाण इति । झङ्कारः शब्दविशेषः ।

कोमलेति । कषायः सुरभिः कण्ठः स्वरो यस्य । द्रवेऽङ्ग-रागे सुरभौ रसे वर्णे कषाय इति विश्वः । सुरभिः स्यान्मनोज्ञे-ऽपीति रत्नकोशः ।

कण्ठो गले सन्निधाने ध्वनौ मदनपादपे ।

इति विश्वप्रकाशः । कलकण्ठः कोकिलः । वामाक्षः कोकिलः पिकः । कलकण्ठः काकपुष्ट इति हैमः । कुहरुतम् । भरितं पूरितम् ।

विकचेति । परभृतेति । कोटिरग्रम् । शीकरा बिन्दवः । शीकरोऽम्बुकणाः स्मृता इत्यमरः । समालब्धो मिलितः । भ-णितं भमणम् ।

---

१ अथैकदा तु C अथ कदाचित D   २ मधु॰ -मदकलझङ्कार- A D G
३ -पथिकज्वरः C G H -जनविरहज्वर D   ४ मल॰ -कलकण्ठकुलक A B G
५ कुहरितभरि- C E F H   ६ + -मद C G

मत्तकलहंसकुलकोलाहलमुखरितसकलसरोवरः[1] परभृत-[2]नखकोटिपाटितपाटलिकुड्मलवृन्तविवरविनिर्गतमधुधारा[3]-[4]सारशीकरकणनिकरसमालब्धदक्षिणसमीरणबाणव्रणितपथिकजनवधूहृदयो मधुमदमुदितकामिनीगण्डूषसीधुसेकपुलकितबकुलो [5]मदनरसपरवशविलासिनीतुलाकोटिविक-[6]टचटुलचरणारविन्दमन्दप्रहारप्रहृष्टकङ्केलिनरुशतः प्रति-[7]दिशमश्लीलप्रायगीयमानगीतश्रवणोत्सुकखिड्गजनप्रारब्धच-

---

मधुमदेति। नवाङ्कुरोद्गमेन सपुलक इवाचरित इति भावः। तथाचोक्तम्।

पादाहतः प्रमदया विकसत्यशोकः
शोकं जहाति बकुलो मुखसीधुसिक्तः।

इति। तुलाकोटिर्मञ्जीरं तेन विकटं विरहिण चटुलं चञ्चलं यच्चरणारविन्दम्।

प्रतिदिशमिति। वीप्सायामव्ययीभावः। शरदादित्वाट्टच्। अश्लीलप्रायं ग्राम्यप्रायम्। चर्चरी चाचर इति भाषायां प्रसिद्धम्।

दुर्जन इव सतां साधूनामरसोऽप्रीतिजनकः। पक्षे। तामरसेन कमलेन सहितः सतामरसः। पङ्केरुहं तामरसमित्यमरः।

---

१ कमलसरोवर. C E F H २ नखकोटिविघटितपा A B नखकोटिपाटलि- D नख॰ -पाटल C H नख॰ -कुड्मलविव- C D E H ३ -मधुरमधुधारा E ४ सा॰ -समालम्बनदक्षिण F सा॰ बाणक्षतव्रण- H ५ मदमरपर D ६ टच॰ -हारमुकुलितकङ्के D ७ दि॰ सुकण्ठजन- D

[1]च्चरीगीताकर्णनमुह्यमानानेकपथिकशतो दुर्जन इव सताम-रसो दुष्कुल इव जातिहीनो रावण इवापीतलोहितपलाश-गतसेवितो महाशृङ्गारीव सुगन्धवहः सुराजेव सम्टद्धकु-

---

दुष्कुल इव जातिं सामान्यं तेन हीनः। जातिर्जातं च सामान्यमित्यमरः। पक्षे। जातिर्मालती। सुमना मालती जातिरित्यमरः।

रावण इवापीतं लोहितं रुधिरं यैस्तादृशैः पलाशशतै रक्षसां शतैः सेवितः।

रुधिरेऽसृग्लोहितास्त्ररक्तक्षतजशोणितम्।

इत्यमरः।

हरिद्वर्णो राक्षसश्च पलाशस्छदनः स्मृतः।

इति हैमः। पक्षे। आपीतैरीषत्पीतवर्णैर्लोहितै रक्तैः पला-शशतैः पलाशवृक्षशतैः सेवितः। रोहितो लोहितो रक्त इत्यमरः।

शृङ्गारीव सुगन्धं सुगन्धद्रव्यं वहति तादृशः। पक्षे। शो-भनो गन्धवहो वायुर्यस्मिन् सः।

पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः।

इत्यमरः। सुराजेव। न पूजनादिति निषेधान्न टच्।

समृद्धः कुवलयो भूवलयो यस्मात्। पक्षे। समृद्धानि कु-वलयानि यस्मिन्।

---

१ च्चरीममावह- E. G

अतिदूरप्रवृद्धेन मधुना जगति को वा[१] न विक्रियते यदतिमुक्तको मुनिरपि विचकास[२]। कुसुमशरस्य [३]नवचूतप्रसवशरमूलनिलीना मधुकराली यन्त्रणेव[४] रेजे[५]। वृन्तविनिर्गतवि[६]चकिलकलिकातले[७] मञ्जु[८] गुञ्जन् मधुकरो मकरकेतोस्त्रि-

---

अतिदूरप्रवृद्धेन मधुना वसन्तेन मद्येन वा जगति को न विक्रियते। कर्मणि लट्। अतिमुक्तको मुनिरपीति स्पष्टम्। पक्षे। अतिमुक्तकः पुण्ड्रको मुनिरगस्त्यो विचकास।

उत्प्रेक्षयाह। कुसुमशरेति।

शराणां पत्ररचना यन्त्रणा परिकीर्तिता।

इति हारावली।

यन्त्रणं स्यान्नियमने बन्धने रक्षणेऽपि च।

इति विश्वप्रकाशः। शेषं स्पष्टम्।

वृन्तेति। वृन्तात् प्रसवबन्धनादिनिर्गतानां विचकिलानां मल्लिभेदानां कलिकास्तासां तले मञ्जु गुञ्जन् मधुकरो मधुमतो मकरकेतोस्त्रिभुवनविजयप्रयाणशङ्खध्वनिमिवाकरोत्।

स्यातो विचकिलो मल्लीप्रभेदे मदनेऽपि च।

इति विश्वप्रकाशः।

---

१ नाम D E २ -कारे B H -कार D ३ नवचूतशर- D E F नवचूतशरे लीना H ४ यन्त्रेणैव A D E F G इति मत॰ च। यन्त्रयन्त्रणमेव C ५ रराज D ६ -कचविचकि C E H ७ -किलविवरेषु C -कोमलविचकिलकलिकातले D ८ — मञ्जु A B C D F H

[1]भुवनविजयप्रयाणशङ्खध्वनिमिव चकार। नवयावकपङ्कपल्लवितसनूपुरतरुणीचरणप्रहारानुरागवशान्नवकिसलयच्छलेन तमिव[2] रागमुदवहदशोकः। [3]मधुरमधुपरिपूरितकामिनी-[4]मुखकमलगण्डूषसेकादिव[5] [6]तद्रसमात्मकुसुमेषु बिभ्रद्बकुलतरू रराज। अन्तरान्तरा निपतितमधुकरनिकरकिर्मीरितः[7] कङ्केलिगुच्छोऽर्धनिर्वाणमनोभवचिताचक्रानुकारी पथिकजनहृदयदाहमुवाह। विकचविचकिलराजिरलिकुलशब-

---

अशोको नवयावकपङ्केन नवलाक्षारसेन पल्लवितं रक्तं सनूपुरं समञ्जीरं तरुणीचरणं तस्य प्रहारस्तदनुरागवशान्नवकिसलयच्छलेन तं रागमिवोदवहत्।

भवेत् पल्लवितं लाक्षारक्ते समसवे तते।

इति विश्वप्रकाशः।

बकुलतरुर्मधुना मद्येन परिपूरितं यत् कामिनीमुखकमलं तस्य गण्डूषसेकात् तद्रसमात्मकुसुमेषु बिभ्रदिव रराज। तरू रराजेत्यत्र रो रीति लोपे द्र्लोप इति दीर्घः।

अन्तरा निपतितो मधुकरैः किर्मीरितश्चित्रः कङ्केलिगुच्छोऽशोकगुच्छोऽर्धनिर्वाणमर्धोपशान्तं यन्मनोभवचिताचक्रं तदनु-

---

१ भुवनविजयप्रयाण- A D C D F H २ तमेव B C D G H ३ मधुरमधुपू- A B C D F G H ४ मुखकमलगण्डूष- A D F G H ५ -षसेकानुरागादिव A D F H -षसेकादिव B C -षसेकानुरागादिव G ६ तद्रसमात्मनस्त्वमात्म- A B C F G ७ -किर्मीरितः A B C D E F G H इति आत्म० ष नर० ष।

वलयो वास्तविक इव विवर्धितसुखाशः सत्कविकाव्यबन्ध [1]इवावद्धतुहिनः सत्पुरुष इव दोषानुबन्धरहितः कैवर्त [2]इवावद्धराजीवोत्पलशालः समृद्धकासारशकुनिसार्थ इव निन्दित-

---

वास्तविक इव तात्त्विकपदार्थ इव विवर्धिता सुखस्याशा येन। पक्षे। विशेषेण शरदपेक्षया वर्धितः सुखाशो राजतिमिषः। केचित् तु वास्तविको वाटिकापाल इत्याहुः।

सुखाशो राजतिमिषः शोभनाशाप्रचेतसोः।

इति विश्वः।

सत्कविकाव्यबन्ध इवावद्धान्यप्रयुक्तानि तु हि नाव्ययानि यत्र। पक्षे। तुहिनं हिमम्।

सत्पुरुष इव दोषस्यानुबन्धेन रहितः। पक्षे। दोषा रात्रिस्तदनुबन्धेन रहितः। रात्रिह्रासारम्भकत्वात् तदपचपातितेति भावः। मीने मेषे वसन्तः स्यात्। मीनराशिस्थसूर्यस्य नवांशोत्तरं दिनमानम्।३०।३। रात्रिमानम्।२८।५७। इति प्रसिद्धं ज्योतिषे।

कैवर्त इव दाश इवावद्धा राजीवोत्पलशाला मत्स्यभेदा येन सः।

राजीवाख्या मृगे मत्स्ये पद्मे राजोपजीविनि।

इति विश्वप्रकाशः। कैवर्तं दाशधीवरौ।

रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः।

---

१ इवाबद्ध- D २ इव बद्ध- B C

मरुबकः शक्र इवेन्द्राणीरुचिर्महावीर[1] इवाधरीकृतदमनकः खिङ्ग इवाम्लानसुभगो वसन्तकाल आजगाम।

इति द्वयोरमरः। पक्षे। राजीवं पद्ममुत्पलं कुवलयं शाला वृक्षाः। स्यादुत्पलं कुवलयमित्यमरः।

शालः पादपमात्रे स्यात् प्राकारे शङ्कुकद्रुमे।

इति विश्वप्रकाशः।

समुद्गकासारस्तत्सम्बन्धी शकुनिसार्थः पक्षिसमूहः। समीरणो मरुवकः। कासारः सरसी सरः। शकुन्तिपक्षिशकुनि-इति त्रिष्वमरः। मरुआ इति लोके। यद्वा मरुवकः पिण्डीतकः।

पिण्डीतको मरुवकः श्वसनः करहाटकः।

इत्यमरः। मैनफल इति लोके। पक्षे। मरुबको मरुदेशस्थो बकः।

शक्र इवेन्द्राणी शची तस्यां रुचिरभिलाषो यस्य। पक्षे। इन्द्राणी निर्गुण्डी।

सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि।

इत्यमरः। मेउडी इति ख्याता लोके। वसन्तप्रकरण एव दमनकक्षेपवर्णनान्महावीर इवेति प्रक्षिप्तः पाठः।

खिङ्ग इव विट इवाम्लानसुभगः। पक्षे। अम्लानैर्महासहाभिः सुभगः। अम्लानस्तु महासहेत्यमरः। कठसरैया इति ख्याता।

---

१ -रुचिरसरो महावीर A B -रुचितो महावीर C F H

[1]सेन्द्रनीलमणिमयी मुक्तावलीव मधुश्रियो रुरुचे। विरहिणां[2] हृदयमथनाय कुसुमशरस्य [3]चक्रमिव नागकेसरकुसुममशोभत। पथिकजनहृदयमत्स्यं ग्रहीतुं मकरकेतोः पलाव इव पाटलिपुष्पमदृश्यत[4]। कन्दर्पकेलिसम्पल्लम्पटलाटील-

---

कारी विरहिणां हृदयदाहं मनस्तापमुद्वाह। वह प्रापणे। निर्वाणमस्तङ्गमनमिति विश्वः।

अलिकुलशबला विकचविचकिलराजिर्मधुश्रिय इन्द्रनीलमणिमयी मुक्तावलीव रुरुचे।

विरहिणामिति स्पष्टम्।

पथिकजनहृदयमत्स्य ग्रहीतुं कुसुमकेतोः पलाव इव पलेन मांसेनावति मत्स्यानां तृप्तिं जनयति हन्ति वा पलावो वडिशं तद्वत् पाटलिपुष्पमदृश्यत। सदारैरिति शेषः। पाटलिः पाटला मोघेत्यमरः। पाडला इति लोके।

वायोः शृङ्गारितां पुरस्कृत्य तत्तद्देशाङ्गनाभिः सह समागमनुप्रासेनाह। मलयानिलो ववाविति सम्बन्धः। कन्दर्पकेलिसम्पत् कामक्रीडासम्पत्तिस्तस्यां लम्पटाः सक्ता लाट्यो लाटदेशस्त्रियस्तासां ललाटतटः। धम्मिल्ल. संयताः केशास्तयोर्मलनेन मिलितः परिमलो जनमनोहरो गन्धस्तेन मत्तभृङ्गमधुरिमगुणः। धम्मिल्लः संयताः कचा इत्यमरः।

---

१ सा सलिलेन्द्र- C २ -शोहद A B Γ ३ समाटचक्र । B इति मर॰ च। ४ -मशोभत D

[1]लाटतटधम्मिल्लमल्लमिलितपरिमलसम्बद्धमधुरिमगुणः का-[2]मकलाकलापकुशलचारुकर्णाटसुन्दरीस्तनकलशघुसृणधू-[3]लिपरिमलामोदवाही [4]करणरसिककान्तकुन्तलीकुन्तलोल्ला-सनसङ्क्रान्तपरिमलमिलितालिमालामधुरतरझङ्काररवमुखरि-तनभस्तलो नवयौवनरागतरलकेरलीकपोलपालिपत्त्रावली-

---

कामकलाकलापकुशलाः प्रवीणा याः कर्णाटसुन्दर्यस्तद्दे-शाङ्गनास्तासां स्तनकलशेषु घुसृणं कुङ्कुमं तद्धूलिपरिमलस्तदा-मोदोऽतिनिर्हारी गन्धस्तद्वाही। स्तनखर्शी ध्वनिरत्र।

कुङ्कुमं पीतकावेरं घुसृणं कुसुमात्मकम्।

इति हारावली। आमोदः सोऽतिनिर्हारीत्यमरः।

करणेषु गीताङ्गहारसंवेशक्रियादिषु रसिकाः कान्ताः कु-न्तल्यः कुन्तलदेशाङ्गनास्तासां कुन्तलानां केशानामुल्लासनेन सङ्क्रान्तपरिमलस्तेन मिलितालिमाला भ्रमरपङ्क्तयस्तासां मधु-रतरझङ्कारै रवैर्मुखरितनभस्तलः। अनेन कचग्रहणं मणितं च ध्वनितम्।

करणं साधने चेत्रे कायकायस्थकर्मसु।

गीताङ्गहारसंवेशक्रियाभेदेन्द्रियेषु च।

वास्तवादौ च करणः स्मृतः शूद्राविशोः सुते।

---

१ लाटविकटधम्मिल्ल A B लाटतटविकटधम्मिल्लमाल्लामि- C लाटतटविकट-धम्मिल्लभारसम्पर्कमल्लिकामि- D २ मकलाकलापचार- A B C D F H स॰ -सुन्दरीसुन्दरस्तन- A B D E F G H ३ समस्तधू C -स्तनघुसृणधू- D ४ करचरणककरणरसिक- C

परिचयचतुरश्चतुःषष्टिकलाकलापविदग्धमुग्धमालवनित-[१]म्बिनीनितम्बबिम्बसंवाहनकुशलः [२]सुरतश्रमपरवशान्ध्रीनीर-[३]न्ध्रपीनपयोधरभारनिदाघजलकणनिकरशिशिरितो मलयानिलो[४] ववौ[५]।

अत्रान्तरे वासवदत्तासखीजनादिदिताभिप्रायः[६] शृङ्गारशेखरः [७]स्वसुतायाः स्वयंवरार्थमशेषधरणितलभाजां[८] [९]राज्ञामेकत्र [१०]सङ्गममकरोत्।

ततो [११]दग्धकृष्णागुरुपरिमलामोदमोदितमधुव्रतव्रात-

इति विश्वप्रकाशः

नवयौवनरागतरलकेरलीनामित्यादि। कपोलपालिपत्रावल्लीपरिचये सम्बन्धे चतुरः। अत्र परिचयेन निर्माणमपि ध्वनितम्। नितम्बसंवाहनं तत्स्पर्शोऽपि। स्पष्टम्।

अत्रान्तरे वासवदत्तायाः सखीजनादिदिताभिप्रायः शृङ्गारशेखरः स्वसुताया वासवदत्तायाः स्वयंवरार्थं समयनृपतीनां सङ्गममकरोत्।

ततो भूभुजां सम्मेलनोत्तरं वासवदत्ता सद्यमादरोत्थ्य-

१ -मालवीनितम्ब- C E F H, -मालवीनितम्ब- D २ सु॰ -परवशान्ध्रवधूपयो- C F ३ न्ध्र॰ -शिशिरितमलय- A B C D F H ४ -मारुतो A B G H ५ समार D इति सद॰ च। ६ -मावेदिताभिप्रायः C H ७ सुतायाः A B G स्वसुतास्वयं- C D ८ -धरणिभाजां A B F H ९ भूभुजामेकत्र D E H १० स- ङ्गति- A B G सङ्गम- D F संवर्त- H ११ द॰ -मलामोदितमधु- D H द॰ -मधुकरमाहात- A B G द॰ -मधुव्रतमाहात- C D H द॰ -मधुव्रतव्रात- F

[1]बहलगुमगुमायितमुखरितमतिरभसहासच्छटादीधितिधव-
[2]लिमपरिमिलितमनेकपरिहासकथाकलापविदग्धशृङ्गारि-

न्यः। दग्धः कृष्णागुरुः कालागुरुस्तदामोदमोहितमधुपसमा-
तानां बहलगुमगुमायितेन मधुराव्यक्तशब्देन मुखरितम्।
अतिरभसेति। चेटीनामित्यादिरस्य। अनेकेषां भूपतीनां
परिहासः कुलवयोरूपगुणहीनत्वेन परिहासः। कथाकलापः
योग्यानां वंशादिवर्णनसमुदायस्तत्र विदग्धश्चतुरस्तज्ज्ञो यः
शृङ्गारिजनो लोको नायिकानायकस्वभावाभिज्ञः सखीरूप-
स्तेन समाकुलं व्याप्तम्।

जनो लोके महर्लोकात् परलोके च पामरे।

इति विश्वप्रकाशः

कपोलाचिकुरौ शोभा भित्तौ च सहस्रनाम्।
विदीर्णस्त्वथ मध्यानामधमानां सशब्दकः॥

सो हास इति वाग्भटालङ्कारः। तथाच कालिदासः। ततो
नृपाणां श्रुतवृत्तवंशेति। यद्वा। अनेकपरिहासकथाकलापे
द्वयोः परस्परानुरागानन्तरमनेकपरिहासकथाकलापे विद-
ग्धः। शेषं पूर्ववत्। तथाच कालिदासः।

तथागतायां परिहासपूर्वं सख्यां सखी वेत्रधरा बभाषे।
आर्ये व्रजामोऽन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श॥

---

१ बहलगुगुमा- A D H बहलगुमगुमा- C E G H बहलघुमघुमा- F २ लि. सर्पट- C F लि॰ -कथालापवि- A B C D F H लि॰ -कथाकलावि- G लि॰ -शृङ्गारसपत्न- A B C D F H

परिचयचतुरश्चतुःषष्टिकलाकलापविदग्धमुग्धमालवनित-[1]म्बिनीनितम्बबिम्बसंवाहनकुशलः [2]सुरतश्रमपरवशान्ध्रीनीर-[3]न्ध्रपीनपयोधरभारनिदाघजलकणनिकरशिशिरितो मलयानिलो[4] ववौ[5]।

अत्रान्तरे वासवदत्तासखीजनाद्विदिताभिप्रायः[6] शृङ्गारशेखरः [7]स्वसुतायाः स्वयंवरार्थमशेषधरणितलभाजां[8] [9]राज्ञामेकत्र [10]सङ्गममकरोत्।

ततो [11]दग्धकृष्णागुरुपरिमलामोदमोदितमधुव्रतव्रात-

इति विश्वप्रकाशः

नवयौवनरागतरलकेरलीनामित्यादि। कपोलपालिपत्रावलीपरिचये सम्बन्धे चतुरः। अत्र परिचयेन निर्माणमपि ध्वनितम्। नितम्बसंवाहनं तत्स्पर्शोऽपि। स्पष्टम्।

अत्रान्तरे वासवदत्तायाः सखीजनाद्विदिताभिप्रायः शृङ्गारशेखरः स्वसुताया वासवदत्तायाः स्वयंवरार्थं समग्रनृपतीनां सङ्गममरोत्।

ततो भूभुजां सम्मेलनोत्तरं वासवदत्ता सखीमाकरोदित्य-

---

१ -मालवनितम्ब- C E F H, -मालवीनितम्ब- D २ सु० -परागमपरवशी- C F ३ स्प० -शिशिरितमलय- A B C D F H ४ -मारुतो A B G H ५ ववार D इति नास्ति घ। ६ -माविदिताभिप्रायः C H ७ सुतायाः A B G स्वसुतार्थं- C D ८ -धरणिभाजां A B F H ९ भूभुजामेकत्र D E H १० स-ङ्गमं- A B G सङ्गम- D F संगति- H ११ द० -मधुमोदितमधु- D H द० -मधुकरमाला- A B G द० -मधुकरमाला- C D H द० -मधुकरव- F

[1]बहलगुमगुमायितमुखरितमनिरभसहासच्छटादीधितिधव-
[2]लिमपरिमिलितमनेकपरिहासकथाकलापविदग्धशृङ्गारि-

न्चयः। इग्धः कृष्णागुरुः कालागुरुस्तदामोदमोहितमधुप्रतमा-तानां बहलगुमगुमायितेन प्रचुराव्यक्तशब्देन मुखरितम्।

अनिरभसेति। चेटीनामित्यादिरस्य। अनेकेषां भूपतीनां परिहासः कुलवयोरूपगुणहीनत्वेन परिहासः। कथाकलापः योग्यानां वंशादिवर्णनसमुदायस्तत्र विदग्धश्चतुरस्तज्ज्ञो यः शृङ्गारिजनो लोको नायिकानायकरसभावाभिज्ञः सखीरूपस्तेन समाकुलं व्याप्तम्।

जनो लोके महर्लोकात् परलोके च पामरे।

इति विश्वप्रकाशः

कपोलाविकृतोत्प्रासो भिन्नोष्ठः स महात्मनाम्।

विदीर्णास्यश्च मध्यानामधमानां सशब्दकः॥

सो हास इति वाग्भट्टालङ्कारः। तथाच कालिदासः। ततो नृपाणां श्रुतवृत्तवंशेति। यद्वा। अनेकपरिहासकथाकलापे द्वयोः परस्परानुरागानन्तरमनेकपरिहासकथाकलापे विदग्धः। शेषं पूर्ववत्। तथाच कालिदासः।

तथागतायां परिहासपूर्वं सख्यां सखी वेत्रधरा बभाषे।

आर्ये व्रजामोऽन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श॥

---

१ बहलगुङ्गुमा- A D H बहलगुमगुमा- C E G H बहलघुमघुमा- F २ लिमपरि- C F लि॰ -कथालापवि- A B C D F H लि॰ -कथाकलावि- G लि॰ शृङ्गारसपक्ष- A B C D F H

जनसमाकुलं दह्यमानसुगन्धिसारभाक्रष्टपुरोपवनषट्पदकुलसमाकुलमर्जुनसमरमिव नन्दिघोषमुखरितदिगन्तरं[१] मञ्चमारुरोह वासवदत्ता।

तत्र[२] च[३] केचित् कलाङ्कुरा इव विजितनगरमण्डना

इति।

दह्यमानेति पूर्वविशेषणेन गतार्थम्।

अर्जुनसमरमिव नन्दिघोषेण तदभिधानेन रथेन मुखरितदिगन्तरम्। तदुक्तम्।

गाण्डीवं धनुरेतस्य हनूमान् ध्वजभूषणम्।

नन्दिघोषो रथश्चास्य गतिस्तस्य न भूतले॥

इति। पक्षे। नन्दिरानन्दनो घोषस्तूर्यादिशब्दस्तेन मुखरितदिगन्तरम्।

नन्दिरानन्दने प्रोक्तः प्रतीहारे हरस्य च।

इति विश्वप्रकाश.। यद्वा नन्दिर्जामातृसुहृज्जन इत्यर्थः। तेषां घोषेणेति पूर्ववत्।

नन्दिरानन्दजामातृमित्रयोरपि चेष्यते।

इत्युत्तरतन्त्रम्।

तत्र तेषु केचित् कलाङ्कुरा इव मूलदेवा इव विजितनगरमण्डना विजिततदभिधानवेश्याः कलाङ्कुरेण कामशास्त्रकलाभिज्ञतया नगरमण्डना वेश्या जितेति वार्ता।

---

१ -म्नम C घरदिङ्मुख D २ यत्र A B C D F G H ३ — च D I F G H

अपरे पाण्डवा इव [1]दिव्यचक्षुःकृष्णागुरुपरिमिलिता अन्ये शरद्दिवसा इव [2]सुदूरप्रवृद्धसुखाशा[3] इतरे व्याहन्तुमुद्यता

कर्णीसुतो मूलदेवो मूलभद्रः कलाङ्कुरः।

इति हारावली। विजितं नगरस्य मण्डनं भूषणं यैस्ते। सर्वोत्कृष्टभूषणधारणादिति भावः। पक्षे। विना गरुडेन जितं नगरं बाणपुरं तस्य मण्डना बाणासुरतुल्या राक्षसा इवेत्युपहासोऽपि।

अपरे पाण्डवा इव दिव्यचक्षुः कृष्णः कृष्णा द्रौपदी गुरवो द्रोणादयो द्रौपदीगुरवो वा तैर्मिलिताः। पक्षे। दिव्यचक्षुषः सुलोचनाश्च ते कृष्णागुरुपरिमिलिताश्च कालागुरुधूपधूपायितसर्वाङ्गास्ते। पक्षे। दिव्यचक्षुषोऽन्धाः कृष्णाः श्यामवर्णा अगुरुपरिमिलिता गुरुरक्षणरहिता इत्युपहासः।

दिव्यचक्षुः सुनयने कृष्णोऽन्धे मिंढकेऽपि च।

इति धरणिः। विद्ः परिमलं गन्धे रक्षणेऽपि चेति विश्वः।

अन्ये शरद्दिवसा इव सुदूरं प्रवृद्धाः सुखाशा राजतिमिषा येभ्यस्ते। सुखाशानां वसन्ते वृद्धेरिति भावः। पक्षे। सुदूरं प्रवृद्धा सुखस्य वासवदत्तारतिसदृशोत्सवस्याशा येषां ते। पक्षे। सुदूरं प्रवृद्धा सुष्ठु खमिवाकाशमिवाशा येषां ते। ईप्सिता लभ्यैर्व्यर्थत्वादिति भाव इत्युपहासः।

अपरे व्याहन्तुं परान् हन्तुमुद्यता इव स्वयमार्थिनः स्वैः-

---

१ दिव्यचक्षुः A B H २ दूर- C D F ३ -खाशा A B H

इव स्ववलार्थिनः केचिच्छाधा इव शकुनश्रावकाः केचिदाखेटका[1] इव रूपानुसारप्रवृत्ताः केचिज्जैमिनिमतानुसारिण इव तथागतमतध्वंसिनः केचित् खञ्जना इव सांवत्सरफलदर्शिनः केचित् सुमेरुपरिसरा इव कार्तस्वरमयाः केचित्

न्यार्थिनः। पक्षे। सुष्ठु शोभनाबला वासवदत्ता तदर्थिनः। स्वस्मै बलं पराक्रममर्थयन्ते वैद्यादिभ्यस्त इत्युपहासः।

केचिदाखेटा मृगया तदासक्ता रूपस्यानुसरणे प्रवृत्ताः। केचिज्जैमिनिमतानुसारिणो मीमांसानुसारिणस्त इव तथागतानां नास्तिकानां मतध्वंसिनः।

सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः।

इत्यमरः। पक्षे। तथागतानां यथा स्वगेहे स्थितास्तथागतानां न तु सभोचितवस्त्रभूषणधारिणां सौन्दर्याभिमानजुषां मतम्। किमिव हि मधुराणां मण्डनं नाकृतीनामित्येवं रूपं तद्ध्वंसिनस्तच्चिन्दकाः। पक्षे। तथागतं कुलपरम्परोचितं मतं शैवादिमतं तद्ध्वंसिनो नाशकाः। आचारहीनतायोपहासबोधम्। तथाच श्रीहर्षः। जनः क्रियाचारमुचं विगायतीति।

केचित् खञ्जना इव सांवत्सरो ज्यौतिषिकस्तद्वत् फलदर्शिनः। यथा ज्यौतिषिको तिथ्यादिप्रश्ने निधिरूपफलं दर्शयति। एवं खञ्जना अपि मरतादिना तिथ्यादिफलं दर्शय-

---

१ -टिक C D

इव विश्वरूपावलोकनजनितेन्द्रजालप्रत्ययाः[१] केचिदात्मनि वारणबुद्ध्या बलवन्तोऽपि सुवाहाः केचित् पाणिग्रहणार्थिनो-

---

दर्शनेन जनितेन्द्रजालप्रत्ययाः। तथाच कन्दर्पकेतुवर्णनप्रस्तावे मूलकार एव स्वस्यैव नैपुण्यस्य सौन्दर्येत्यादि स्पष्टमेव वक्ष्यति। अतो द्वयोरभूतपूर्वं सुरूपयोः संयोजनम्। अतएव स्वप्नदर्शनो-त्तरं कन्दर्पकेतौ साभिलाषा वृथैवेत्यादिनाननुरूपभर्तृसङ्गता अन्या निन्दयिष्यति। अतत्त्वज्ञलमत्र व्यङ्ग्यम्।

केचिदात्मनि स्वस्मिन् वारणबुद्ध्या गजबुद्ध्या बलवन्तोऽपि सबला अपि सुवाहाः सुखेन वाहो वहन येषां तादृशाः। वह प्रापणे घञ्। यो ह्यतिबलः पुमान् स न पुरुषान्तरेण सुखोद्वहनीय इति विरोध'। पक्षे। शोभना वाहा अश्वा येषां ते। यद्वा वाहा भुजा येषाम्। वाहो बाहुतुरङ्गयोरिति शाश्वतः। पक्षे। सुवाहाः शोभनाश्वजातिपुरुषास्ते वृषजाति-पुरुषा इव न यथाकथञ्चिदपि जातित्रयनायिकोपयुक्ता इति दिक्। प्रपञ्चस्तु रतिरहस्यादौ द्रष्टव्यः। अत्रोपहासबीजं तत एवावधेयम्।

पाणिग्रहणार्थिनो वासवदत्तापाणिग्रहणार्थिनः। असुकरं दुष्करं मन्यमाना'। स्वेच्छामत्त्वेऽपि स्वयंवराधीनत्वात् तस्य। पक्षे। असुकरमसव. प्राणास्तत्कारक प्राणप्रदम्।

---

१ जालाद्भुतप्रत्यया A B C I G H -प्राया L.

ऽप्यसुकरं मन्यमानाः केचिदधरीभूता[1] अपि स्थिराः केचित् पाण्डुपुत्रा इवाक्षहृदयाज्ञानहृतक्षमाः [1]केचिद्बृहत्कथानुबन्धिनो गुणाढ्याः केचित् तिर्यग्गतयः [2]सुगन्धवाहाः

केचिदधरीभूता अपृथ्वीभूता अपि स्थिराः पृथिव्य इति विरोधः । विश्वम्भरा स्थिरा । धरा धरित्रीत्यमरः । पक्षे । अधरीभूता हीनतामापादिता अपि स्थिरा निश्चला इति परिहारः । स्फुटमेवात्रोपहासबीजं निर्लज्जतारूपम् ।

केचित् पाण्डुपुत्रा इवाक्षहृदयस्य पाशकतत्त्वस्याज्ञानाद्धृतक्षमा हृतभूमयः । पक्षे । अक्षाणां वासवदत्तासम्बन्धिनामिन्द्रियाणां हृदयस्य तत्त्वस्य मनसो वाज्ञानेनानवबोधनेन हृतक्षमा गतशान्तयः । इयमङ्गीकरिष्यति न वेति व्याकुलीभूता इति भावः । तरलताच दोषः ।

केचिद्बृहत्कथानुबन्धिनो बृहत्कथाख्यग्रन्थकर्तारो गुणाढ्याख्यनामानः कवयः । बहुवचनं पूजार्थम् । पक्षे । बृहत्कथानुबन्धिनो बहुकथावक्तारो गुणाढ्या गुणैः सन्ध्यादिभिरन्विताः । पक्षे । गुणैर्वागुरादिभिराढ्याः । सर्वदा मृगयासक्ततया व्यसनिता दोषः ।

केचित् तिर्यग्गतयः कुटिलमार्गगामिनः सुगन्धवाहाः सुग-

---

१ इति सर० च । -रोभूता A B C H इति जग० च । १ के० -पानिष- A B
२ इति जग० च । — छ- C D E F G इति सर० च ।

केचित् कौरवसैनिका इव द्रोणाशासूचकाः केचित् कुमुदाक-रा इवासोढशूरभासः स्थिता राजपुत्राः। [1]तानेकैकशः समव-

न्धधारिणः। पक्षे। तिर्यग्गतयो वायवः। वायोस्तिर्यग्गमनं वैशेषिकभाष्ये। सुगन्धवाहाः शोभनवायवः।

केचित् कौरवसैनिका इव द्रोणाचार्यादाशा जयाशा तत्सूचकाः। द्रोणाचार्योऽस्मत्सेनापतिरिति नास्माकं पराजय इत्येवं परस्परसूचकाः। पक्षे। द्रोणः काकस्तस्मादाशा वासवदत्ताप्राप्त्याशा तत्सूचकाः। उक्तं च स्थानस्थितप्रकरणे वसन्तराजे।

इष्टार्थदोऽश्वादिकवाहनस्थस्तथादिसंस्थस्सदवाप्तिकारी।
वध्वागमं जल्पति तोरणस्थो ह्यथार्थदो ह्यतस्थितश्च॥

इत्यादि।

द्रोणः कृपीपतौ कृष्णकाके स्याद्‌ढकेऽपि च।

इति विश्वप्रकाशः।

केचित् कुमुदव्रजा इवासोढशूरभासोऽसोढसूर्यकान्तयः। पक्षे। शूरो वीरः। तालव्यादिः शूरशब्दः सूर्यवाचकोऽपि। शूरश्चारभटे सूर्य इति विश्वः। सुभटे शूरः सूर्ये च दृश्यत्येऽपीत्यूष्मविवेकः।

तानेकैकशः समवलोक्य विरक्तहृदया। वर्णितदोषदर्शनात्। असौ कुमारिका कर्णवशान्मञ्चादवततार। मञ्चोकवचनाश्च वीप्सायामित्यत्र चकारो वीप्सायामित्यस्यानन्तरं द्रष्टव्यः। मञ्चो-

---

[1] पयमा- A B

लोक्य विरक्तहृदयासौ[1] कुमारिका [2]तस्मात् [3]कर्णवंशाद-वततार।

अथ तस्यामेव रात्रौ स्वप्ने वालिनमिवाङ्गदोपशोभितं कुहू-कण्ठमिव[4] हारिकण्ठं कनकमृगमिव रामाकर्षणनिपुणं जय-

---

कवचनादीप्सायां च। चात् स्वार्थेऽपि। स चाभिधानस्वभावा-देकशब्दादेव। तेनैकशब्दादीप्सायां शसाभावे द्विर्वचनेऽत्यन्त-स्वार्थिके शसि पक्षे जातैकैकश इत्येतत्सिद्धिः। कर्णवंशो भवे-न्मञ्च इति हारावली।

अथागतेषु राजकुमारेषु विरागोत्तरं तस्यामेव तद्दिवस-सम्बन्धिन्यामेव रात्रौ स्वप्ने निद्रायां सा युवानं ददर्शेत्यन्वयः।

वालिनमिवाङ्गदेन तन्नामकवानरेण। वालिनमिवेत्यादि-धर्मराजमाचकाङ्क्षदित्यन्ते माधुर्यं गुणः। पक्षे। अङ्गदेन केयू-रेण। कुहूकण्ठमिव कुहू इति कण्ठो ध्वनिरस्य तमिव कोकि-लमिव हारिकण्ठं मनोहरस्वरम्। पक्षे। हारी हारयुक्तो मनोहरो वा कण्ठो गलो यस्य तम्।

कनकमृगमिव रामस्य दाशरथेराकर्षणनिपुणम्। मारीच-नामा राक्षसः कनकमृगो बभूवेति प्रसिद्धं रामायणे। पक्षे। रामाणां स्त्रीणाम्।

---

१ -हृदया A B -हृदया सा C D F H २ — तस्मात् D H ३ कर्णो॰-याद- C F H ४ मुखमिव A B C D E F G H इति अग्र॰ च।

न्तमिव वचनामृतानन्दितवृद्धश्रवसं कृष्णमिव [1]कंसदर्पं न कु-
र्वन्तं महामेघमिव विलसत्करकमादिकन्दं [2]रूपपादपस्या[3]-
रोहणगिरिं [4]शृङ्गाररत्नस्य[5] प्रभवगिरिं सुन्दरकथानदीनां
सुरभिमासं वैदग्ध्यसहकारस्यादर्शतलं सौजन्यमुखस्यादि-

जयन्तमिवेन्द्रपुत्रमिव वचनामृतेनानन्दितो वृद्धश्रवा इन्द्रो येन तम्।

वृद्धश्रवाः शुनासीरः पुरुहूतः पुरन्दरः।

जयन्तः पाकशासनिरिति द्वयोरमरः। पक्षे। वचनामृतैरानन्दिते वृद्धानां श्रवसी श्रोत्रे येन तम्। श्रुतिः स्त्री श्रवणं श्रव इत्यमरः।

कृष्णमिव कंसस्य दर्पस्तं न कुर्वन्तम्। तदन्तकलादित्यर्थः। पक्षे। कं जनं न सदर्पं कुर्वन्तमपितु सर्वमेव।

महामेघमिव विलसत्करकं स्फुरद्वर्षोपलम्। वर्षोपलस्तु करकेत्यमरः। पक्षे। करो हस्त एव करकः समासान्तः कप्।

रूपपादपस्य सौन्दर्यतरोरादिकन्दम्। शृङ्गाररत्नस्यारोहणगिरिं प्रादुर्भावाद्रिम्। रुह बीजप्रादुर्भावे। सुन्दरकथानदीनां रम्यकथानदीनां प्रभवगिरिमुत्पत्तिगिरिम्। सुरभिर्व-

---

१ कंसदर्पमकुर्वन्त C इति पाठ० च। २ शृङ्गारपा० A B C D F G H
३ -स्य रोहणगिरिं A B C D I H ४ भवकणुणर० A B C D I G H
५ -रत्नमहूषण D रत्नानां F G

बीजं[1] विद्यालतानां स्वयंवरपतिं कीर्तेः स्पर्धागृहं लक्ष्मीसरस्वत्योरादिगृहं[2] [3]शीलसम्पदां कोशमिव महासौन्दर्यस्य त्रिभुवनविलोभनीयाकृतिं युवानं ददर्श। स च चिन्तामणिनाम्नो राज्ञस्तनयः कन्दर्पकेतुर्नाम। सा च स्वप्न एव नामादिकमश्रौषीत्।

अनन्तरमहो प्रजापते रूपनिर्माणकौशलमिदं मन्ये स्वस्यैव

मन्तस्तत्सहितमासमिव वैदग्ध्यसहकारस्य। मीजन्ममेव मुखं तस्यादर्शतलम्। विद्यालतानामादिबीजम्। कीर्तेः स्वयंवरपतिम्। लक्ष्मीसरस्वत्योः स्पर्धागृहम्। तथाच कालिदासः।

निसर्गभिन्नास्पदमेकसंस्थमस्मिन् द्वयं श्रीश्च सरस्वती च।

इति।

शीलसम्पदामादिगृहम्। महासौन्दर्यस्य कोशमिव। त्रिभुवने त्रिभुवनस्य वा विलोभनीया विलोभनकर्त्री आकृतिर्यस्य तम्। कर्तर्यनीयर। स इति स्पष्टम्।

अनन्तरं जाग्रदवस्थायामिति वहुविध भाषमाणा सखीजनेन समं सुमूर्च्छेत्यन्वयः।

प्रथमे त्वभिलाषः स्याद्द्वितीये चिन्तनं भवेत्।
तृतीये तु स्मृतिः प्रोक्ता चतुर्थे गुणकीर्तनम्॥
उद्वेगः पञ्चमे प्रोक्तो विलापः षष्ठ उच्यते।

---

१ इति जग० च। मन्द A B C D F इति नर० च। २ सरस्वत्याः स्पर्धागृह कीर्तिलक्ष्म्योरादिगृह A B C D E F G H ३ कुलशील- D H

न्तमिव वचनामृतानन्दितवृद्धश्रवसं कृष्णमिव [1]कंसहर्षं न कु-
र्वन्तं महामेघमिव विलसत्करकमादिकन्दं [2]रूपपादपस्या[3]-
रोहणगिरिं [4]शृङ्गाररत्नस्य[5] प्रभवगिरिं सुन्दरकथानदीनां
सुरभिमासं वैदग्ध्यसहकारस्यादर्शतलं सौजन्यमुखस्यादि-

जयन्तमिवेन्द्रपुत्रमिव वचनामृतेनानन्दितो वृद्धश्रवा इन्द्रो येन तम्।

वृद्धश्रवाः शुनासीरः पुरुहूतः पुरन्दरः।

जयन्तः पाकशासनिरिति द्वयोरमरः। पक्षे। वचनामृते-रानन्दिते वृद्धानां श्रवसी श्रोत्रे येन तम्। श्रुतिः स्त्री श्रवणं श्रव इत्यमरः।

कृष्णमिव कंसस्य हर्षंस्तं न कुर्वन्तम्। तदन्तकत्वादित्यर्थः। पक्षे। कं जनं न सहर्षं कुर्वन्तमपितु सर्वमेव।

महामेघमिव विलसत्करकं स्फुरद्वर्षोपलम्। वर्षोपलस्तु करकेत्यमरः। पक्षे। करो हस्त एव करकः समासान्तः कप्।

रूपपादपस्य सौन्दर्यतरोरादिकन्दम्। शृङ्गाररत्नस्यारोहणगिरिं प्रादुर्भावाद्रिम्। रुह बीजप्रादुर्भावे। सुन्दरकथान-दीनां रम्यकथानदीनां प्रभवगिरिमुत्पत्तिगिरिम्। सुरभिवं-

---

१ कंसहर्षमकुर्वन्तं C इति अग॰ च। २ रूपपादपस्या- A B C D F G H
३ °स्य रोहणगिरिं A B C D I H ४ शृङ्गारस्य- A B C D I G H
५ रत्नपूरस्य D -रत्नानां F G

वनवासवैशसमवाप । सुधैवेन्दुमती महिष्यप्यजानुरागिणी बभूव। अफलमेव दुःष्यन्तस्य कृते शकुन्तला[1] दुर्वाससः शापमनुबभूव। निरर्थकं[2] मदनमञ्जरी नरवाहनदत्तं चकमे।

कन्दर्पकेलिपेचयाजादीनां कुरूपत्वमिति तासां तेष्वनुरागो वृथैवेति तु स्पष्टमेव।

महिष्याः मैरन्ध्या अजे कागेऽनुरागो विरोधाभासः। एतन्मूलकोऽपि परिहासः। यद्यपजवरणसमय इन्दुमत्या न महिषीत्वं तथापि वासवदत्तापरिहासदशायां तत्त्वेन न काप्यनुपपत्तिः।

अफलमेव दुःष्यन्तस्य राज्ञो न लोकाश्रयेति निषेधस्तु कारकषष्ठीविषयः। कृते तादर्थ्येऽव्ययम्। दुर्वाससः शापं यस्मिन्नासकहृदया स जनस्त्वां न स्मरिष्यतीत्येवंरूपमनुबभूव।

अर्थे कृतेऽव्ययं तावत् तादर्थ्ये वर्तते द्वयम्।

इति कोशकारः। स्पष्टं चैतदभिज्ञानशाकुन्तले।

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव॥

इति।

मदनमञ्जरी तन्नामिका स्त्री नरवाहनदत्तं राजविशेषं

---

१ + -वि A G H   २ -कमेव D

[१]निष्कारणमेवोरुयुगविनिर्जितरम्भा रम्भा नलकूबरमचीकम-
त[२]। [३]विफलमेव धूमोर्णा [४]स्वयंवरार्थागतानेकदेवगणगन्ध-

निष्कारणमेवाचकमत। कमेर्णिङभावे कमेश्चङीति वार्तिकाच्चङ्।

ऊरुयुगविनिर्जितरम्भा रम्भा स्वर्वेश्या निष्कारणमेव नलकूबरं कुबेरसूनुमचीकमत। अत्राप्यसंगतता। तथाच श्रीहर्षः।

> अस्मात् किल श्रोत्रसुधां विधाय
> रम्भा चिरं भामतुलां नलस्य।
> तत्रानुरक्ता तमनाप्य भेजे
> तन्नामगन्धान्नलकूबरं सा॥

उत्तमोपभोगिनो नीचे प्रवृत्तिर्निन्दाहेतुः। तथाच भर्तृहरिः।

> मत्तेभेन्द्रविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः
> किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी।

कमेर्लुङि कमेर्णिङिति स्वार्थे णिङि णिश्रीति चङि णेरनिटीति लोपे णौ चङ्युपधाह्रस्व चङीति द्वित्वम्। सन्वल्लघुनीति सन्वद्भावे सन्यत इतीत्वेऽभ्यासस्य दीर्घो लघोरिति दीर्घः। अट्।

धूमोर्णा स्वयंवरागतानेकदेवगणगन्धर्वमहर्षिषु। षष्ठी चानादर इति चकारादनादरे सप्तमी।ताननादृत्य धर्मराजं पितृपतिं विफलमेवाचकाङ्क्षत्। काङ्क्षि वाङ्क्षि माङ्क्षि काङ्क्षायाम्। लुङ्।

---

१ नि॰ मेचकमि A B नि॰ मेचकमित C D G H २ स्व॰ चकमे A B चकमचकमत I ३ निष्फलमेव C D ४ स्वयंवरार्थमागत C D H

वैसदृश्येषु धर्मराजमाचक्षाङ्क्षदिति[1] बहुविधं[2] चिन्तयन्ती[3] विरहमुर्मुरमध्यमधिरूढेव[4] वाडवाग्निशिखाकवलितेव कालाग्निरुद्रपावकग्रस्तेव पातालगुहाप्रविष्टेव [5]शून्यकरणग्रामे[6] हृदये लिखितमिवोत्कीर्णमिव प्रत्युप्तमिव कीलितमिव निगलितमिव [7]वज्रलेपघटितमिवास्थिपञ्जरप्रविष्टमिव मर्मान्तरस्थितमिव मज्जारसरसवलितमिव प्राणपरीतमिवान्तरात्मान-

---

इति बहुविधं चिन्तयन्ती। विरहमुर्मुरेत्यादिनाष्टमीमवस्थां वर्णयति। विरहतुषानलमधिरूढेव। मुर्मुरस्तु तुषानल इति वैजयन्ती।

वाडवाग्निर्वडवानलस्तच्छिखा ज्वाला तया कवलितेव। वाडवो वडवानलः। वह्नेर्द्वयोर्ज्वालकीलावित्युभयत्रामरः।

कालाग्निर्यो रुद्रपावकः शिवालिकनेत्रजन्मा तेन ग्रस्तेव।

इति विरहदाहमभिवर्ण्यान्ध्यं वर्णयति। पातालगुहायां प्रविष्टेव। शून्यकरणग्रामं शून्येन्द्रियवर्गं यद्धृदयं तत्र लिखितमिव। अन्तरात्मानमधिष्ठितमिवान्तरात्मनि स्थितम्। अधिशीडुग्यामां कर्मेति कर्मसञ्ज्ञा। पललं मांसं तत्र विभक्तमिव।

सप्तमीमवस्थां दर्शयति। उन्मत्तेव। अष्टमीमवस्थां व्या-

---

१ -माचचाङ्क्षेति A E F G H इति जन० च। -मचीकमतेति B -माकाङ्क्षदिति C २ धर्मराजचक्रम इत्यंनिधाम्यन्यान्यपि D ३ विचारयन्ती A B D विचिन्तयन्ती H ४ -मारूढेव A B C ५ निरस्तक- D ६ -ग्रामा A C D G -ग्रामेण B E F H ७ वज्रकपाटघ- E F H

मधिष्ठितमिव[१] [२]रुधिराश्रयद्रवीभूतमिव पललसंविभक्तमिव[३] कन्दर्पकेतुं मन्यमानोन्मत्तेव बधिरेव मूकेव शून्येव निरस्तकरणग्रामेव मूर्च्छागृहीतेव ग्रहग्रस्तेव यौवनसागरतरङ्गपरम्परापरिगतेव[४] रागरज्जुभिरपवारितेव[५] कन्दर्पकुसुमबाणैः कीलितेव [६]शृङ्गारभावनाविषघूर्णितेव रूपपरिभावनाशल्यखिलितेव मलयानिलापहृतजीवितेव प्रियसख्यनङ्गलेखे वितर हृदये पाणिपद्मं[७] दुःसहो[८] विरहसन्तापः। मुग्धे मदन-

---

धिमाह। वधिरेव मूकेव। नवमीमवस्थां जडतामाह। शून्येवेत्यादि। मदनव्याधिनिराकरणार्थं शिशिरोपचारं वर्णयन् पुनरष्टम्यवस्थां सूचयति।

प्रियसख्यनङ्गलेखे अनङ्गस्य लेखा यस्यां सा। ईषदुद्भूतमन्मथे विरहवेदनानभिज्ञतया शिक्षणं तदुपचारेषु। हृदये पाणिपद्मं वितर देहि। दुःसहो विरहसन्तापः।

मुग्धेऽनभिज्ञे मदनमञ्जरि चन्दनोदकेन सिञ्च। सरले मन्मथविकारानभिज्ञे वसन्तसेने केशपाशं केशकलापं संवृणु।

---

१ वज्रलेपघटितमिवाभरतात्मानमधिष्ठितमिव मर्माण्यस्थितमिव मज्जाभारधवलितमिव प्राणपरीतमिवास्थिपञ्जरप्रविष्टमिव A B वज्रकपाटघटितमिवास्थिपञ्जरस्थितमिव मर्मान्तरप्रविष्टमिव मज्जाभारवलितमिवाभरतात्मानमधिष्ठितमिव D
२ रुधिराश्रय- C H रुधिराश्रय- D ३ पललसम्पृक्तमिव C ४ -प्रतपरिगतेव F
५ रागरज्जुपरिवारितेव C रागरज्जुभि परिवारितेव F ६ — शृङ्गार- C शृङ्गाररसभा- D G H ७ -पद्मम् A B F G ८ + मे A B C

[१]मञ्जरि सिञ्च चन्दनोदकेन सरले वसन्तसेने[२] संवृणु केशपाशं[३] तरले [४]तरङ्गवति [५]विकिर केतकीधूलिं वामे [६]मदनमालिनि वीजय शैवलदलेन चपले [७]चित्रलेखे लिख चित्रे[८] चित्तचौरं जनं भाविनि विलासवति[९] निक्षिप[१०] मुक्ताचूर्णनिकरं रागिणि रागलेखे स्थगय नलिनीदलसमूहेन[११] पयोधरभारं कान्ते[१२] कान्तिमति [१३]मन्दमपनय बाष्पबिन्दून् ।

पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे ।

इत्यमरः ।

तरले चञ्चलचित्ते तरङ्गवति केतकीधूलिं केतकीपरागं विकिर । वामे विपरीतक्रियाकारिणि मदनमालिनि नलिनीदलेन वीजय । चपले चित्रलेखे चित्रे चित्तचौरं जनं लिख । भाविनि भावाभिज्ञे मुक्ताचूर्णनिकरं निक्षिप । रागिणि रागवति नलिनीदलसमूहेन पयोधरभारं स्थगयाच्छादय ।

कान्ते कान्तिमति मन्दं बाष्पबिन्दूनपनय । बिन्दूनिति बहुवचनं पीडाधिक्यसूचकम् । तथा च भरतः ।

बाष्पो नामाश्रुणः पूर्वमसौ सञ्जायते त्रिधा ।

---

१ मदनमञ्जरिके D २ -लेखे D F ३ -कलापं A B D F G H ४ तरङ्गलेखे A B G ५ विकर C H ६ सुन्दरमा- D ७ विभ्रमलेखे C ८ चित्रफलके C ९ भाववति E १० विक्षिप A B C F H ११ -दलेन A B F G H १२ सुकान्ते A B C D F H १३ मन्दमन्द- A C D F G H

एहि भगवति निद्रेऽनुगृहाण मां धिगिन्द्रियैरपरैः किमिति लोचनमयान्येव[१] ममाङ्गानि[२] न कृतानि विधिना भगवन् [३]कुसुमायुधायमञ्जलिस्तेऽनुचरो[४] भव भाववति तादृशे जने

निमित्तत्रयसम्बन्धादानन्देर्ष्यार्तिसम्भवः ॥

आनन्दे विलुठन् भवतीर्ष्यायां सतरङ्गितायासः ।

आर्तावजस्राविकलबहुवजलबिन्दुसन्दर्भः ।

इति । सप्तम्यवस्थामुन्मादं वर्णयति । व्यभिचारी चोन्मादः । अत्र विभावः प्रियवियोगविभवभ्रंशादयः । अनुभावो वृथालपितहसिताररोदनादयः ।

भगवति सर्वैश्वर्ययुते । प्रसन्नेयं तं पुनर्दृष्टिगोचरं करिष्यतीति स्तुतिः । निद्रे मामनुगृहाण । पूर्वं तत्सम्बन्धाद्यया सुखमनुभूतमेवं पुनरपि सुखानुभवं यथा करवै तथा रचयेत्यनुग्रह इत्यर्थः । अपरैरिन्द्रियैः किं तद्दर्शनेनानुपयुक्तत्वादुपेक्षा । इत्थंभूतस्य गम्यमानत्वात् तृतीया । गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका ।

वेधसा लोचनमयान्येव ममाङ्गानि न कृतानीति तं धिक् ।

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।

द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥

---

१ -दानि A B C D F G H २ सर्वाङ्गानि D ३ कुसुमायुध शरीराञ्जलिरनुचरो H ४ रनुचरो C D

मलयानिल [1]सुरतसमुत्कण्ठादीक्षागुरो वह यथेच्छमपगता मम प्राणा इति बहुविधं भाषमाणा सखीजनेन[2] समं मुमूर्च्छ।

अनन्तरं [3]परिजनप्रयत्नोच्छ्वसितजीविता[4] सती[5] क्षणमति-[6]शिशिरघनसाररसनिम्नगाकूलपुलिने [7]क्षणमतितुहिनमलयजरससरित्परिसरे क्षणमरविन्दकाननपरिचारितसरस्तट[8]-

---

इति शेषे तमित्यत्र द्वितीया।

भगवन् कुसुमायुधायमञ्जलिर्नमस्कारो भावत्यभिप्रायाभिज्ञे तादृशे जनेऽनुचरो भव। तस्य सेवको भवेत्यर्थः। यथा मां पीडयसि तथा तमपि पीडयेति त्वतिवात्सल्यादयोग्यत्वाच्च नाभ्यधायि। सम्बन्धं विना गुणाविष्काराभावेनान्यच्छपत्वेन हीनत्वादनुचरत्वोक्तिः।

मलयानिल समुत्कण्ठादीक्षागुरो यथेच्छं वह। यथेष्टवहनात् सोऽप्युत्कण्ठितो भविष्यतीत्यभिप्रायात् प्रार्थना। प्रार्थनायां लोट्। मे प्राणा अपगताः। वर्तमाने क्तः। पुंसि भूम्न्यसवः प्राणा इत्यमरः।

अनन्तरं परिजनप्रयत्नेनोच्छ्वसितं जीवितं यस्यास्तादृशी

---

१ सुरतोत्क A B C F G H सुरतमहोत्सवदी D २ मा सखीजने D ३ प॰ च्छ्वा॰ C H ४ मितहृदया जीविता D + च A B D F G ५ — सती C D H ६ शि॰ -सारसरसनि B H शि॰ सारसरोराजिनि॰ C ७ क्ष॰ -जलसमूह C D H ८ + निकट D

विटपिच्छायासु [१]क्षणमनिलोल्लासितदलेषु कदलीकाननेषु क्षणं कुसुमशय्यासु[२] क्षणं [३]नलिनीदलसंस्तरेषु[४] प्रलयकालोदितद्वादशरविकिरणकलापतीव्रविरहाग्निदह्यमानामतिक्षामां[५] विप्राणामिव तनुं [६]बिभ्रती प्रचलदमन्दमन्दरान्दोलित[७]-

---

सत्यतिशिशिरघनसाररसनिम्नगाकूलपुलिनेष्वतिशीतलकर्पूरजलनदीतीरे पुलिनेषु।

क्षणमतितुहिनमलयजरसमरित्परिसरेष्वतिशीतचन्दनजलनदीषु। क्षणमरविन्दकाननपरिवारितं यत् सरस्तस्य तटविटपिच्छायासु। क्षणमनिलोल्लासितानि दलानि येषां तादृशेषु कदलीकाननेषु। क्षणं कुसुमशय्यासु।

क्षणं नलिनीदलसंस्तरेषु नलिनीदलास्तरेषु।

प्रलयकालोदितद्वादशरवीनां किरणकलापवत् तीव्रो यो विरहानलस्तेन दह्यमानामतएवातिकृशां विप्राणां तनुमिव बिभ्रती। अर्थात् तनुमिति। मुहुर्मुहुः परिभावयन्ती दिक्षु लिखितमिवेत्यादौतस्ततो विलोकयन्ती व्यतिष्ठतेत्यन्वयः।

गुणकीर्तनरूपां चतुर्थीं दशां प्रचलदित्यादिना वर्णयति।

---

१ क्ष० -लोक्का- G H २ कुसुमशयनेषु शय्यासु D ३ कमलिनी- D ४ + क्षणं तुषारमहातलिलितिरलिमसाललेषु परिक्रमेण मा त्रौवसाना D ५ -मानमानमाक्षिक्षमां A B -मानातिक्षमां C E G -मानदृदयामतिक्षमां F -मानां क्षमां H इति मर० च। ६ विभाणा B C D इति मर० च। ७ + -मृग- C

[1]दुग्धसिन्धुतरलतरङ्गच्छटाधवलहासच्छुरिताधरपल्लवं तन्मु-खारविन्दं द्विजकुलमिव श्रुतिप्रणयि तदीक्षणयुगलं [2]सहज-सुरभिमुखपरिमलमाघ्रातुकामेव सुदूरविनिर्गता[3] सा नासा-वंशलक्ष्मी कलङ्कमुक्तेन्दुकलाकोमला[4] पीयूषफेनपटलपाण्डु-रा सा[5] [6]द्विजपङ्क्तिस्तदहृष्टचरमनङ्गमतिशयानं रूपं[7] धन्यानि तानि स्थानानि ते च जनपदाः पुण्यानि[8] नामाक्षराणि [9]च

प्रचलदमन्दो मन्दरस्तदान्दोलितः कम्पितो दुग्धसिन्धुस्तस्य तरलतरङ्गच्छटावद्धवलो हासो हास्य तेन छुरितमधरपल्लवं यस्य तादृश तन्मुखारविन्दं कन्दर्पकेतुमुखकमलम्।

द्विजकुलमिव ब्राह्मणसमूहमिव वंशमिव वा श्रुतिर्वेद कर्णश्च तत्र प्रणयि प्रश्रयवत् तदीक्षणयुगलम्। सहजेति कल-ङ्कमुक्तेति स्पष्टम्।

अनङ्गमतिशयान तदनिर्वचनीय रूपमदृष्टचरम्। भूतपूर्वे चरट्। धन्यानि तानि स्थानानि ते च जनपदा यत्र स वस-तीति शेषः।

तानि नामाक्षराण्यभिधानवर्णानि सुकृतभाञ्जि, पुण्यानि यान्यमुना परिष्कृतान्यलङ्कृतानीति परिभावयन्ती चिन्तयन्ती

---

१ द॰ दुग्धलहरल C दु॰ हासदन्तुरित C २ स॰ मुखकमलपरि A B E F G स॰ मन्दामोदमा A B D E F G H ३ सता C H मास्य E G ४ सलपो A B C E G H ५ मा A B रात्र F H ॰रद्दि F ६ द्वि॰ ॰ङ्क्तिरहष्ट A B E G H द्वि॰ मङ्गात्म C ७ ॰यामरूप A B D याम मदूप F ८ पुण्यनामा A B E F G H ९ — च E G

तानि सुकृतभाञ्जि यान्यमुना [१]परिष्कृतानीति मङ्गमुङ्गः परिभावयन्ती दिक्षु विदिक्षु[२] लिखितमिव नभस्युत्कीर्णमिव विलोचने[३] प्रतिबिम्बितमिव चित्रफलके लिखित्वा[४] पुरोदर्शितमिवेतस्ततो [५]विलोकयन्ती व्यतिष्ठत। अथ तस्याः सारिका तमालिका नाम तत्सखीभिः [६]सहालोच्य कन्दर्पकेतोर्भावमा-

---

दिक्षु विदिक्षु लिखितमिव नभस्याकाश उत्कीर्णमिव विकीर्णमिव विलोचने प्रतिबिम्बितमिव।

चित्रफलके लिखित्वा पुरो दर्शितमिवेतस्ततो विलोकयन्ती। अननुभूतमपि सङ्कल्पेनावलोक्यते। तदुक्तम्।

कामक्रोधभयोन्मादाचौरमर्पाद्युपद्रवात्।
अमत्यान्यपि पश्यन्ति पुरतोऽवस्थितानि च॥

इति। व्यतिष्ठत। समवप्रविभ्यः स्थ इति तङ्। पत्रहारिणी दूतीयम्।

कामिन्याः कामिनश्चापि सन्देशार्थां तु पत्रिकाम्।
प्रापयत्यचिरेणैतामाहुः पत्रस्य हारिकाम्॥

इति।

अथ तस्याः सारिका तमालिका। नामेति प्रसिद्धौ। तत्स-

---

१ पुरस्कृतानीति A B F G २ + च A D ३ -चनप्र- C -चनदो- F ४ चित्र-चित्रपटे लिखितमिव A B चित्रपटलिखितमिव C चित्रपटे D चित्रचित्रपटे लिखित्वा F चित्रफलके लिखितमिव G चित्रचित्रपटलिखितमिव H ५ इति कान्त० च। सालोक- A B F G ६ भमा- A B D

कलयितुं 'प्रस्थितागता च मयैव सार्धमत्रैव [1]तरोरधस्तात् तिष्ठतीत्युक्त्वा विरराम।

अथ[3] मकरन्दः सहर्षमुत्थाय तमालिकां विदितवृत्तान्तामकरोत् सा च कृतप्रणामा मकरन्दाय पत्रिकामुपानयत्[4]।

अथ स तां स्वयमेवावाचयत्[5]।

स्त्रीभिः सहालोच्य कन्दर्पकेतोर्भावं वासवदत्तानुरागमाकलयितुं प्रस्थिता मयैव सार्धं सहागता चात्रैव तरोरधस्तात् तिष्ठतीत्युक्त्वा विरराम।

अथ शुकवाक्यश्रवणोत्तरं मकरन्दः सहर्षमुत्थाय तमालिकां विदितो वृत्तान्तो यया तादृशीमकरोत्।

सा च तमालिकापि कृतप्रणामा सती मकरन्दाय पत्रिकामुपानयत्।

अथ स मकरन्दस्तां पत्रिकां मयि सत्येतावन्मात्रमपि प्रयासोऽस्य माभूदित्यभिप्रायात् स्वयमेवावाचयत्।

---

१ प्रहागता H २ तरोरधस्तिष्ठ॰ A B D F G H ३ + तच्छ्रुत्वा D ४ अथ सहर्षमुत्थाय मकरन्दो विदितवृत्तान्तां तमालिकामकरोत् सा तु कृतप्रणामा कन्दर्पकेतवे पत्रिकामुपानयत् A B अथ सहर्षमुत्थाय कन्दर्पकेतवे मकरन्दो विदितवृत्तान्तां तमालिकामकरोत् सा च कृतप्रणामा कन्दर्पकेतवे पत्रिकामुपानयत् C अथ तच्छ्रुत्वा सहर्षमुत्थाय मकरन्दो विदितवृत्तान्तां तमालिकामकरोत् सा च कृतप्रणामा कन्दर्पकेतवे पत्रिकामुपानयत् D अथ सहर्षमुत्थाय मकरन्दो विज्ञातवृत्तां तां तमालिकामकरोत् सा तु कृतप्रणामा कन्दर्पकेतवे पत्रिकामुपानयत् F अथ सहर्षमुत्थाय मकरन्दो विदितवृत्तां तमालिकामकरोत ततः सा कृतप्रणामा कन्दर्पकेतवे पत्रिकामुपानयत् H ५ अथ स्वयमेवादाय वाचयति A B अथ च तां स्वयमवाचयत् C अथ स्वयं वाचयति F अथ स तां स्वयमवाचयत् G H

प्रत्यक्षदृष्टभावाप्यस्थिरहृदया हि कामिनी भवति ।
स्वप्नानुभूतभावा द्रढयति न प्रत्ययं युवतिः ॥

तच्छ्रुत्वा[१] कन्दर्पकेतुरमृतार्णवमग्न इव सर्वानन्दानामुपरिवर्तमानो मन्दमुत्थाय[२] प्रसारितबाहुयुगलस्तमालिकामालिलिङ्ग[३] । अथ तयैव सार्धं किं करोति किं वदति कथमास्त इत्यादि सकलं वासवदत्तावृत्तान्तं पृच्छंस्तत्र तां निशां दिवसमप्यतिवाह्य[४] कन्दर्पकेतुश्चचाल ।

आर्ययाह । प्रत्यक्षं दृष्टो भावः पुरुषाभिप्रायोऽनया तादृश्यपि कामिनी हि यतोऽस्थिरहृदया मय्यनुरक्त एवासावित्यनिश्चलचित्ता भवति । स्वप्नानुभूतभावा युवतिः प्रत्ययं स्वप्नदृष्टं स्वानुरक्तत्वनिश्चयं न द्रढयति । न दृढीकरोतीत्यर्थः । प्रत्यक्षदृष्टे यत्रानिश्चयस्तत्र परोक्षे का वार्तेति भावः । काव्यार्थापत्तिरलङ्कारः । कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते । इति । आर्या छन्दः ।

लक्ष्मैतत् सप्त गणा गोपेता भवति नेह विषमे जः ।
षष्ठोऽयं न लघू वा प्रथमेऽर्धे नियतमार्यायाः ॥
षष्ठे द्वितीयलात् परके न्ले मुखलाच्च सयति पदनियमः ।
चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥

---

१ एतच्छ्रुत्वा A B ततश्श्रुत्वा D २ -परिमग्न इव मन्दमन्दमुत्थाय A B -परिवर्तमानममात्यार्थं मन्यमानो मन्दमुत्थाय D मन्दमथ प्रसा- F ३ -युगलमालिलिङ्ग C ४ + तस्मात् प्रदेशात् तया सह D

अत्रान्तरे भगवानपि मरीचिमाली तं वृत्तान्तमिव कथयितुं मध्यमलोकमवततार[1]। अथ वासरताम्रचूडचूडाचक्राकारश्चक्र-[2]वाकचक्रसङ्क्रामितसन्तापतयेव मन्दिमानमुद्वहन् [3]मन्दार-स्तवकसुन्दरः [4]सिन्दूराद्दतसुरराजकुम्भिकुम्भविभ्रमं [5]विभ्रा-[6]णस्ताण्डवचण्डवेगोच्छलितधूर्जटिजटाजूटकूटबन्धबन्धुरवि-

---

इति लक्षणात्। तच्छुलेति स्पष्टम्।

अथ तयैवेत्यपि स्पष्टम्।

अत्रान्तरे भगवान् मरीचिमाल्यपि वृत्तान्तं वासवदत्ताद्वृत्तान्तं कथयितुमिव मध्यमलोकं भूलोकमवततार।

अथ चरमार्णवपयसि ममज्जेति सम्बन्धः।

वासरमेव ताम्रचूडस्तस्य चूडाचक्राकारः। चक्रवाकानां चक्रं समूहस्तत्र सङ्क्रामितः सन्तापो येन तद्भावतयेव मन्दिमानमल्पतेजस्त्वमुद्वहन् मन्दारस्तवकसुन्दरः सिन्दूरेणाद्दतोऽभिभूतश्छादितो यः सुरराजकुम्भिकुम्भस्तद्विभ्रमं तदाकारत्वादस्यैकत्वान्नास्तीति विशिष्टभ्रमं विलासं च विभ्राणः। पूर्वत्रार्थेऽन्तर्भावितण्यर्थोऽत्र भ्रम्। द्विपायिशूर्पश्रुतिकुम्भिभोमजा इति हारावली।

---

१ -वासरत A B D G H २ इति जय॰ च। वाकचक्रहृदयस B D वाकचक्रवाकहृदयस F ३ मन्दारकुसुमस A C G ४ सिन्दूररञ्जितस A B सिन्दूराञ्चितस C D सिन्दूरासङ्गतस H ५ बिभाण मन्थ्यातास्य D F ६ ण॰ -ण्डोच्छलित D च॰ गेोच्छलित G ए॰ कूटबन्ध A B F H च॰ कूटमुकुटकोटिबन्ध- D

[1]कटवासुकिभोगमणिताटङ्कसनाभिमण्डलः [2]सन्ध्यासन्धिनी-[3]सरसयावकपटलचारुर्वारुणीवारविलासिन्यरुणमणिकुण्ड-लकान्तिः [4]कालकरवालकृत्तवासरमहिषस्कन्धचक्राकारो

ताण्डवे चण्डवेगेनोच्छलितेन जटाजूटकूटबन्धेन बन्धुर उन्नतानतोऽतएव विषमविन्यासो यो वासुकिस्तस्य भोगमणिः फणामणिः स एव ताटङ्कः स्त्रीणां कर्णभूषणं तत्सनाभिस्तत्तु-ल्यरूपो मण्डलो यस्य सः। वर्तुलत्वार्थं ताटङ्करूपकम्। बन्धुरं तून्नतानतमित्यमरः।

सन्ध्येव सन्धिन्यकालदुग्धा वृषाक्रान्ता वा गौस्तस्याः सर-सयावकपटवच्चारुः

पीनायाश्चातिदुग्धाया गोः शृङ्गाराय मानवाः।
रञ्जयन्ति शिरोदेशमन्यच्च बहुधा किल॥

क्वचिद्यावकपटलेति पाठः। अस्मिन् पाठे यावकपटलशब्देन यावकपटलमिव यावकपटलं लोकप्रसिद्धमेतद्दीतिपत्रविशेषं रञ्जनतिलकं विवक्षितम्।

सन्धिनी तु वृषाक्रान्तकालदुग्धगवोः स्मृताः।

इति विश्वप्रकाशः। सन्ध्यापुरश्चीति पाठः सुगमः।

वारुण्येव वारविलासिनी तस्या अरुणमणिकुण्डलवत् का-

---

१ क॰ -ताटङ्क- D क॰ -ताण्डङ्क E क॰ -मण्डलमण्डलमध्य- A B C D F H इति जग॰ च। २ सन्ध्याभिरम्भोमर- F ३ स॰ -पटचारु- B C H इति जग॰ च। स॰ -पटचारु- D इति भर॰ च। स॰ -लासिनीतुल्य- B C D H ४ कालकर-वालच्छिन्न- A B F दिनकरकरच्छिन्न- C H इति जग॰ च। दिनकरकर-वालच्छिन्ना D F का॰ -ओरवकमन्ध C D E G H

मधुपूर्णकपालपात्रमिव[१] कालकपालिनोऽम्लानकुसुमस्तबक[२] इव नभःश्रियो [३]गगनाशोकतरुस्तबक इव [४]कनकमयदर्पण इव प्रतीचीविलासिन्या भगवान् [५]दिनमणिरम्बरमार्णवपयसि तरलतरङ्गवेगोच्छलितविद्रुमविटपाकृतिर्ममज्ज[६]। [७]क्रमेण च

न्तिरस्य सः। कालकरवालेन कृत्तश्छिन्नो यामरमहिषस्कन्धस्तम्बकाकारः। करवालः कृपाणवदित्यमरः।

कालकपालिनो मधुपूर्णकपालपात्रमिव। नभःश्रियोऽम्लानकुसुमस्तबक इव। तत्क्रीडनायेति भावः।

गगनमेवाशोकतरुस्तस्य स्तबक इव। प्रतीचीविलासिन्याः कनकमयदर्पण इव। दिनमणिर्भगवानम्बरमार्णवपयसि ममज्ज।

क्रमेण भगवती सन्ध्या समदृश्यतेत्यन्वयः। पूर्वं रजोविलुठितानि पश्चादुत्थितानि कुलायार्थिन्यतएव परस्परकलहविकलानि कलविङ्ककुलानि तेषां कलकलेन वाचालानि शिखराण्यग्राणि येषां तादृशेषु शिखरिषु वृक्षेषु सत्सु।

कलविङ्कश्चित्रपृष्ठो गृहनीडो वृषायणः।

इति हारावली। शिरोऽग्रं शिखरं वा नेति तरुप्रकरणेऽमरः।

वसतेर्निवासस्थानस्य काङ्क्षेच्छा येषां तादृशेषु ध्वाङ्क्षेषु काकेषु। अनवरतेति स्पष्टम्।

---

१ -कपालचषकमिव H २ + -स्तबक C ३ गगनाङ्गणाशो- C ४ कनकदर्प- A B C D F H ५ दर्पणाम्बरमा- A B म्बरमा- C D E F G म्बरमहार्णव- H ६ -विकटाकृतिर्ममज्ज D ७ क्रम.क्र- D इति मद० च।

[1]रजोविलुठितोत्थितकुलायार्थिपरस्परकलहविकलकलविङ्क-[3]कुलकलकलवाचालशिखरेषु शिखरिषु [4]वसनिकाङ्क्षेषु [5]ध्वाङ्क्ष्वनवरतदह्यमानकालागुरुधूपपरिमलोद्गारेषु[6] वासागारेषु [7]दूर्वाञ्चिततटिनीतटनिविष्टविदग्धजनप्रस्तूयमान-काव्यकथाश्रवणोत्सुकशिशुजनकलकलनिवारणक्रुद्धेषु वृद्धे-ष्वालोलिकातरलरसनाभिः कथितकथाभिर्जरतीभिरतिलघु-

---

दूर्वाभिरञ्चितं यत् तटिनीतटं तत्र निविष्टविदग्धजनैः प्रस्तूयमानानां काव्यकथानां श्रवणोत्सुका अतएव शिशुजन-नकलकलनिवारणार्थं क्रुद्धास्तादृशेषु वृद्धेषु।

आलोलिकायां बालानां निद्रार्थं क्रियमाणे हुरलोल इति लोकप्रसिद्धे मुखध्वनिविशेषे तरला रसना जिह्वा यासां ताभिः कथितकथाभिर्जरतीभिरतिलघुकरतालजनितसुखे शिशयिषमाणे शयितुमिच्छौ शिशुजने। तदुक्तम्।

आलोलिका मुकुलिका उलूलिर्मुखघण्टिका।

इति। विरचिता कन्दर्पमुद्रा प्रसाधनं याभिस्तासु चुद्रासु वेश्यासु।

---

१ रजोविलुठनो- A B रजोलुठितो- C रजोराजिलुठितो D २ ॰ -कलहार्थि D ३ कु॰ -कलारावचा C कु॰ -विचालितशि A B C D F ४ वसतिमाका- A B C D E F G H ५ ध्वा॰ -धूमपरि- A B G ६ -रेषु A F G ७ दू॰ -तटनिवद्धगोष्ठीकविद- A B C F दू॰ -तटीनिवद्धगोष्ठीकविद- D E G H दू॰ -मानमधुमथनकथा- C दू॰ -मानकथा- D

करतालजनितसुखे शिशयिषमाणे[1] शिशुजने विरचितकन्दर्पमुद्रासु क्षुद्रासु [2]कामुकजनानुबध्यमानदासीजनविविधा[3]श्लीलवचनश्रुतिविरसीकृतसन्ध्यावन्दनोपविष्टेषु शिष्टेषु रो[4]मन्थमन्थरकुरङ्गकुटुम्बकाध्यास्यमानम्रदिष्ठगौष्ठीनपृष्ठास्वरण्यस्थलीषु [5]निद्रालुद्रोणकुलकलितकुलायेषु काननिका-

---

क्षुद्रा वेश्यानटीकण्टकारिकासरघासु च ।

इति विश्वप्रकाशः ।

कामुकेति स्पष्टम् ।

रोमन्थेन चर्वितस्याहृत्य पुनश्चर्वणेन मन्थरेण कुरङ्गकुटुम्बकेनाध्यास्यमानं म्रदिष्ठं मृदुतरं गौष्ठीनानां भूतपूर्वगोस्थानानां पृष्ठं पृष्ठवत् पृष्ठं यासु तादृशीष्वरण्यस्थलीषु सतीषु ।

गोष्ठं गोस्थानकं तत्तु गौष्ठीनं भूतपूर्वकम् ।

इत्यमरः ।

---

१ वृद्धैश्चालोलिकातरलतररसनाभिरतिलघुतरकरतलताडनजनितसुखे कथितकथाभिर्जरतीभिरनुगते शिशयिषमाणे A G वृद्धैश्चालोलिकातरलतररसनाभिरतिलघुतरकरतलताडनजनितसुखाभि कथितकथाभिर्जरतीभिरनुगते शिशयिषमाणे B वृद्धैश्चालोलिकातरलरसनाभि कथितकथाभिरतिलघुतरकरतलताडनजनितसुखाभिर्जरतीभिरनुगते शिशयिषमाणे C F वृद्धैश्चालोलिकामुखररसनाभि कथितकथाभिरतिलघुकरताडनजनितसुख जनयित्रीभिरनुगीते शिशयिषमाणे D वृद्धैश्चालोलिकातरलतररसनाभि कथितकथाभिरतिलघुकरताडनजनितसुखे जननीभिरनुगते शिशयिषमाणे E चालोलिकाकरणतरलतररसनाभि कथितकथाभिरतिलघुतरकरतलताडनजनितसुखे जरतीभिरनुगते शिशयिषमाणे H २ का॰ मुग्ध- A D H ३ श्लो॰ विमलो C श्लो॰ क्लान्तेषु D ४ स॰ -मर्मेदिष्ठ C ५ निद्रारसद्रो- A B C D E F G H नि॰ -कलितकु C D H इति अग॰ च ।

येषु कापेयविकलकपिकुलेष्वाश्रमतरुषु निर्जिगमिषति जरत्तरुकोटरकुटीरकुटुम्बिनि कौशिककुले तिमिरतर्जननिर्गतासु दहनप्रविष्टदिनकरकरशिखास्विव[1] [2]प्रस्फुरन्तीषु [3]दीपलेखासु मुखरितधनुषि वर्षति शरनिकरमनवरतमशेषसंसार-

---

निद्रालुद्रोणकुलं काककुलं तेन कलितकुलायेषु व्याप्तनीडेषु काननिकायेषु काननसमूहेषु ।

निकायस्तु पुमान् लक्षे सधर्मिप्राणिसंहतौ ।

इति विश्वप्रकाशः ।

कापेयं कपिकर्म तेन विकलानि कपिकुलानि येषु तेष्वाश्रमतरुषु । कपिज्ञात्योर्ढक् ।

जरत्तरूणां चिरन्तनवृक्षाणां कोटरा निष्कुहास्त एव कुटीराणि तेषु कुटुम्बिनि कुटुम्बवति कौशिककुले निर्जिगमिषति निर्गच्छति । निष्कुहः कोटरं वा नेत्यमरः । वासः कुटीति च । कुटीशमीशुण्डाभ्यो र इत्यल्पले रः ।

तिमिरतर्जनार्थं निर्गतास्विव दहनप्रविष्टदिनकरकराणां किरणानां शिखासु प्रस्फुरन्तीषु दीपलेखासु । सौरं तेजः सायमग्निं सङ्क्रमते । आदित्यः सायमग्निं प्रविशतीत्यादिश्रुतिः । मुखरितधनुषि । समासान्तविधेरनित्यत्वान्नानङ् ।

१-शाखास्विव A B C D २स्फुर A B C D G H विस्फुर I ३दीपशिखासु A दीपकलिकासु B C

शेमुषीमुषि मकरध्वजे [1]सुरताराम्भाकल्पशोभिनि [2]शम्भली-भाषितभाजि भजति भूयां भुजिष्याजने [3]सैरन्ध्रीबध्यमानरसनाकलापजल्पाकजघनस्थलीषु[4] जनीषु[5] विश्रान्तिकथानुबन्ध-

शरनिकरं वर्षति। अनवरतमशेषसंसारशेमुषीमुषि सकलसंसारमतिहारके मकरध्वजे। धीः प्रज्ञा शेमुषी मतिरित्यमरः।

सुरतारम्भस्याकल्पेन वेषेण शोभिनि शम्भलीनां कुट्टनीनां भाषितं वचनं भजति तादृशि भूयां भजति भुजिष्याजने प्रेष्याजने। आकल्पवेषौ नेपथ्यम्। शम्भली कुट्टनी समे।

नियोज्यकिङ्करप्रैष्यभुजिष्यपरिचारकाः।

इति चामरः।

भुजिष्या प्रैष्यमात्रे स्यात् स्वतन्त्रायामपि स्मृता।

इति धरणिः।

सैरन्ध्रीभिर्बध्यमानरसनाकलापेन काञ्चीकलापेन जल्पाकजघनस्थलीषु जनीषु वधूषु।

सैरन्ध्री परवेश्मस्था स्ववशा शिल्पकारिका।

स्याज्जल्पाकस्तु वाचाल इति द्वयोरमरः।

जनी सीमन्तिनीवध्वोरुत्पत्तौ च जनिर्मता।

इति विश्वः।

---

१ सुरताकल्पारम्भ A B C D F H २ सम्भालामश- C ३ सै॰-रसनाजल्पा- A E F G H सै॰-रसनाजाङ्गजल्पा B C D ४ ॰जघनासु A B C D F G H ५ वाराङ्गनासु C

तया [१]प्रवर्तमानानेकजनगृहगमनत्वरेषु[२] चत्वरेषु [३]समावासितकुक्कुटेषु निष्कुटेषु [४]क्षतयष्टिसमारोहणेषु बर्हिणेषु[५] विहितसन्ध्यासमयव्यवस्थेषु गृहस्थेषु [६]सङ्कोचोदञ्चदवाञ्चत्केसरकोटिसङ्कटकुशेशयकोशकोटरकुटीरशायिनि षट्चरणचक्रेऽथानेन वर्त्मना भगवता [७]भानुमता समागन्तव्यमिति [८]सर्वपद्ममयैर्वसनैरिव मणिकुट्टिमालिरिव[९] विरचिता वरुणेन

विश्रान्तकथानुबन्धतया प्रवर्तमानानेकजनेषु गृहगमनत्वरायेषु तेषु चत्वरेष्वङ्गणेषु। अङ्गणं चत्वराजिरे इत्यमरः।

निष्कुटेषु गृहारामेषु समावासितकुक्कुटेषु। गृहारामास्तु निष्कुटा इत्यमरः।

बर्हिणेषु मयूरेषु क्षतयष्टिसमारोहणेषु। मयूरो बर्हिणो बर्हीत्यमरः। गृहस्थेषु विहितसन्ध्यासमयव्यवस्थेषु। सङ्कोचेति स्पष्टम्।

अथानन्तरं वरुणेनानेन वर्त्मना भानुमता गन्तव्यमिति सर्वपद्ममयैर्वसनैर्मणिकुट्टिमालिर्मणिबद्धभूमिरिव रचिता। कुट्टिमोऽस्त्री निबद्धा भूरित्यमरः। कालशक्तेत्यादि स्पष्टम्।

---

१ प्रवर्तमानकथकजन- A B C D E F G H इति नास्ति च। २ चत्वरेषु A B C F G इति नास्ति च। ३ समाध्या- C H ४ क्षतयष्टिशिखरसमा- A B D G H ५ बर्हिगणेषु A G ६ स॰ -दञ्चदुत्केसर- C F स॰ -वाञ्चदुत्केस- D स॰ -शयकोटरकोशकु- B ७ भानुमता समाग- A B C G भानुमता गन्त- D F H ८ रक्तप- D ९ -श्चिरचित A B D F

[1]कालक्लान्तस्य दिवसमहिषस्य रुधिरधारेव विद्रुमलतेवाम्बरमहार्णवस्य रक्तकमलिनीव गगनतडागस्य काञ्चनसेतुरिव[2] कन्दर्पगमनस्य[3] मञ्जिष्ठारागारुणपताकेव गगनहर्म्यतलस्य लक्ष्मीरिव [4]स्वयंवरपरिगृहीतपीताम्बरा भिक्षुकीव तारानुरक्ता[5] रक्ताम्बरधारिणी[6] भगवती सन्ध्या समदृश्यत। क्षणेन च क्षणदारागरचनाचतुरासु सन्ध्याभिख्यास्विव वेश्यासु

लक्ष्मीरिव स्वयंवरपरिगृहीतः पीताम्बरो विष्णुर्यया। पक्षे। पीताम्बरं पीतनभः।

भिक्षुकीव तारायां देवतायामनुरक्ता रक्ताम्बरधारिणी रक्तवस्त्रधरा। पक्षे। तारा नक्षत्राण्यनुरक्ता यस्याम्। आदित्यादिः। रक्तमम्बरमाकाशो यस्याम्।

क्षणेन गणक इव नक्षत्रचक्रे प्रदीपे तिमिरमजृम्भतेत्यन्वयः। क्षणदा रात्रिस्तस्या रागरचना तत्र चतुरासु सन्ध्याभिख्यास्विव वेश्यासु। पक्षे। क्षणदा आ साकल्येन रागा भैरवादयस्तेषां रचना यथायथं स्वरग्राममूर्च्छनासहितं गानं तत्र चतुरासु। यद्वा। क्षणदानां स्वसुखप्रदानामा साकल्येन रागरचना प्रीतिरचना तत्र चतुरासु।

---

१ कालेन क्लान्तस्य दिवसमहिषस्य B कालेन क्लान्तस्य महिषस्य C कालक्लान्तदिवसमहिषस्य॰ E कालक्लान्तस्य महिषस्य G कालवद्याणक्लान्तदिवसमहिषस्य H
२ -सेतरिव A -केतुरिव D ३ कन्दर्पस्य D ४ स्वयंवरगृ॰ A B D H स्वयम्ग C F ५॰रागरक्ता A B C F G H इति अग॰ च। रक्ताम्बर॰ D
६ + च भारयेोषिदिव पक्षवानुरक्ता कालेयकनाभपयोधरा बभ्रुरिव कपिलतारका D

तुलाधारशून्यायां पण्यवीथ्यामिव दिवि[1] घनघटमानदल-पुटासु पुटकिनीषु तिमिरप्रतिहस्तकेष्विव तत इतः परिभ्रमत्सु कमलसरसि[2] मधुकरेषु [3]विकलकुररीरुतच्छलेन

तुलाधारा वणिजस्तैः शून्यायां पण्यवीथ्यामिव दिवि। पक्षे। तुलाराशिराधारो येषां ते चन्द्रादयस्तैः शून्यायाम्। तथाच माघः।

अविभाव्यतारकमदृष्टहिमद्युतिबिम्बमस्तमितभानु नभः।
विगतोरुतापमतमिस्रमभादपदोषतैव विगुणस्य गुणः॥

इति।

तुलाधारस्तुलाराशौ भवेद्वाणिजकेऽपि च।

इति विश्वः।

घनं निविडं घटमानदलपुटासु पुटकिनीषु कमलिनीषु। राजादेर्योग्यस्यापदि विपणिनो विपणमपसारयन्ति मत्रीकाय स्वद्वारपिधानमाचरन्तीति लोकव्यवहारो ध्वनितः। हरताल इति भाषायाम्।

नालीकिनी पुटकिनी बिसनालिश्च पद्मिनी।

इत्युत्पलिनी।

कमलसरसि तिमिरप्रतिहस्तकेष्विवेतस्ततो भ्रमरेषु परिभ्रमत्सु। प्रतिहस्तकोऽपरहस्तकः। सञ्ज्ञायां कन्। गुमास्ता

---

१ शून्यवीथ्यां B H २ सिरसि D ३ दलितविकल A B C F G

रविविरहविधुरासु विलपन्तीष्विव सरोजिनीषु गणक इव
[1]नक्षत्रसूचके प्रदीपे हरकण्ठकाण्डकालिमसनाभि दैत्यबल-

इति भाषायाम्। मालिन्येन साम्यात् प्रतिहस्तोत्प्रेक्षणम्। प्रभौ पराभूते क्षुद्रः परहस्तदारादीन् समया स्वभृत्यान् लक्ष्मीजिघृक्षया प्रेषयत्येवेति लोकप्रसिद्धो ध्वनितः।

रविविरहविधुरास्ततएव विकलकुररीरुतच्छलेन पक्षिविशेषशब्दमिषेण विलपन्तीष्विव सरोजिनीषु।

गणक इव दैवज्ञ इव नक्षत्रसूचके शुभाशुभकार्योपयोगयुक्त्यादिनक्षत्रसूचके। पक्षे। नक्षत्राणि तारास्तत्सूचके द्योतके प्रदीपे। दैवज्ञगणकावपीत्यमरः।

हरस्य कण्ठकाण्ड गलस्तम्भस्तत्कालिमसनाभि दैत्यबलमिव प्रकृष्ट' श्रेष्ठस्तारको दैत्यविशेषो यत्र।

काण्ड चावसरे बाणे नाले स्कन्धे च शाखिनाम्।
स्तम्बे रहसि गर्वे चेति धरणि.। पक्षे। प्रकृष्टास्तारका भौमादिनक्षत्राणि यत्र। तथाच माघः।

सवितुस्त्विषाक्ति दहृशेऽपि न य.
स तमी तमोभिरधिगम्य तताम्।
द्युतिमग्रहोद्भटगणो लघव
प्रकटीभवन्ति मलिनाश्रयत ॥

इति।

---

१ नक्षत्रपथसूचके A B C F G

मिव [१]प्रकृष्टतारकं भारतसमरमिव वर्धमानोलूककलकलं[२] धृष्टद्युम्नवीर्यमिव [३]कुण्ठितद्रोणप्रभावं नन्दनवनमिव[३] सञ्चरत्कौशिकं [४]कृष्णवर्त्मेवाखिलकाष्ठापहारकं सगर्भमिव[५]

भारतसमरमिव वर्धमान उलूकस्य कुरुयोधविशेषशकुनिपुत्रस्य कलकलो यत्र। पक्षे। उलूकाः पेचकाः।

उलूकः कुरुभेदेऽपि पेचके जन्मभेदिनि।

इति विश्व.। सङ्ग्रामे प्रयोजनयोद्धृभ्य इत्यण्।

धृष्टद्युम्नवीर्यमिव द्रुपदपुत्रवीर्यमिव कुण्ठितो द्रोणस्याचार्यस्य प्रभावो येन। पक्षे। कुण्ठितो द्रोणानां काकानां प्रभावो यत्र।

द्रोणो ना दग्धकाके स्यादश्वत्थाम्नो गुरावपि।

इति रुद्रः।

नन्दनवनमिवेन्द्रवनमिव सञ्चरन् कौशिक इन्द्रो यत्र। पक्षे। कौशिका उलूकाः।

कौशिकः पेचके शक्रे विश्वामित्रे च कौशिकः।

इति विश्वः।

कृष्णवर्त्मेवाखिलकाष्ठानामिन्धनानामपहारकम्। पक्षे। काष्ठा दिशस्तासामपहारकमाच्छादकम्। यद्वा। कृष्णवर्त्मानमिव दुराचारमिवाखिलकाष्ठानामखिलोत्कर्षाणामपहारकं नाशकम्।

---

१ प्रकट D F प्रहृष्ट H २ कोलाहल D ३ नन्दनमिव B F H ४ ल॰ काष्ठोप A D ५ इति आ॰ च म॰ च। मर्भमिव A B C E F G H चन्द्रगर्भमिव D

घनतरपाषाणकर्करासु[१] गिरितटीषु सचतुरिव सुप्तसिंहनयनदीधितिच्छटाकपिलेषु[२] सानुषु सजीवमिव तमोमणिभिः संवर्धितमिवाग्निहोत्रधूमलेखाभिर्मांसलितमिव [३]कामिनीकेशपाशसंस्कारागुरुधूमपटलैरुद्दीपितमिव घनतरलीनमधुकर-

---

कृष्णवर्त्मा हुताशे स्याद्दुराचारे विधुन्तुदे।
काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः।
स्याद्दिशि स्थानमात्रे च काष्ठमाख्यातमिन्धने।

इति विश्वप्रकाशः।

सगर्भमिव ससत्त्वमिव। अधिकमिति यावत्। क्वचित् सगर्वमित्यपि पाठः। घनतराः पाषाणाः कर्कराश्च यत्र तासु गिरितटीषु। कांकर इति भाषायाम्।

सचतुरिव सिंहनेत्रदीधितिच्छटाकपिलेषु सानुषु। सुप्तसिंहेति पाठस्तु ग्राम्यकत्वादुपेक्षितः।

तमोमणिभिर्ज्योतिरिङ्गणैः सजीवमिव। इतस्ततो भ्रमणादिति भावः।

ध्वान्तोन्मेषखद्योतस्तमोमणिर्ज्योतिरिङ्गणः।

इति व्याडिः।

अग्निहोत्रधूमलेखाभिः संवर्धितमिव। कामिनीकेशपाशसंस्कारार्थमगुरुधूमपटलानि तैर्मांसलो बलवांस्तद्वदाचरितमिव। पिशादित्वाच्छः। बलवान् मांसलोंऽसल इत्यमरः।

---

१ -पिशाचासु A B २ -पिङ्गेषु D ३ कामिनीनां केश- A B C F G H 2 A

[1]पटलमेचकितपेचकिकपोलतलदानधाराशीकरैः पुञ्जीकृत-मिव [2]वितततमालमालाच्छायासु[3] लीयमानमिव [4]कज्जल-श्यामभोगिभोगेषु प्रावरणमिव रजनीपांसुलायाः पलितौष-धमिव वृद्धवारविलासिन्या अपत्यमिव रजन्याः सुहृदिव

घनतरं निविडतरं लीनानामुपविष्टानां मधुकराणां पट-लैर्मेचकितानां श्यामवदाचरितानां पेचकिनां गजानां कपो-लतलदानधाराशीकरैरुद्दीपितमिव।

उलूके करिणः पुच्छमूलोपान्ते च पेचकः।
कालश्याममलमेचका इति द्वयोरमरः। प्रौढोक्तिः।

वितता या तमालमाला तच्छायासु पुञ्जीकृतमिव। कज्ज-लश्यामभोगिभोगेषु सर्पशरीरेषु लीयमानमिव। रजनीपांसु-लाया रात्रौ कृष्णाभिसारिकायाः प्रावरणमिव। स्वैरिणी पां-सुला च स्यादित्यमरः।

वृद्धवारविलासिन्याः पलितस्य जराकृतकेशशौक्ल्यस्यौषधं तन्निवारकमिव। अन्धतमसे केशानां विशेषानुपलम्भादिति भावः। पलितं वेश्यानां जीविकाभङ्गहेतुरिति ता एव वर्णिताः। पलितं जरसा शौक्ल्यं केशादावित्यमरः।

रजन्या रात्रेरपत्यमिव। तत उद्भूतत्वादिति भावः। कल्नि-

---

१ पटलैर्मेचकितमिव पेच- A D F प० -पोलतलदान- A B प० -पोल-दान- C H २ वितततमालमाल- A C E F G H वितततमाल- B D ३ -च्छायामध्यपातसु B C D E G -च्छायामनुनिपात्य F -च्छायामध्यमन्तर्धा पातु H ४ कज्जलरुचका- A B C D F

कलिकालस्य मित्रमिव दुर्जनहृदयस्य[1] बौद्धदर्शनमिव[2] प्रत्यक्षद्रव्यमपह्नुवानं तिमिरं व्यजृम्भत[3]। [4]मुदितमिवातिमत्तमातङ्गमनोहरगण्डमण्डले फलितमिवातिसान्द्रबहलच्छ[5]दविततमालतमालकानने [6]स्फुरितमिवातिकान्तकान्ताजन[7]घनतरकेशपाशसंहतौ[8] मिलितमिवेन्द्रनीलमणिरश्मिभिरति-

---

कालस्य सुहृदिव। सदाचारनाशकलान्मालिन्याच्च साम्यात् सुहृत्त्वम्। दुर्जनहृदयस्य मित्रमिव।

बौद्धदर्शनमिव बौद्धशास्त्रमिव प्रत्यक्षमपि चक्षुरिन्द्रियगोचरमपि न तु परमाण्वादिवदतीन्द्रियं द्रव्यमपह्नुवानम्। सर्वं ज्ञानमयं जगदिति मन्यमानास्ते।

सूर्याचन्द्रमसौ व्योम ताराचक्रं वसुन्धरा।
सरितः सागराः शैलाश्चित्तस्यैव विभूतयः॥

इति प्रत्यक्षपरिकल्पितमप्यर्थमन्यथयन्ति।

अतिमत्तमातङ्गमनोहरगण्डमण्डले मुदितमिव हृष्टमिव। अतिसान्द्रबहलपत्रविततमालतमालकानने फलितमिव। अतिकान्तकान्ताजनघनतरकेशपाशसंहतौ स्फुरितमिव। इन्द्रनीलमणिरश्मिभिर्मिलितमिव। अतिशयमांसलं तमः। अवटा गर्ताघाटा अटव्यश्च तत्रोत्पन्नमिव।

---

१ -धामो C D F २ इति नास्ति॰ च। बौद्धसिद्धान्तमिव A B C D E G H
३ -व्यजृम्भत A D E F G H व्यजृम्भत C ४ मुदितमिव मत्त A B C ५ द-
विततमाल- A B C F G H ६ स्फुरित- A B F H स्फा॰ -कान्तरसकर- B
७ घनतरतरकेश H ८ -संहतौ A B C G -केशसंहतौ D E H

शयमांसलं तम इवावटतटाटवीषु[1] साटोपमिव[2] स्फुटपाटवो-[3]त्कटप्रकटविशङ्कटकुटजविटपोत्कटविनटितषट्पदालिषु[4] [5]घनतरघोरघस्मरविषधरभोगभासुरं मदभरमत्तदन्तिदन्त-

---

अवटः स्यात् खले गर्ते कूपे कुहकजीविनि।

इति विश्वप्रकाशः।

स्फुटं पाटवं पटुत्वं तेनोत्कटमुदग्रं प्रकटो व्यक्तो विशङ्कटो महान् यः कुटजविटपस्तत्रोत्कटविनटितषट्पदालिषु साटोपमिव सावष्टम्भमिव।

विकटः सुन्दरे प्रोक्तो विशालविकरालयोः।

इति विश्वप्रकाशः। विशङ्कटं पृथु बृहदित्यमरः।

घनतरं घोरं भयानकं घस्मरो भक्षको यो विषधरस्त-द्भोगवद्भासुरम्। घोरं भीमं भयानकम्। भक्षको घस्मरोऽद्मर इत्युभयत्रामरः। सघसद्ः फमरच् घसेः।

मदभरमत्तदन्तिदन्तद्युतितर्जनेन जर्जरं शिथिलावयवं तमः। मदमत्त इति विशेषणं गजानां तारुण्यद्योतनाय तच्च दन्तयोः श्वैत्याय।

निशाकरारम्भसमये चन्द्रोदयारम्भसमये मञ्जुपल्लवमय-

---

१ -मांसलमवटतटाटवीषु C -मांसलतमसमवटतटाटवीषु D -मांसं तम उच्चलमिवा-वटतटाटवीषु E -मांसं तमोऽवटाटवीषु F -मांसलमुच्चलमिवावटतटाटवीषु G
२ + अपि- A B C F G H इति जग० च मद० च। ३ स्फु० -मदुत्कटविकट-पेच्छकविकटविटपितिमिर- D ४ -टावलीषु C D G H इति जग० च मद० च।
५ घनतरघोरघोरमतिमन्नि- A B C H घनतरघोरतरघस्मरविष- D

द्युतितर्जनजर्जरं तमः। निशाकरारम्भसमय[१] इव [२]सङ्कुचत्कुवलयव्याजेन विरचिताञ्जलिपुटे [३]नतिमति तमोतिमिरे क्षणेन च सन्ध्याताण्डवाडम्बरोच्छलितमहानटजटाजूटकूटकुटिल-[४]विवरविवर्तितजह्नुकन्यावारिधाराबिन्दव इव विकीर्णा [५]दुर्धर-[६]धरणिभारभरभुग्नभीमदिग्मत्तमातङ्गमण्डलकरपरिमुक्त-[७]

व्याजेन विरचिताञ्जलिपुट इव। अतएव नतिमति नम्रे तमोतिमिरे सति।

क्षणेन तारका व्यराजन्तेत्यन्वयः। पूर्वं तमःप्रारम्भे ता एव वर्णिता इदानीं चन्द्रोदयप्रारम्भ इति न किञ्चिदसमञ्जसम्। सन्ध्यासु ताण्डवं नृत्यं तस्याडम्बरः समारम्भस्तेनोच्छलिते महानटस्य शम्भोर्जटाजूटकूटकुटिलविवरे विवर्तिता या जह्नुकन्या गङ्गा तस्या वारिधाराबिन्दवस्त इव विकीर्णा विस्तृताः। ताण्डवं नटनं नाट्यमित्यमरः।

आडम्बरः समारम्भे गजगर्जिततूर्ययोः।

इति विश्वप्रकाशः।

दुर्धरधरणिभारभरभुग्नभीमदिग्मत्तमातङ्गमण्डलं समूह-

---

१ -समय A D २ सङ्कुचितकु A B C D F G H च० -व्याजादि- A B F G च० -व्याजवि- C D H ३ नमति नातितमोपवि तमो A B नाति-तमोपवि तमो- C नमति तमोपवि तमो- D नमति तमो- E F H च-नमति तमो- G ४ विवरवर्तितज- E F H विवरावर्तज- D ५ दुर्धरभरधर- G ६ ध० -दिग्गजस- A B C D F G H च० -तङ्गमण्डलमुक्ता करिणो- C च० -तङ्गमुक्तकरणो D ७ -तङ्गमण्डलकरमुक्ताशीकरनिकरा F

शीकरच्छटा [1]इवातिदवीयोनभस्तलभ्रमणखिन्नदिनकरतुरगवान्तफेनस्तवका इव[2] गगनमहासरःकुमुदकाननसन्देहदायिन्यो विश्वं गणयतो विधातुः शशिकठिनीखण्डेन तमोमषीश्यामेऽजिन इव नभसि[3] संसारस्यातिशून्यत्वाच्छून्यविन्दव इव वितता जगत्त्रयविजयविनिर्गतस्य [4]मकरकेतो रति-

---

स्तत्करैः शुण्डाभिः परिमुक्ताः सीकरच्छटा अम्बुकणच्छटास्ता इव।

करो वर्षोपले पाणौ शुण्डाप्रत्ययरश्मिषु।

इति विश्वप्रकाशः।

अतिदवीयो दूरं नभस्तलं तत्र भ्रमणेन खिन्ना दिनकरतुरगास्तैर्वान्तफेनस्तवका इव। दवीयश्च दविष्ठं च सुदूर इत्यमरः।

गगनमहासरसः कुमुदकाननसन्देहदायिन्यः। तुल्यत्वादित्यर्थः।

विश्वं गणयतो विधातुस्तमोमषीश्यामेऽजिने चर्मणीव नभस्याकाशे शशी चन्द्र एव कठिनी खटिका तस्याः खण्डेन शकलेन रचिता इति शेषः। संसारस्यातिशून्यत्वात्। नश्वरत्वेनेत्यर्थः। शून्यविन्दव इव। कठिनी खटिकायां स्त्रिति विश्वप्रकाशः।

जगत्त्रयविजयार्थं विनिर्गतस्य मकरकेतोः कामस्य रतेः प्रि-

---

१ इव मता यति- D इव॰ -नभःस्थल- C D G H इव॰ -रथतुरग- D G इव॰ -तुरगविसरथा- C D F २ + कौर्णा B + कौर्णा C ३ विधृति A B C D F G H ४ कुसुमकेतो C D H

करतलविकीर्णलाजा[१] इव [२]गुटिकास्त्रगुलिका इव पुष्पधन्वनो वियदम्बुराशिफेनस्तबका इव रतिविरचिता गगनाङ्गणे आतर्पणपञ्चाङ्गुलय इव [३]विकीर्णा व्योमलक्ष्मीहारमुक्तानिकरा[४] इव [५]चन्द्रचितार्चकादात्यावेगव्यस्ताः[६] कामकीकस-

---

याया: करतलविकीर्णलाजा इव। पुष्पधन्वनो गुटिकास्त्रं गुलेल इति भाषायाम्। तस्य गुलिका इव। गुरिया गोली इति वा इयं भाषायाम्।

वियदम्बुराशेः फेनस्तबका इव। गगनाङ्गणे रतिविनिर्मिता आतर्पणम्। अयिपन इति भाषायाम्। तस्य पञ्चाङ्गुलयः। छुटकी इति भाषायाम्। ता इव। उत्सवादावातर्पणेनाङ्गुली रञ्जयित्वा कुड्यादि रञ्जयन्तीति सम्प्रदायः।

आतर्पणं च सौहित्ये विन्ध्यादावालिम्पनेऽपि च।

इति विश्वप्रकाशः।

विकीर्णा विक्षिप्ता व्योमलक्ष्म्या हारमुक्तानिकरा इव। चन्द्र एव चितार्चकं तस्मादात्यावेगेन व्यस्ता इतस्तत उत्पतिताः कामकीकसखण्डाः कामास्थिखण्डास्त इव। चिता चित्या चितिः स्त्रियाम्। कीकसं कुल्यमस्थि चेति द्वयोरमरः।

---

१ -कीर्णा लाजा B E G कीर्णा लाजाञ्जलय D २ गुटिकाश्रय गु- C F ३ विकीर्णा- A B E G ४ -मुक्ताफलनिकरा A B F G ५ इति नभ॰ प। चन्द्रोपात्तमहाद्भुतकामचिता- C D चन्द्रोपात्तमहाद्भुतकामचन्द्रचिता- G ६ न्यस्ता A D

खण्डा इव तिमिरोद्गमधूमधूमलसन्ध्यानलपरितप्तगगनम-हास्थलीकटाहभृज्ज्यमानलाजानुकारिण्य[1] इव तारका व्यराजन्त।

ताभिः श्वित्रितमिव वियदशोभत। दीर्घोच्छासरचनाकुलं [2]सुश्लेषवक्त्रघटनापटु सत्कविवचनमिव चक्रवाकमिथुनमतो-

---

तिमिरमेव धूमस्तेन धूमलः कृष्णलोहितः सन्ध्यैवानलो वह्निस्तेन परितप्तो गगनमहास्थल्येव कटाहस्तत्र भृज्ज्यमान-लाजानुकारिण्यः। धूमधूमलौ कृष्णलोहित इत्यमरः।

ताभिस्ताराभिः श्वित्रितं सञ्जातकुष्ठमिव वियदराजत। कोठो मण्डलकं कुष्ठं श्वित्र इत्यमरः। चित्रितमिति पाठे सञ्जात-चित्रम्।

दीर्घोच्छासो दीर्घपरिच्छेदस्तद्रचनयाकुलं व्याप्तम्। यद्वा। दीर्घोच्छासरचनानां कुलं गृहम्। शोभनः श्लेषोऽलङ्कारो गुण-विशेषो वा वक्त्रं छन्दोभेदस्तद्रचनापटुः सत्कविस्तत्काव्यमिव। पक्षे। दीर्घोच्छासस्य महोच्छ्वसनस्य रचनयाकुलं व्याकुलम्। सुश्लेषवक्त्रघटना शोभनः श्लेष आलिङ्गनं यत्र तादृशी वक्त्रघ-टना मुखसंयोजनं तत्र पटु चक्रवाकमिथुनमतीवाखिद्यत।

आख्यायिका परिच्छेद आश्वासोच्छासकावपि।

इत्युत्तरतन्त्रम्। कुलं जनपदे गृहे।

---

१ ०भासुरविकरधान्यार्धस्फुटितलाजशोभानुकारा B C Γ H इति क्रम० प।
२ भ्रश्लेष- D इति क्रम० प नेट० च।

वाखिद्यत। कमलिनीवनसञ्चरणलग्नमकरन्दबिन्दुलुब्ध-[1] मुग्धमधुकरमालाशबलगात्रं[2] कालपाशेनेव [3]मूर्तरामशापेनाकृष्यमाणं चक्रवाकमिथुनं[4] विजघटे। रविविरहविधुरायाः

सजातीयगणे गोत्रे देहेऽपि कथितं कुलम्।

इति विश्वप्रकाशः।

एकरूपेण वाक्येन द्वयोर्भणनमर्थयोः।

तन्लेषः यत् स शब्दज्ञैः श्लेष इत्यभिशब्दितः॥

इति भोजराजः। शिष्टमस्पृष्टशैथिल्यं इति गुणप्रकरणे दण्डी।

वर्णा नाद्यन्तयोः स्यातामश्वेर्धाऽनुष्टुभि स्यातम्।

इति केदारः।

पटुस्तीक्ष्णेऽस्फुटे दक्षे निष्ठुरे निर्दयेऽपि च।

इति रुद्रः।

कमलिनीवनसञ्चरणैर्लग्नमकरन्दबिन्दुषु लुब्धा सतृष्णा मुग्धा रम्या मधुकरमाला तया शबलं चित्रं गात्रं यस्य तत्। कालपाशेनेव मूर्तरामशापेन सम्यग्यथा रात्रौ न मिलतस्तथाकृष्यमाणं चक्रवाकमिथुनं विजघटे विघटितम्।

रविविरहविधुरायाः कमलिन्या हृदयमिव चक्रवाकमिथुनं द्विधा पपाट। स्फट पट गतौ।

---

१ -लुब्धमुग्धमधु- C G H २ -मालतया C ३ मुक्तराम- D मू० -शापेनाकृष्ट C H ४ + विधुरं H

[1]कमलिन्या हृदयमिव द्विधा पपाट चक्रवाकमिथुनम्। आगमिष्यतो हिमकरदयितस्य पार्श्वे सञ्चरन्ती कुमुदिन्या भ्रमरमाला दूतीवालक्ष्यत। तारकाव्याजादस्तङ्गतस्य दिवाकरस्य शोकादिव स्थूलाश्रुबिन्दुभिः [2]ककुभो व्यरुदन्। भास्वतो निजदयितस्य [3]विरहादभिनवकिञ्जल्कराजिव्याजेन मुर्मुर इव[4] नलिनीकोशहृदये जज्वाल। [5]रविरश्मिभस्मित-

---

कुमुदिन्याः पार्श्वे सञ्चरन्ती भ्रमरमालागमिष्यतो हिमकरदयितस्य चन्द्रप्रियस्य दूतीवालक्ष्यत। सञ्चरन्तीत्यत्र तृतीयान्तेन योगाभावात् समस्तृतीयायुक्तादिति नात्मनेपदम्।

अस्तङ्गतस्य दिवाकरस्य शोकात् ककुभस्ताराव्याजेन व्यरुदन्। कमलिनी कोशहृदये भास्वतो निजदयितस्य विरहादभिनवकिञ्जल्कराजिव्याजेन मुर्मुर इव तुषानल इव जज्वाल। मुर्मुरस्तु तुषानल इति वैजयन्ती।

रविरश्मिभस्मितनभोवनस्य मषीराशिरिव। श्रुतिवचनमिव वेदवाक्यमिव परिहृतं दिगम्बरस्य बौद्धस्य दर्शनं शास्त्रं येन तत्। पक्षे। दिगम्बरयोर्दिगाकाशयोर्दर्शनं येन तत्। शार्वरं शर्वरीसम्बन्धि। शेषलेन विवक्षायामण्। भवे तु ठञ् स्यात्।

---

१ कमलिनीकामिन्या H २ शोकादिव क॰ D H शोकात् क॰ E ३ वि॰ राशिव्या॰ A B C D F H ४ मुर्मुरमिव A B E F G H इति नास्ति च भर॰ च। ५ रविरश्मिदग्धाम्रिभ B C G

नभोवनमषीराशिरिव श्रुतिवचनमिव[१] [२]परिहृतदिगम्बरदर्शनं[३] सद्यो द्रावितराजपट्ट इव समुद्रप्रवाह इव शार्वरमन्धकारं व्यजृम्भत ।

क्षणेन च चण्डाराजकन्यकाकन्दुकः[४] कन्दर्पकनकदर्पण उदयगिरिबालमन्दारपुष्पस्तबकाकृतिः [५]प्राचीललाटतट-

---

एवं शार्वरस्य तमसो निवृत्तय इत्यादयो व्याख्याताः । तमो व्यजृम्भत ।

क्षणेन रजनीपतिरभ्युदयमाससादेत्यन्वयः । चण्डाराजकन्या कन्दुको गेन्दुकः । गेन्दुकः कन्दुक इत्यमरः । गेन्दा इति गालमसुरिया इति भाषायाम् ।

कन्दर्पस्य कनकदर्पणो मुकुरः । दर्पणे मुकुरादर्शावित्यमरः । कनकपदं रक्तत्वेन साम्यार्थम् ।

उदयगिरेर्बालमन्दारपुष्पस्तबको नव्यमन्दारगुच्छकस्तदाकृतिः । स्याद्गुच्छकस्तु स्तबक इत्यमरः । बालपदमारुण्यातिशयाय ।

प्राचीललाटतटे कुङ्कुमबिन्दुचक्रवदाकारो यस्य । अथ कुङ्कुमम् । काश्मीरजन्माग्निशिखमित्यमरः ।

---

१ श्रुतिदर्शनमिव A F G २ चतदि- A F H हृतदि- B C ३ + क्षणं इवातिरस्कृतविश्वरूपभावं A B क्षणमपि तिरस्कृतविश्वरूपभावं D F ४ -कन्यकाकनककन्दुक. A B -कन्यकाकरकन्दुकः C F -कन्याक्रीडाकन्दुकः D ५ प्राचीललनाललाट- A प्राचीमहिलाललाट- D प्रा० -कुङ्कुमाम्बुबिन्दु D

कुङ्कुमबिन्दुचक्राकारः कनककुण्डलमिव नभःश्रियः दिव्यवधूप्रसाधिकाहस्तस्रस्तालक्तकपटलमिव[1] गगनसौधकनककुम्भ इव प्रस्थानकनककलश इव त्रिभुवनविजयविनिर्गतस्य मकरकेतोः [2]कन्दर्पकार्तस्वरतूणमुखकान्तितस्करः [3]प्राच्यशैलशिखराग्रप्ररूढजपाकुसुमच्छविः [4]स्वच्छकुङ्कुमपिण्डपूर्ण-

---

नभःश्रियः कनककुण्डलमिव कर्णवेष्टनमिव। कुण्डलं कर्णवेष्टनमित्यमरः।

दिव्यवधूनां प्रसाधिका तद्धस्तात् स्रस्तमलक्तकपटलमिव। गगनेति स्पष्टम्। प्रस्थानकनकेति च।

कन्दर्पस्य कार्तस्वरतूणमुखकान्तेः सुवर्णनिषङ्गमुखशोभायास्तस्करोऽपहारकः। तच्छेष्ठत्वादिति भावः। तूणोपासङ्गतूणीरनिषङ्गा इत्यमरः।

प्राच्यां भवः प्राच्यः शैलस्तच्छिखराग्रे प्रकटं जपाकुसुमं तच्छविः। द्युप्रागपेति यत्। ओड्रपुष्पं जपापुष्पमित्यमरः।

स्वच्छकुङ्कुमेन पिण्डं सान्द्रं पूर्णपात्रमिव निशाविलासिन्याः।

पिण्डं सान्द्रे बले काले तूलेऽपि परिकीर्तितम्।

पूर्णपात्रं वस्तुपूर्णपात्रे वर्धायकेऽपि च॥

इति विश्वः।

---

१ -दिव्य इव D २ क॰ -सुवर्णक्का- A B C D F ३ प्राक्- A B C D
४ ख॰ -पूर्णकरक्षितपा- A B H ख॰ -पूर्णस्फटिकपा- C

पात्रमिव निशाविलासिन्याः कुङ्कुमारुणैकस्तनकलश[1] इवाखण्डलाशाङ्गनायाः[2] क्षीरसिन्धुरिव हरिणाधिष्ठितो राम इव लक्ष्मणान्वितः सुग्रीव इव तारापतिः सुराजेव रक्तमण्डल[3] उदयारुणमण्डलो [4]रजनीपतिरुदयमाससाद ।

ततः कामिनीहृदयसङ्क्रामित इव [5]चकोराङ्गनानेत्रपुटपीत

कुङ्कुमारुणैकस्तनकलश इवाखण्डलाशाङ्गनाया इन्द्रदिगङ्गनायाः । आखण्डलः सहस्राक्ष इत्यमरः ।

क्षीरसिन्धुरिव हरिणा विष्णुनाधिष्ठितः । पक्षे । हरिणेन ।

राम इव लक्ष्मणेनानुगतः । पक्षे । लक्ष्मणा चिह्नेन ।

सुग्रीव इव तारा तन्नामिका स्त्री । पक्षे । तारा नक्षत्राणि ।

सुराजेव रक्तं मण्डलममात्यादिसमूहो यस्य । पक्षे । मण्डलं बिम्बम् ।

उदयेनारुणं मण्डलं बिम्बं यस्य सः ।

ततः कामिनीहृदये सङ्क्रामित इव चकोराङ्गनाभिर्नेत्रपुटैः पीत इव कुमुदकोशैर्लीढ इवास्वादित इव क्षीणतां जगाम क्षणदाकृतो रागश्चन्द्रमण्डलस्थं लौहित्यम् ।

अनन्तरं ग्रहपतिश्चन्द्र उज्जगाम । शर्वरी प्रजाङ्गना गोपी

---

१ भर A B F H २ -शाविलासिन्याः B H -लाङ्गनाया C ३ — क्षीर॰ रक्तमण्डल A B D E H ४ रजनी-पतिरुदयाचलम् C रजनी-पतिरभ्युदय H इति नर॰ च । ५ इति नर॰ च । च॰ -पुटपायित A B C F G H च॰ -पुटपोटपीत D

इव रक्तकुमुदकोशलीढ इव क्षीणतां क्षणदाक्रान्तो जगाम रागः।

अनन्तरं[1] [2]शर्वरीव्रजाङ्गनाविष्कृतनवनीतस्वस्तिक इव कुसुमकेतोर्मुखच्छायामुद्रितमुकुर[3] इव श्वेतातपत्रमिव मकरकेतोर्दन्तपालिचक्रमिव वियन्महासेः श्वेतचामरमिव[4] मदन-

---

तस्या आविष्कृतं नवनीतस्य स्वस्तिकश्चतुष्कमिव। चौक इति भाषायाम्। नवनीतं नवोद्धृतमित्यमरः।

स्वस्तिको मङ्गलद्रव्ये चतुष्कगृहभेदयोः।

इति विश्वप्रकाशः।

कुसुमकेतोर्मुखच्छायामुद्रितो मुकुर इव। मकरकेतोः श्वेतातपत्रमिव। वियन्महासेराकाशखड्गस्य। पालयतीति पालिः। पाल रक्षणे। ण्यन्तः। अच इः। दन्तस्य गजदन्तस्य पालिर्गजदन्तमयः। त्सरुरिति यावत्। मदनमहाराजस्य श्वेतचामरमिव। चामरं तु प्रकीर्णकमित्यमरः। निशायमुनाया वालुकापुलिनमिव। गगनमहातापसस्य स्फाटिकलिङ्गमिव पूजार्थं स्फटिकमयशिवलिङ्गमिव। काल एवोरगः कृष्णोरगस्तस्याण्डमिव। नभोमहार्णवस्य कम्बुरिव शङ्ख इव। मदनारिणा शिवेन दग्धस्य मकरकेतोश्चैत्यमिव।

---

१ + च A B C G २ श॰ -ङ्गमाभुजाविः- D श॰ -ङ्गमाविष्कृतमय- F G
३ — -मुकुर A B C D E F H इति नास्ति च। ४ -र इव A C D H

महाराजस्य वालुकापुलिनमिव निशायमुनायाः स्फाटिकलिङ्गमिव गगनमहातापसस्याण्डमिव कालोरगस्य कम्बुरिव नभोमहार्णवस्य चैत्यमिव मदनारिदग्धस्य मकरकेतोश्चिताचक्रमिव कलङ्काङ्गारशवलं सङ्कल्पजन्मनो गगनगामिगङ्गापुण्डरीकमिवाम्बरमहार्णवफेनपुञ्ज इव पारदपिण्ड इव कालधातुवादिनो राजतकलश इव दूर्वाप्रवालशवलः[1] क-

---

चैत्यमायतने बुद्धस्तद्वे चोद्देश्यपादपे।

इति विश्वः।

कलङ्काङ्गारः। यद्यप्यङ्गारोऽलातमुल्मुकमित्यमरः। साग्निकाष्ठमङ्गारः। अङ्गारचुम्बितमिव व्ययमानमास्य इति प्रयुक्तं भवभूतिना। तथापि निरग्न्यग्निदग्धं श्यामं काष्ठमिहाङ्गारपदेन विवक्षितं योग्यत्वात्। कोइला इति भाषायाम्। तेन शबलं चिताचक्रमिव सङ्कल्पजन्मनः। एतादृशेऽर्थे श्रीहर्षेण देशीय इङ्गालशब्दः प्रयुक्तः। वितेनुरिङ्गालमिवायशः पर इति। गगनगामिगङ्गाया मन्दाकिन्याः पुण्डरीकमिव सिताम्भोजमिव। यदत्र वक्तव्यं तदग्रे वक्ष्यते।

अम्बरं व्योमैव महार्णवस्तत्फेनपुञ्ज इव। कालधातुवादिनः पारदपिण्ड इव। दूर्वाप्रवालशवलो राजतकलश इव। दूर्वाप्रवालेति कलङ्कमाभाय। कन्दर्परथचक्रचारुहृदयाचलचारु-

---

१ + मनोभवाभिषेकस्य D

[1]न्दर्परथचक्रचारुरम्बरप्रासादस्य[2] पारावत इव [3]उदयाचलचारुचूडामणिरिव [4]ऐरावतलुप्तसिन्दूरकुम्भस्थलमिव भग्नशृङ्गपुराणगोमुण्डखण्ड इव तारकाश्वेतगोधूमशालिनो नभःक्षेत्रस्य मलयजपिण्डपाण्डुरराजतपात्रमिव [5]सिद्धाङ्गनाहस्तस्रस्तं[6] ग्रहपतिरुज्जगाम।

चूडामणिः। अम्बरमेव प्रासादो राजगृहं तस्य पारावत इव। गृहप्रकरणे। प्रासादो देवभूभुजाम्। पारावतः कलरवः कपोत इति द्वयोरमरः। ऐरावतस्य लुप्तसिन्दूरं मृष्टसिन्दूरं कुम्भस्थलमिव। श्वेतगोधूमैः शालिनः श्वेतत्वं ताराशाम्याय। काबिलो गोह्लं इति भाषायाम्। शोभमानस्य नभःक्षेत्रस्य भग्नशृङ्ग। भग्नविषाणत्वं वर्तुलत्वार्थम्। पुराणश्चर्मरहितो गोमुण्डखण्ड इव। सीमानिर्माणार्थं रक्षार्थं वा क्षेत्रे गोमुण्डः समारोप्यते। सिद्धाङ्गनाहस्तात् स्रस्तं भ्रष्टं मलयजेन घृष्टचन्दनेन पिण्डं चूर्णमत एवातिपाण्डुरं राजतपात्रं रौप्यपात्रमिव। यद्वा। मलयजपिण्डैर्घृष्टचन्दनगुटिकाभिः पाण्डुरमित्यादि। उभयत्र भंशनवर्णनं चन्दनपङ्कबिन्दवो गुटिका वा तारा विकीर्णा इति ध्वनयितुम्। लोचनमधुकराणां पुण्डरीकमिव। वर्तुलत्वसा-

---

१ न्द० रम्बरसद्माग्र A B C D F G २ -प्रासादश्वेतपा D H ३ उदयाचलचूडा- A B C D F ४ ऐरावतचासितसि- D ५ सिद्धाङ्गनाभनविस्रस्तं C ६ + इव गगनात् तारापति- D + नभसि E

यस्य पुण्डरीकं लोचनमधुकराणां शयनीयसैकतमिव[1] [2]चित्तहंसानां स्फाटिकव्यजनं[3] विरहवह्नीनां श्वेतशाणचक्रं[4]

स्यार्थं विकासपर्यन्तमायद्वे तु कुमुदम्। एवं पूर्वत्रापि। चित्तहंसानां शयनीयसैकतमिव शयनार्हसिकताप्रदेश इव।

विरहवह्नीनां स्फाटिकव्यजनम्। तत्सम्भुक्षकत्वादिति भावः। अत्र व्यजनं वर्तुलमग्निसन्धुक्षकं विवक्षितम्। छितनी इति भाषायाम्।

अवान्तरे मानिनीमानपाटनपटुकुमुदिनीकान्तोदयावसरेऽभिसारिकासार्थप्रहितानां ज्योत्स्नाभिसारिकासमूहप्रेषितानां दूतीनामन्योऽन्यसङ्घटनविरहनिवेदनादिकर्मकुशलानां प्रियतमान् प्रति वल्लभान् प्रति ईर्ष्या उपालम्भावर्जनरूपार्थद्वयोपेताः। ईर्ष्या। उपालम्भे। विकारैर्मदनविकारजन्यचित्तवृत्तिविशेषैर्भङ्गुरा मानावस्थायामिव न केवलं परुषा एवापितु किञ्चित्सापराधव्यञ्जा इत्यर्थः। आवर्जन इदम्। मसृणपक्षा वक्रोक्त्यादिसहिताः प्रवादाः प्रकृष्टवैदग्ध्यविशिष्टा वादा बभूवुः।

रतार्थिनी तु सङ्केतं याति या साभिसारिका।

इति रसरत्नहारः। उपालम्भे।

प्रत्यग्रदोषप्रयेत्यादि स्वगुणं प्रकटयन्नाह। अवक्षोडितं कौपीनावशेषीकृतम्। अनुदरा कन्येतिवदल्पतात्र नञोऽर्थः। उक्तं च।

१—इव A B C D E F २ चित्तराजन C F G ३+इव A B F G H ४+इव A B E G H

मन्मथसायकानाम्[१]। अत्रान्तरेऽभिसारिकासार्थप्रहितानां[२]

तस्मादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः।

इति। आत्मानं तत्त्वतो नाकलयसि न जानासि। यथा धनलुब्धया काममञ्जर्या मलमल्लकशेषो वसुपालितोऽपवाहितस्तथा तवापि का गतिर्भविष्यतीति वक्ति। आत्मानमित्यादि। यद्वा। स्त्रीणां कृतं कार्मणादि कर्म। कृतमिति कृञः कर्मणि क्तः। तत्त्वतो नाकलयस्तत आत्मानमव रक्ष। यथा काममञ्जर्या आत्मानमवन् रक्षन् स महर्षिर्मरीचिः सेवक इव परिभ्रामितस्तथा त्वमपि भ्रमिष्यसीति ब्रवीम्यात्मानमवेति। स्पष्टं चैतदपहारवर्मचरिते। मूलकर्म तु कार्मणमित्यमरः।

वैशिकं मवेदमभिधाय कुलटासक्तं मत्ताभिधत्ते। आत्मानं प्रत्यवतीत्यवा। अवेः कर्तर्यच्। सा चासौ स्त्री अन्यदन्स्त्री तया कृतमवस्त्रीकृतं नीचनारीकर्म। भृङ्गकीटन्यायादतिस्त्रीसेवनात् त्वं स्त्र्येव परैर्ज्ञायस इति गदति। अवेत्यादि। अवस्त्रीकृतं वधकयोपिद्भूतमात्मानं तत्त्वतो नाकलयसि। आ वर्जने। सितत्त्वतो बद्धत्वाद्धेतोः। षिञ् बन्धने। क्तः। त्वमेव मम प्रिया नान्येत्यत्र शपथ इति शपथरूपपाशादित्यर्थः। सितत्त्वत इत्यत्र झरो झरीति पाक्षिकस्तकारलोप इति तु जगद्धरस्य प्रमाद एव। अनचि च इति तकारद्वित्वे रूपमात्मं बोध्यम्।

---

१ — मन्मथसायकानाम् E G H २ -प्रेषितानां A B C F G H +कामसेनानां D

प्रियतमान् प्रति दूतीनां ह्रयीः सेर्ष्याः[1] सप्रपञ्चा विकार-

---

अवस्त्रीभ्यो नीचस्त्रीभ्यः क्षतं पर्याप्तमात्मानं नाकलय माजानीहि। मत्सख्येव त्वामभिलषत इति त्वं नीचनारीसक्तो माभूरिति भावः।

क्षतं युगेऽपि पर्याप्ते विहिते हिंसिते फले।

इति विश्वप्रकाशः।

कं सुखं सुखकारी लयः संश्लेष आलिङ्गनं विलासो वा यस्य न कलयोऽकलयः। न अकलयो नाकलयः। ततो मत्सख्या अन्यस्याः मित यद्ध स्त्रीक्षतं स्त्रीभ्यः पर्याप्तमात्मानमव प्रीणय। मत्सख्या सह रतिं विधायात्मानं सन्तोषयेति भावः। कं मूर्धसुखवारिष्विति विश्वप्रकाशः। लयो विलासे संश्लेषे इति च। यद्वा। नाकस्य दुःखस्य लयः संश्लेषः सम्बन्धो यस्य। अकं पापे च दुःखे चेति विश्वः। यद्वा। अस्य वासुदेवस्य वो वक्षोऽवभाच स्त्री लक्ष्मीस्तया क्षतं पर्याप्तमवस्त्रीक्षतं लक्ष्मीपूर्णमात्मानं तत्त्वतो नाकलयसि। जानासि चेत् कथं तां परित्यज्यान्यत्रासक्तो भवसि। अकारो वासुदेवः स्यात्। वक्षःस्थले च वः प्रोक्त इत्येकाक्षरद्वयम्। यमकश्लेषचित्रेषु वबयोर्डलयोर्न भिदित्यनुशासनमाश्लेषभावेनाचार्थान्तरवर्णनम्। यद्वा। मितस्ततो बहुत्वाद्धेतोः। अर्थात् तया प्रेम्णा बहुत्वादवस्त्रीक्षतमात्मानं नाकलय। सा किल त्वां धनेनाप्यवियतीति व्यङ्ग्यम्। यद्वा। मितत्वाद्धेतो बन्धविशेषबहुत्वात् स्त्रीक्षतमात्मानं नाकलय।

---

1 + भेतिवशः C

भङ्गुराः प्रवादा [1]बभूवुः। तथाहि। अवस्त्रीकृतमात्मानं

अव तत्समीपे गच्छ। यद्वा। नाकस्येवाकाशस्येव लयः संश्लेषो यस्य। निरर्थकसम्बन्ध इत्यर्थः। आकाशे त्रिदिवे नाक इत्यमरः। यद्वा। केन सुखेन लयो विलासस्तेन सिता बद्धस्तत्सम्बोधनम्। लतोऽन्यस्य स्तो न। सर्वनाम्नोरन्यार्थकयोस्त्वलतोस्त्सिलन्तस्य पञ्चम्यन्तस्य प्रयोगो यथायथं बोध्यः।

यथा पतिव्रतया ना स्वपतिः सेव्यत एवं पराङ्गना विदग्धेन सेवनीयेत्यर्थः।

क्षतं मिथ्याभाषणादिना हिंसितमात्मानमवद्योतय। सत्यसम्भाषणात् तेजोऽभिवृद्धिर्जायत इति तदाचरेति व्यङ्ग्यम्। कृञ् हिंसायाम्।

यद्वा। के जले लयो विलासस्तेन सितावगत जलक्रीडाविदित। सितस्त्ववसिते बद्धे सिता शर्करेति हैमः।

सितः समासे धवले विबन्धज्ञातयोरपि।

इति विश्वप्रकाशः। यद्वा। नाके स्वर्गे लयो विलासो येषां ते नाकलया देवास्तद्वत् सितोऽवगतः। यद्वा। अवस्त्रीकृतं लक्ष्मीहिंसितमात्मानं त्वत्तो नाकलयसि पूर्वं तथैव धनदानादिना सर्वस्पृहणीयतामापादित इदानीं तामेवाधासयसि। सा दरिद्रावस्था ते किं विस्मृतेति व्यङ्ग्यम्। कस्य जलस्य लयो विलासो नीचगमनरूपस्तेन सितावगत नीचगमनप्रसिद्ध। स्त्रीकृतं स्त्रीहिं-

---

[1] प्रव० CEFG

नाकलयसि तत्त्वतः कान्त प्रस्तर इव क्रूरोऽसि न चाकर्षक-

मितमात्मानमेव। यद्वा। अकारो वासुदेवस्तेन तुल्यमेव।
इवार्थे वः। अ व कृष्ण इव स्वीकृतं स्त्रीपर्यायमात्मानं तत्त्वतो
नाकलयसि। अन्याभिः सह क्रीडां करोषि चेत् कुरु परन्तु
मत्सख्यापि सह क्रीडां कुर्विति भावः। व वा यथा तथैवैवं साम्ये
इत्यमरः। यद्वा। सितत्वतो धवललाञ्छनोऽरव कृष्ण इव स्वीकृतं
स्त्रीपर्यायमात्मानं नाकलय। तदीयशरीरवर्ण एव त्वच्छरीरे
नास्ति कथं तदीयसामर्थ्यमिति भावः। यद्वा। येन यशसा
सितत्वं तस्मात्। नाके स्वर्गे ल इवेन्द्र इव स्वीकृतमात्मान-
मेव। यशो यः कथितः शिष्टैः। ल इन्द्र इत्येकाक्षरकोषः।

अव रक्षे गतौ कान्तौ प्रीतौ तृप्तौ चुतौ श्रुतौ।
प्राप्तौ क्षेपेऽर्थने वेशे भागे वृद्धौ यहे वधे॥

साम्येऽप्यवगमे कामे कृतावितिति कविकल्पद्रुमः।

दूतीसंवादवाक्यैकव्याख्यादिग्दर्शिता मया।
अन्यथाऽऽलस्यभीतेन शेषह्यं सुधियाधिकम्॥

हे कान्त कस्य सुखस्यान्तो यस्मात्। प्रस्तर इव क्रूरोऽसि
पाषाण इव कठिनोऽसि निष्ठुरहृदयोऽसि। तथापि न चाक-
र्षको यत्सम्बन्धात् प्रत्युप्तमपि लोहं निःसरति। अयस्कान्त-
मणियुक्तो यत्सम्बन्धाल्लोहमुपगच्छति सूर्यकान्तो वा सूर्य-
कराभिहतयत्सम्बन्धादिन्धनादावग्निरुत्पद्यते। द्रावको
यत्सम्बन्धाल्लोहं द्रवति। चन्द्रकरस्पर्शात् स्वयं द्रवति स चन्द्र-

चुम्बकद्रावकेष्वेकोऽसि[1] भ्रामकोऽसि परं कितव धर्मार्थान्य-

कान्तो वा भ्रामको यत्सम्बन्धाल्लोहं भ्रमति स गुरिया इति ख्यातः।

चुम्बको द्रावकश्चैवाकर्षको भ्रामकस्तथा।
एकद्वित्रिचतुःपञ्चषण्मुखाः सम्भवन्ति ते॥

इति लोहशास्त्रे। कामकलाकौशलेन यो नारीमाकर्षति स आकर्षकः। रतिकौशलेन यश्चुम्बति स चुम्बकः। औषधिविशेषयोगेन कुचादिमर्दनेन वा यः कठिनकामिनीं द्रावयति स द्रावकः। एतेषु नैकोऽसि। परं केवलं भ्रामकोऽसि। अन्यासक्तो योऽन्यनारीं भ्रामयति प्रतारयति स भ्रामकः। कस्य शत्रुशिरसोऽन्तो यस्मात् कान्तः। आकर्षको धनुराकर्षकः। चुम्बकः सैन्यप्रवेशज्ञः। द्रावकः परसैन्यविद्रावणः। तेष्वेकः श्रेष्ठोऽसि। भ्रामकोऽस्यादीनामसेः खड्गस्य भ्रामको वा कान्त मनोहर न प्रस्तर इव क्रूरोऽसि। प्रार्थितः सन्नपराधान् क्षमसे। आकर्षकचुम्बकद्रावका इषवो बाणा यस्य स कामस्तद्वदेकोऽद्वितीयोऽसि। भ्रामको नारीचेतसाम्। एकोऽद्वितीये श्रेष्ठे च। क्रूरो कठिननिर्दयौ। इत्युभयत्र विश्वः।

धर्मार्थमन्येन केनचिद्धर्मिष्ठेन राज्ञा नागरिकादिना वा प्रयुक्त आतरं विनाकिञ्चनजनान् परपारे नयेति प्रेरितः क्षेपणिको नाविक इव मुधा वृथा वाहिततरं वारि जलं येन।

---

१ -कोऽप्यसि C H इति क्रम० च नर० च।

प्रयुक्तः क्षेपणिक इव मुधा वाहिततरवारिस्त्वमसि सखेदमिव मनसा चिन्तयसि दुर्लभं जनं सत्त्वसारचरितो यो रिपु-

---

अत्र स्वामिन एव धर्मो न नाविकस्येत्यर्थः। मुधा वाहिततरं वारि जलं येन वा। तदनुरञ्जनदशायामिति भावः। अतिस्थो मेवेतिवदुपहासार्थं सेर्ष्योक्तम्। न तु तत्त्वकथनम्। रसाभासापत्तेः। यद्वा। मुधा वाहितस्तरवारिः खड्गो येन। आवर्जने। कितव विदग्ध धर्मार्थं धर्मप्रयोजनं मुधावा व्यर्थावना अर्हिताः शत्रवो यस्य। अन्येन शत्रुणा प्रयुक्तं शस्त्रादि तत्क्षेपणिको नाशकस्तरवारिः खड्गस्तद्वत्।

क्रूर धर्मार्थाद्धर्मप्रयोजनादन्येनाधर्मेण प्रयुक्तः। यद्वा। त्रिवर्गे धर्मार्थाभ्यामन्यः कामस्तेन प्रयुक्तः।

कितवो द्यूतकृद्धूर्तविदग्धेषु निगद्यते।

तरवारिर्मतः खड्ग इति धरणिद्वयम्। मुधा तु निष्फलं दृश्येत्यमरः।

तूष्णीं स्थिते पृच्छति। सखेद सकष्टं मनसा दुर्लभमिव जन नायिकान्तरं चिन्तयसि। सखे मित्र दमिव खण्डितमिव शृङ्गारे सखे दमिव कलत्रमिव दुर्लभं जनम्। दकार उच्यते कामः।

दं कलत्रे बुधैः प्रोक्तं छेदे दाने च दातरि।

इत्येकाक्षरकोश उभयत्र।

दः शुद्धे दोऽवदाने च दातरि च्छेददानयोः।

इति विश्वप्रकाशः।

मण्डलाग्रतो निर्वृतिमुपेत्य तिष्ठति। स खलु वीरः प्रति-

स त्वत्सारचरितमुच्छ्रयवहारः। या अगन्ति ता अगो मण्डलस्याग्रे मण्डलागः कुलटा रिपुभर्ता मण्डलाग्रे रिपुमण्डलागस्तासु रतो रिपुमण्डलाग्रतो निर्वृतिं सुखमुपेत्य तिष्ठति। अक अग कुटिलायां गतौ। यद्वा। निर्गता वृतिरावरणं यस्यास्तां निरावरणां वेश्याम्। वीर निन्दायां रिपुमण्डलाग्रतः शत्रुखड्गान्निर्वृतिं सुखम्। शत्रुणा खड्गे धृते स्वयं सुखी तिष्ठतीत्यर्थः। निर्वृतिं चेत्रादेरावरणं वा। भयादुपेत्य। शृङ्गारे सत्त्वेन गुणेन सारचरितो यो रिपुमण्डलाग्रतः शत्रुमण्डलाग्रतो निर्वृतिं जीविकाम्। यद्वा। रिपुमण्डलाग्रतः सपत्नीसमूहाग्रतः। सप्तम्यर्थे तसिः। निर्गता वृतिरन्यपुरुषान्तरवरणेच्छा यस्याः। सत्सखी तामुपेत्य तिष्ठति। वर्तमानसामीप्य इति लट्। पूर्वमन्याः सपत्नीरनादृत्य त्वं तस्यामेवानुरक्तः स्थित इदानीं तथैव कर्तव्यं त्वयेति स्तौति।

कौक्षेयको मण्डलाग्रः करवालः कृपाणवत्।

इत्यमरः। मण्डलं देशसङ्घयोरिति विश्वः।

निर्वृतिस्तु सुखे जीव्येऽभयेऽप्यचयेऽपि च।

इति धरणिः।

अपराह्ण। स खलु वीरः प्रहरो यः प्रतिपक्षस्य शत्रोः सम्प्रहारतः कुञ्जरान् गजान्नयति। यद्वा। विशेषेणेरयति वीन् पक्षिणो वेरयतीति वीरः। सम्प्रहारतो गमनात्। सम्प्रहारो

पक्षस्य यः सम्प्रहारतः कुञ्जरान् नयति। धृतोरुकरवालस्त्व-

रणे गताविति हैमः। ईर गतौ कम्पने च। यद्वा। विशिष्टा इरा मद्यं यस्य। मद्यप इति यावत्।

इरा भूमिसुरावारिभारतीषु प्रयुज्यते।
कुञ्जरोऽनेकपे केशे धातक्यामपि कुञ्जरा॥
वीरस्तु सुभटे श्रेष्ठे वीरो भङ्ग्यन्तरेऽपि च॥

इति विश्वप्रकाशस्त्रिपु।

प्रतिगतः पक्षं प्रतिपक्षो बलं तस्य। यद्वा। प्रतिपक्षस्य सख्युः सहायस्य वा।

पक्षो मासार्धके गेहपार्श्वे साध्यविरोधयोः।
केशादेः परतो वृन्दे बले सखिसहाययोः॥
पतत्रे चुल्लिरन्ध्रे च देहाङ्गे राजकुञ्जरे।

इति विश्वप्रकाशः। यद्वा। विशेषेण ईं काममीं लक्ष्मीं वा रात्यादत्ते वीरः।

ईकारः कथ्यते कामो लक्ष्मीरीकार उच्यते।

इत्येकाक्षरकोशः।

सम्यक् प्रकृष्टोऽत्युत्कृष्टो हारो मुक्तादिमाला तान् सम्प्रहारतः। द्वितीयार्थे तसिः। कुञ्जरान् केशान् नयति। हारो मुक्तावली युद्ध इति विश्वप्रकाशः। यद्वा। सम्प्रहारतोऽत्युत्कृष्टरतियुद्धे। सप्तम्यर्थे तसिः।

योऽपि परमकाण्ड एव सम्पतन् महापदं विग्रहेण लभते।

खलु स्यात् प्रतिषेधेऽपि निश्चयेऽप्यवधारणे।

इति विश्वः।

अन्याह। धृत उरुकरेण विशालहस्तेन बालानां शत्रुकेशानां सञ्चयो येन। यद्वा। धृत उरुर्महान् करवालस्य कृपाणस्य सञ्चयो येन। यद्वा। जरूपर्यन्तौ करावूरुकरौ ताभ्यां धृतो बालानां प्रतिपक्षलक्ष्मीकेशानां सञ्चयो येन। आजानुबाहुरित्यर्थः। यद्वा। धृत उरुकरेण भूरिराजभागेन बालानामश्वानां सञ्चयो येन। यद्वा। धृत उरुकरेणोरुकराणां वा बालानां सञ्चयो येन। यद्वा। धृत उरुकरवालानां सञ्चयः। सुरतबन्धे।

विग्रहेण शरीरेण कलहेन युद्धेन पक्षिग्रहणेन वा महापदं महास्थानं महापत्तिं वा परं शत्रु परमत्यर्थं वाऽकाण्डेऽनवसरे परमकाण्ड उत्साहावसरे वा।

विग्रहो युधि विस्तारे प्रविभागशरीरयोः।

इति हैमः।

अपराह। राजसे रजोगुणविकारे सत्यनरहितो मनुष्याननुकूलस्त्वं न राजसे रहितो मत्सख्या जनैर्वा त्यक्तः। रहत्यागे। क्तः। यद्वा। राजसेन प्रजाद्यपि रजोगुणेन रहितो नरहितो मनुष्यहितो न राजसे ध्रुवम्। यद्वा। राजस रजोगुणप्रधान इनरहितोऽप्रभुस्त्वं न राजसे यतो रहितः प्रभुणा त्यक्तः। नरेषु हितो राजसे ध्रुवम्।

राजसेन रहितो राजसे न रहितो ध्रुवं विशारदा विशारदा-
ऽविशदा विशदात्मनीनमहिमा महिमानरक्षणक्षमा क्षमा-

ध्रुवं तु निश्चिते तर्के निश्चले शाश्वतेऽव्ययवत्।
इति विश्वप्रकाशः। यमकालङ्कारः।

अन्यार्थ। विगता शारदा सरस्वती यस्य तत्सम्बोधनम्।
धृष्टो वा चतुरो वा। विशारदो बुधे धृष्ट इति विश्वप्रकाशः।
स्त्रीविशेषणं वा। विशिष्टः शारदोऽभ्रो मेघस्तद्वद्विशदा निर्म-
लान्तःकरणा।

विशन् प्रविष्टो भवन् आत्मनीन आत्महितो महिमा महित्वं
यस्याः। मह उत्सवो येषां ते महिनस्तेषां मानरक्षणे सम्मानपालने
क्षमा। क्षमातिलक पृथ्वीभूषण शान्तितिलक यद्वा शान्तिप्रद-
र्शक तव मनसि धीरता बुद्धिरता सर्वकालिकीत्यर्थः। अधीरता
कातरता। वचस्यद्भुतताऽसत्यता भुवि पृथिव्यां तता विस्तृता।
यद्वा। अकारो वासुदेवस्तस्माद्भूतसत्त्वा कन्दर्पता। यद्वा।
अक्षेण व्यवहारेण मा लक्ष्मीः सा तिलकमस्य। यद्वा। अक्षस्य
बिभीतकस्य मा लक्ष्मीस्तत्तिलक।

अक्षः कर्षे तुषे चक्रे शकटव्यवहारयोः।
आत्मजे पाशके चाक्षमिति विश्वप्रकाशः।

विशेषेण शारं हिंसां ददातीति विशारदः। शॄ हिंसा-
याम्। घञ्। महिमानन्ति प्राणन्ति ते महिमाना मानधनास्तेषां

तिलक धीरताधीरता मनसि भूततामूतता वचसि साहसेन

रचणचम हे धीर तास्तादृश्यो धीरतास्तव मनसि तव वचसि भूतता सत्यता भूतता पृथ्वीप्रख्याता।

भूतं न्याय्ये पिशाचादौ भूतं सत्योपमानयोः।

इति विश्वः। विशारदाभ्रविशदा विशिष्टशरन्मेघस्वच्छा। निष्कपटहृदयेति यावत्। आत्मनि स्वविषये विशिष्टं शं श्रेयो यति विशदाः। दो अवखण्डने। इनस्य सूर्यस्य महिमा महत्त्वं यस्य तादृशस्त्वम्।

शं श्रेयसि शकारः स्याच्छिवे सौम्नि प्रकीर्तितः।

इत्येकाक्षरकोशः। शं धर्मे शास्तुशास्तरीति विश्वप्रकाशः। आत्मन्विश्वजनभोगोत्तरपदात् ख इति खः। आत्मनीने।

*अपराह। सा मत्सखी त्वामाह। हे सेन सप्रभो परतन्त्र सा मनसापि नान्यमनुसरामीति प्रतिज्ञाविशिष्टाहम्। आहसेन भवदीयपद्मासेन कस्य सुखस्य मलाधारपात्री। मल मल्ल धारणे। मचाद्यच्। पराजिता कमला लक्ष्मीर्यस्याः सा कमलापराजिता। आहिताग्न्यादिः। अतएवापराजिता। अन्यस्त्रीभी रूपसुरतकौशलादिभिरपराभूता। पराजितपराभूताविव्यमरः। यद्वा। आहसेनेपद्मासेन अपराजिता एतदभिधाना देवी पराजिता पराभूता के मलमस्याः कमला गिरोमालिन्यविशिष्टा। सीमन्तकर्मण्यनभिज्ञेति यावत्। तादृशी कमला लक्ष्मीः। यद्वा। साहसेनाभिसरणरूपेण कमला लक्ष्मीस्तत्परा कमलापरा

साहसेनकमला कमलापराजितापराजिता सा त्वदर्पणा
[1]दर्पणाकारविमलाशया [2]शयाब्जविनिर्जितकिसलया सलया-

लुब्धेति यावत्। जिता। यया लुब्धा नाभिसरत्येवं भीत्या मत्स-
ख्यभिसरतीत्यर्थः।

ननु कुरूपा सा केनापि नाद्रियत इति सा स्वतो धावति
न तत्र मत्सुहृद्धेतुरित्याह। आहसेन सा प्रसिद्धा कमला लक्ष्मीः
पराजिता। मत्सख्येति शेषः।

सखीभावमाह। ला आदाने। लातीति ला न ला अला
लुब्धा कं सुखमपराजिता त्वया पूर्वं मेलापनाद्दीपिता। राजृ
दीप्तौ। यद्वा। साहसेनाहसेन युक्तेति शेषः। सा मत्सखी कमला
वरस्त्री। आकमला बहुलक्ष्मीका। कमला तु वरस्त्रियामिति
शाश्वतः। हस इति स्वनहसोर्वेत्यप्प्रत्ययान्तः। यद्वा। यया परा
कमला पराजिता सा मत्सख्याह। आहसेनेपद्धासयुक्तेन त्वया
जितमात्मानमाहेत्यर्थः। कीदृशी सेना सप्रभुः कमला लक्ष्मी-
र्यस्यास्तया लक्ष्मीदानभोगादियुक्ता न त्वस्वामिकलक्ष्मीवद्दा-
नभोगहीनेत्यर्थः।

इतराह। त्वय्यर्पणमस्यास्त्वदर्पणा दर्पणाकारो मुकुराकार
आशयो यस्याः। शयाब्जेन करकमलेन विनिर्जितकिसलया जि-
तनवपल्लवा।भ्रूलिविभ्रमेणाङ्गुलिभ्रमणेन सलया सविलासा।
लयो विलासे संश्लेषे साम्ये तौर्यत्रिकस्य च।

---

१ द० -विमलाविमलाशया D   २ शयाब्जवि- A B C D F

ङ्गुलिविभ्रमेण विभ्रमेण प्रतिगवाक्षशलाकाविवरं विलोकयन्ती

इति विश्वप्रकाशः।

गवाक्षेषु शलाका जन्तूनामागमनप्रतिषेधार्थं प्रयुक्ताः काष्ठादिनिर्मितास्तासां विवरं विवरं प्रति प्रतिगवाक्षशलाकाविवरं विलोकयन्ती पश्यन्ती विलोकवत् पक्षिजनवदाचरन्ती विलोकयन्ती। यथा पक्षिणः पञ्जरशलाकान्तरेण पश्यन्त्येवं मापि भवानागतो न वेति गवाक्षशलाकान्तरेण पश्यति। गवाक्षशलाकान्तरदर्शनं परकीयात्वद्योतकम्।

स्याच्छलाकापि मदनसारिकाशल्ययोः शरे।

छत्रे पञ्जरकाष्ठे चेति विश्वप्रकाशः। उक्तं च।

स्वानूढा स्वानुरक्ता स्त्री परकीया निगद्यते।
उत्तमाधमभेदाभ्यां द्विविधैषा पराङ्गना॥
अलक्षितानुरागैषा स्वीयाकल्पोत्तमा भवेत्।
तद्भिन्ना त्वधमा ज्ञेया तद्भेदा लक्षितादिकाः॥
परोढाकन्यकाभेदाद्द्विविधा द्विविधा मता।
विदग्धानुदिता चैषानुशयानाथ लक्षिता॥
गुप्ता च कुलटा चेति षट्प्रकारोदिता बुधैः।

इत्यखङ्कृते रसरत्नहारे। यत्तु। अप्रकटपरपुरुषानुरागा परकीयेति तन्न। कुलटाया अपङ्ग्रहात्। उपालम्भपक्षे नञ्समासः। विभ्रमेण भ्रमणेन।

स्याच्छलाकापि मदनसारिकाशल्ययोः शरे।

विलोकयन्ती त्वया विना साविना सायमनुभवन्ती दुःखानि जीवनायक जीवनाय क इह[१] नाश्रयन्ति[२] सुभगम् । अन्या-

---

न्वे पञ्जरकाष्ठे चेति विश्वप्रकाशः ।

इतराह । अविना मेषेण त्वया विना सायं सायङ्काले दुःखानि त्वद्वियोगदुःखान्यनुभवन्ती तिष्ठति । तामनुसरेति व्यङ्ग्यम् । धीरेयम् ।

प्रियं सोत्प्रासवक्रोक्त्या मध्या धीरा दहेद्रुषा ।

इति रसरत्नहारः । अविना रथकेण त्वया विना दुःखान्यनुभवन्त्यतः सायं सादमनुभवन्ती तिष्ठति । अव रक्षणादौ । सर्वधातुभ्य इन्निरितीनिः । षो अन्तकर्मणि । आदेच इत्यात्वम् । आतो युगिद्यु क् ।

अन्याह । जीवनायक प्राणधारक जीवनाय जलार्थम् जलाहरणार्थमित्यर्थः । सुभगं शोभनपशुं त्वां के नाश्रयन्ति ।

भगमैश्वर्यमाहात्म्यज्ञानवैराग्ययोनिषु ।

पशुवीर्यप्रयत्नेच्छाश्रीधर्मरविमुक्तिषु ॥

इति विश्वप्रकाशः । अधीरोक्तिरियम् । अधीरा परुषोक्तेति रसरत्नहारः । शृङ्गारे । जीवनायक मत्सखीप्राणेश जीवनाय प्राणधारणार्थं के जनाः सुभगमैश्वर्ययुक्तं त्वां नाश्रयन्ति । क इति पुलिङ्गनिर्देशो यदि पुरुषाः स्वप्राणधारणार्थं त्वामाश्रयन्ति तर्हि स्त्रीणां का वार्त्तेति द्योतयितुम् ।

---

१ + भाEGH २ -ति CG

स्तावदासतां दासतां पुरतोऽहमेव भजामि। मैत्यतोऽमैत्यतो-

अपराह्व। अन्यया मत्सख्यतिरिक्तयास्तः चिन्नस्तत्सम्बोधनम्। अतएवावद तस्यां क्रोधादसम्भाषक। असतां परपीडानभिज्ञानां पुरोऽये दासतां दास्यमहमेव भजामि। अतोऽमैत्र्यतोऽमित्रभावात्। मैत्र्यस्तु वदो वदावदो वक्तेत्यमरः। यद्वा। अन्यैस्त्वदपेचयान्यैः शृङ्गारिभिस्तत्सम्बन्धिभिर्वास्ता चिन्ना तया सह वदति तत्सम्बोधनम्। यद्वा। अन्यास्तु अतएव दास पुरोऽहमेव भजामीति तां दासतां पूर्वस्वीकृतां मत्सख्या दासतामव रच। यद्वा। अन्यास्तेनान्यनारीपरित्यक्तेनावदाभाषणकर्त्री।

निर्माल्योज्झितपुष्पदामनिकरे का षट्पदानां रतिः।

इत्यहं सतामेव दासतां भजामीति। यद्वा। अवनमावो घञ्। अन्यास्तानामावदा रचणकर्त्री। अशरणशरणेति यावत्। प्रीतिप्रदा वा तृप्तिप्रदा वा। यद्वा। अप्रशस्तो मस्तन्द्रोऽस्यास्ति। अमि सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः। हापितः क्वासि हे सुभ्रु इत्यत्र सम्बुद्धिरूस्तो यथा रामविरहातिशयपोषकस्तथा सर्वथाप्रयोजकत्वद्योतनाय नपुंसकप्रयोगः। अनाः प्राणिनस्तेभ्यो हितान्या। तस्मै हितमिति यत्। सतामावदा। त्वयेति शेषः। अस्ता तिरस्कृता। इदानीं दासतां भज। कीदृशी पुरो नगर्यां मेव लक्ष्मीव। इन्तेर्विच्। हे अहाच्छेदक। अत्रापि पूर्ववत्। मः शिवश्चन्द्रम वेधाः। हकारश्छेदने मत इत्युभयत्रैकाचरकोशः। अन्या इतरास्तावदासतां तिष्ठन्तु। अहमेव पुरो दास्यं भजामि।

ऽस्तु अञ्जसारतः सारतः किमपि कन्दर्पकं दर्पकं न तनोषि विशेषतोऽशेषतः स्थितमेव मरणं शठधियां[1] शोधन यशोधन-

---

अपराद्ध। अञ्जसा शीघ्रेण मारतो यस्मात्। सा तन्वी तव प्रियेति शेषः। त्वं रतः सक्तः किमपि दर्पकं न तनोषि। किमुत्कृष्टं दर्पकं दर्पं न तनोषि। विशेषतो विशेषात्। अशेषतो निःशेषात्। मरणं स्थितमेव। माधुर्यं गुणः।

मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू।
अवृत्तिर्लघुवृत्तिर्वा तन्माधुर्यमिति स्मृतम्॥

इति काव्यप्रकाशे।

परा प्राह। हे शठधियां जडबुद्धीनां शोधन यशसा अधन बुद्धिशुद्धियशोहीन। उत्कटमसौम्यमक्षि येषु तैः कटाक्षैः प्रेमहार्यं सुखधारणीय या त्वां क्रूरकटाक्षैरामन्त्रयति तस्यास्त्वं वश्य इत्यर्थः। अतएवासहार्याशय महानीचाशय। अस्तं त्यक्तं हास्यं यया तस्या आविर्भूतं हास्यं यस्मिन् तत्सम्बोधनम्। परितो जनान् स्वशिक्षकजनानस्यति। तया कार्मणादिना इतप्रज्ञतया तत्सम्बोधनम्। आवर्जने। शठधियां जडबुद्धीनां शोधन शिक्षक। अतो यशोधन प्रेमहार्यं केवलमपयवश्य। अतो महार्याशयात्युन्नताभिप्राय। तदा मत्सख्या मानमसये। उत्कटाक्षैः कटाक्षैर्भवत्सम्बन्धिभिः। अस्या अस्म-

---

१ -यावसो- ।) इति मर० ष।

[1]प्रेमहार्यामहार्याशयोत्कटाक्षैः कटाक्षैराविर्भूतदास्यास्तदास्याः परिजनाः कमलाकृतिनारीणां कमलाकृतिनारीणां

त्सख्याः परिजना अस्मदादय आविर्भूतदास्याः। यस्मिन् काले तया मानः कृतो भवता च क्रूरकटाक्षैः सा दृष्टा तदारभ्यैवास्मदादयस्तत्परिजना भवत्सेवकाः संवृत्ताः। एवं च चिरसेवकानामस्मदादीनां प्रार्थनया सा सुसम्पन्नमनोरथा सम्पादयितव्येत्यर्थः। यद्वा। उत्कटव्यवहारैः। यद्वा। उत्कटभाभिर्वोत्कटार्थैः। यद्वा। तदा भवत्कोपकाले उत्कटाक्षैः क्रूरैः कटाक्षैरित्यादि पूर्ववत्। अत्र पक्षे सर्वथा तवैव दोष इत्यर्थः।

काचिदाह। भवतारीणां शत्रूणां कमलाकृतिनारीणां लक्ष्म्याकृतिस्त्रीणां कमलाकृति मुखं न मलिनितमिति न। यद्वा। कृतिना भवतारीणां शत्रूणां कमला लक्ष्मीर्न मलिनिता न मलिनीकृता। कमलाकृति पद्माकारं नारीणामर्थाच्छत्रुनारीणां मुखं न मलिनितमिति काकुः। नपुंसकमनपुंसकेनेति नपुंसकैकशेषः। कृती कुशल इत्यपीत्यमरः। यद्वा। कमलया लक्ष्म्या कृती तेन भवतारीणां नारीणां कमलाकृति मुखं न मलिनितम्। काकुः पूर्ववत्। यद्वा। कमलाकृतिन् पद्माकार निर्लेपत्वेन साम्यं लक्ष्मीकुशलेति वा सम्बोधनम्। आरीणामासाकल्येनातिकठिनतया वैदग्ध्येन वा कोऽपि नास्मान् द्रावयितुं

---

१ प्रेमहार्यासमोत्क- A B प्रेमहार्याशमासमोत्क- C D F H

भवता मुखं [1]च मलिनितं विश्वस्य विश्वस्य व्यवस्था [2]समा-
साद्यसमासाद्यमनेककालसङ्गीतसङ्गी तनुपे[3] [4]तनुपेकमनङ्ग-
मनङ्गपुष्पेपुपुष्पेपु रुजा तरसा जातरसा मन्दाक्षमन्दा क्षणं

पटुरिति शत्रुतापन्नानां नारीणां कमलाक्षति कमलरम्यं मुखं न मलिनितमिति काकुः। अकाकुरुपालम्भपक्षः।

काचिदाह। विश्वस्य सर्वस्य विश्वस्य विश्वासं कृत्वा सा तव प्रिया समा सलक्ष्मीका विगतावस्था मर्यादा वयो वा यस्याः। आदिनोऽसमा विषमा त्वं तु साद्यमासाद्ययोग्यं तनुपे शरीराय। तनुः स्यात् तनुपा सार्धमिति शब्दभेदप्रकाशः। कमलाक्षेत्यार्जने तनुपे आमेवकं विश्वस्य सर्वस्य जगतो मध्ये त्वया व्यवस्था समासादि असमं विषमसत्यसमासा हे असमास इति वा आद्यं प्रथममतनोः कामस्य सेकं कं सुखम्।

पुष्पं विकाशे कुसुमे स्त्रीणां च रजसि स्मृतम्।

इति विश्वः।

अनङ्गमशरीरं पुष्पेपुपुष्पेपु कामशरेपु तरसा वेगेन जातरसा मन्दाक्षं मन्देक्षणं भ्रमन्ती मुह्यति। आवर्जने। हे ऽनङ्ग साक्षात् काम। अनङ्गमसमर्द्दं प्रति पुष्पेपुपुष्पेपुरुजा कामबाणरुजा तरसा वेगेन जातरसोत्पन्नानुरागा मन्दाक्षमन्दा लज्जामन्थरा क्षणं भ्रमन्ती मुह्यति।

१—च C E F G २ स० -कालं स- D इति नर० च। ३ -तमनुपे A B D H ४ तनुपेकसमङ्ग- A B H

भ्रमन्ती मुह्यति। कामधुराधरेण कामधुराधरेण मुक्तारजो-
राजिविशेषकेण[१] विशेषकेण मुखेन्दुना तव हृदि लग्ना[२]

धुराया धरो धुराधरः। भागुरिमते टाप्। कामं धुराधरस्तेनात्यन्तभारवाहकेनाधरेण नीचेन रजोराजिभिर्विशेषकं तिलकं यस्य तेन त्वया। विशेषस्य द्वावादेः शेषो यत्र तेन मुखेन्दुनोपलक्षिता मधुरा रम्या मूर्तिः का स्त्री मुक्ता न कापीत्यर्थः। एतादृशेनैतादृशो बद्धा उपभुक्ताः। समालङ्कारः।

समं स्याद्वर्णनं यत्र द्वयोरप्यनुरूपयोः।

इति लक्षणात्। आवर्जने। कामस्य धूः कामधुरा। ऋक्पूरिति समासान्तः। तस्या अधरस्तेन मधुरः सुधाधिकस्वादोऽधरोष्ठो यस्य तेन। मुक्तारजोराजिभिर्विशेषकं तिलकं यत्र तेन। एतन्निर्माणावसरे बहवो मुखेन्दवो निर्मितास्तेषु रम्यत्वादस्यैव प्रयोगः कृतो विधिनेति विशेषेण शेषो यस्य तेन मुखेन्दुनोपलक्षिता का कापि स्त्री वर्तते। शेषो यदत्र मत्सखीं ज्ञात्वा न चलति चेत् सामान्यरूपेणाभिधायैनं नेष्यामीति कुलप्रधानाया इयमुक्तिः।

तमालपत्रतिलकचित्रकाणि विशेषकम्।

इत्यमरः।

इतराह। तव हृदि लग्ना कापि वर्तते। अस्मदिष्ट आक-

---

१ + मुक्तारजोराजि- C २ लोना II

म्रदिमाकरेण करेण स्वेदबिन्दुपयोधरेण पयोधरेण[1] वक्षः-फलकाञ्चनेन जितानाविलकाञ्चनेन कामदारुण मदारुण-नेत्रासरमयं रमयन्तं त्वामदयं मदयन्तौ परमकमितारं

रसेन दासीतं व्यङ्ग्यम्। करेण स्वेदबिन्दुभिः पयोधरो जलधरस्तेन वक्षःफलकेऽञ्चनं गमनं यस्य। पतितत्वादित्यर्थः। तेन पयोधरेणोपलक्षितानाविलकाञ्चनेन जिता। श्यामवर्णत्वादित्यर्थः। आवर्जने म्रदिम्न आकरेण करेण स्वेदबिन्दुपयोधरेण वक्षःफलकस्याञ्चनं पूजनं रम्यत्वं येन। जितमनाविलं स्वच्छं काञ्चनं येन। गौरत्वादिति भावः। तेन पयोधरेणोपलक्षिता तत्र हृदि स्त्री काऽपि वर्तत इति पृच्छति। अस्ति चेत् तामनुसरेति व्यङ्ग्यम्।

अकर्मकठिनौ हस्तौ पादौ चाध्वनि कोमलौ।

इति सामुद्रिकलक्षणं तु पुरुषविषयम्। अञ्चु गतिपूजनयोः। काञ्चनं चम्पके हेम्नीति विश्वः।

अन्याह। कामेनाभिलाषेण दारुण मदारुणनेत्र। असारमयमदयं रमयन्तं त्वाम्। परित्यज्येति शेषः। मदयन्ती मत्ता का परमत्यर्थमकं दुःखमितारं प्राप्नुवन्तं परं भिन्नमकमितारमकामुकम्। अकं पापे च रोगे चेति विश्वः। आवर्जने कामेन मदेन दारुण कठिननारीणामप्ययत्नेन द्रावक। मदयन्ती सीधुसेवनात्। अतएवारुणनेत्र। कामदाभिलाषप्रद। सारमयमदयं

१-पयोधरेण A D E रहित म८० च।

परमकमितारं वाञ्छति हारिणा हारिणा स्तनकुम्भेन हारिणाच्छिच्छिहारिणा चक्षुषा हारिणा[१]। अनन्तरं दुग्धार्णवप्रविष्टमिव स्फटिकगृहप्रविष्टमिव[२], [३]श्वेतद्वीपनिवाससुख-

---

रमयन्तं परमकमितारं परमकामुकं परमकं परमसुखमितारं त्वां वाञ्छति। कामुके कमितानुक इत्यमरः। अत्रापि समालङ्कारः।

पराह। हारिणाऽन्योऽन्यं युद्धवता। पतितत्वादिति भावः। अरिणा जनानां द्वेषतामम्यादनेनेत्यर्थः। एतादृशेन स्तनकुम्भेनोपलक्षिता। हे गर्ते च्छति हारि। ह्व गतौ। अच इः। हारिणा गर्तगतेनातएवाच्छिच्छिहारिणा प्रेक्षकनेत्राभिलाषहारकेण। कुत्सितत्वादित्यर्थः। चक्षुषा चोपलक्षितं त्वामाह। एतादृग्दोषविशिष्टा त्वामेतादृशमाहेत्यर्थः। आवर्जने। हारिणाच्छिच्छिहारिणा हरिणसम्बन्धिनेत्रकान्तिहारिणा चक्षुषोपलक्षिता हारिणा हारवता हारिणा करिकलभकुम्भानुकारित्वाद्रम्येणेत्यर्थः। स्तनकुम्भेनोपलक्षिता। अनेन मत्सखी युवतिः सुन्दरावयवा प्रसाधिता चेति सुगन्धि जाम्बूनदम्। हा गर्तेऽपि निगद्यते इत्येकाक्षरकोशः।

निरीक्ष्य लोकव्यवहारजालं
रीतिं कवीनामथ कोशजालम्।

---

१ + च A B २ निष्टमिव C D G H ३ श्वे॰ सुखनिवहम- H

मनुभवदिव[1] जगदामुमुदे। क्रमेण च विघटमानदलपुट-[2]कुमुदकाननकोशमकरन्दबिन्दुसन्दोहमुदितमुग्धमधुकर-कुलकलरुतमुखरितदिगन्ते[3] [4]चन्द्रिकापानभरालसचकोर-कामिनीभिरभिनन्दितागमने[5] [6]सुरतभरपरिश्रमखिन्नपुलि-

---

व्याख्या मयेयं रचिता महेश-
पादारविन्दे प्रणिधाय चेतः॥

चन्द्रिकाव्याप्तिं वर्णयन्ति। अनन्तरं चन्द्रोदयोत्तरं दुग्धार्णवप्रविष्टमिव स्फटिकगृहेषु प्रविष्टमिव श्वेतद्वीपनिवासस्य सुखमनुभवदिव जगद्भुवनमा साकल्येन मुमुदे। मुद हर्षे।

क्रमेण कन्दर्पकेतुर्वासवदत्ताजनकनगरमयासीदित्यन्वयः। विघटमानं विकसद्दलपुटं पत्रपुटं यस्य तादृक् कुमुदकाननं तस्य कोशेषु मध्यभागेषु मकरन्दबिन्दुसन्दोहः पुष्परसबिन्दुसमुदायस्तेषु मुदितं हृष्टं मधुकरकुलं तस्य कलरुतेन मुखरितदिगन्ते। चन्द्रिका ज्योत्स्ना तस्याः पानभरेणालसचकोरकामिनीभिरभिनन्दितागमने स्तुत्यागमने। चन्द्रिका कौमुदी ज्योत्स्नेत्यमरः।

सुरतभरपरिश्रमखिन्नाः पुलिन्दराजस्य म्लेच्छजातिविशेषराजस्य सुन्दर्यस्तासां स्वेदकणिकापहारिणि मारुतने

---

१ °दिवेन्दुना E २ कु॰ -मकरन्दसन्दोहमुग्ध A B F H कु॰ -मकरन्दबिन्दुसन्दोहमान्द्रनिष्पन्दास्वादमुदित- C कु॰ -मकरन्दबिन्दुसन्दोहलुब्धमुग्ध G ३ दन्तिनर॰। -न्तरे A B C E F G ४ च॰ ।लसतरलचकोर- D ५ -ताभिगमने C F G ६ सुरतभरखिन्न A B C D F H

न्दराजसुन्दरीस्वेदजलकणिकापहारिणि[1] प्रयाति[2] साय-न्तने तनीयसि निशानिःश्वासनिभे[3] नभस्वति कन्दर्पकेतु-स्तमालिकामकरन्दसहायो वासवदत्ताजनकनगरमयासीत्।

अथ कटकैकदेशविरचिताभ्रंलिहशिखरेण सुधाधवलेनैका-न्तरनिविष्टकनकमुक्तामरकतपद्मरागशकलेन वासवदत्ता-

---

सन्ध्याकालिके। सायंचिरमित्यादिना ट्युः। तनीयसि स्वल्पे-ऽतएव निशानिःश्वासनिभे नभस्वति वायौ प्रयाति सति त-मालिकामकरन्दौ सहायौ यस्य सः। या प्रापणे। ययमरमेति सगिटौ।

अथ वासवदत्ताभवनं ददर्शेत्यन्वयः। कटकैकदेशे राज-धान्येकदेशे विरचितमभ्रंलिहं शिखरं यस्य तेन। वहाभ्रे लिह इति खश्।

कटकं वलये सानौ राजधानीनितम्बयोः।

इति विश्वः। सुधा स्नुही तया धवलेन। एकान्तरं निवि-ष्टानि कनकं सुवर्णं मुक्ता मरकतं गारुत्मतं पद्मराग एषां शकलानि यत्र।

वासवदत्तादर्शनार्थमवस्थितदेवतागणेनेव शालवलयेन प्रा-कारवलयेनानुनीतम्। प्राकारो वरणः शाल इत्यमरः।

---

१ + मनोहारिणि D २ प्रवाति A B C D F G प्रवहति H इति अग॰ च। ३ -सन्निभ C D F G

[१]दर्शनार्थमवस्थितदेवतागणेनेव[२] शालवलयेन [३]परिगतमनिलोल्लासिताभिर्नभस्तलमञ्जरीभिरिव तर्जयन्तीभिरिव गगनार्णवश्रियं[४] पताकाभिरुपशोभमानं कनकशिलापट्टाङ्गणप्रसृताभिः [५]कर्पूरकुङ्कुमचन्दनैलालवङ्गगन्धोदकपरिमलवा[६]हिनीभिर्वाहिनीभिरज्ञाततटस्फाटिकपट्टसुखनिषण्णनिद्राय-

---

अनिलोल्लासिताभिर्नभस्तलमञ्जरीभिर्गगनार्णवश्रियं तर्जयन्तीभिरिव पताकाभिरुपशोभितम्। पताका वैजयन्ती स्यादित्यमरः।

कनकशिलापट्टाङ्गणेषु प्रसृताभिः। जलयन्त्रविशेषैरिति भावः। फोहारा इति चद्दर इति वा भाषायाम्। पाठङ्गणेति परसार इति भाषायां प्रसिद्धः।

कर्पूरकुङ्कुमचन्दनैलालवङ्गानां गन्धो यत्र तादृगुदकं तत्परिमलस्तद्वाहिनीभिर्वाहिनीभिर्नदीभिः। अज्ञातास्तटस्फाटिकपट्टेषु सुखेन निषण्णा अतएव निद्रायमाणाः प्रासादपारावता यासु। निम्नलत्वमज्ञाने निम्नलत्वे च निद्रा तस्यां सुखोपवेशनं हेतुरिति कारणमालालङ्कारः।

---

१ द॰ -थमास्थि- A B C D F २ + चञ्चिचितशालभञ्जिकानिवहेन D ३ प॰ -ल्लासितनभ- A B F G प॰ -स्तरकुसुममञ्ज- B C ४ गगनभूरश्रियं A B C D F G गगनश्रियं H ५ क॰ गन्धोत्कटप- C क॰ -करसपरि- A B C F ६ हि॰ -भिरज्ञातस्फाटिकतटनिकटपट्टसु- A B E F हि॰ -भिस्तटनिकटस्फाटिकपट्टसु- C हि॰ -भिस्तटनिकटस्फाटिकशिलापट्टसु- D

[1]माणप्रासादपारावताभिः [2]प्रभ्रश्यत्तटनिकटविटपिकुसुम-
[3]स्तबकितसलिलाभिरनवरतमज्जदुन्मज्जन्मदयुवतिजनघनज-
[4]घनस्फालनोच्छलच्छीकरनिकरस्नपितवेदिकाभिः कर्पूरपूर-
[5]विरचितपुलिनतटनिविष्टनिनदानुमीयमानराजहंसीभिर्विक-

प्रभ्रश्यद्भिस्तटविटपिकुसुमैस्तीरवृक्षपुष्पैः स्तबकितं सञ्जातस्तबकं सलिलं यासाम्।

अनवरतमज्जदुन्मज्जन्मदयुवतिजनस्य घनजघनास्फालनेनोच्छलच्छीकरनिकरेण स्नपितार्द्रीकृता वेदिका वितर्दिः प्राङ्गणादौ कृतमुपवेशनं स्थानं याभिर्यासां वा ताभिः। स्याद्वितर्दिस्तु वेदिकेत्यमरः।

कर्पूरपूरेण विरचितं यत् पुलिनं तस्य तटे समीपदेशे निविष्टा उपविष्टा निनदैर्वासितैरनुमीयमाना राजहंसी यासु ताभिः। भाक्तोऽत्र पुलिनप्रयोगः। प्रमाणालङ्कारेष्वनुमानालङ्कारः। कर्पूरपुलिनवर्णनेन सम्पत्तेरपरिमेयत्ववर्णनात्। उदात्तालङ्कारोऽप्यत्र। तथाच दण्डी।

---

१ माणाञ्चातप्रा D इति क्वचि° च नर° च। माणश्चेतप्रा G माणाञ्चातमुग्धप्रा- H काणप्रासादश्वेतपा- B C २ प्र° -विटप C F ३ स्त° -मज्जदुव- A B C F H स्त° दुन्मदयुव- D E G स्त°-तिजघन- B D E F G स्त°—-घन A B C D E F G H ४ घनस्थलास्फा- B C घ° -नोच्छुसितम्भो- A B C E F H घ° -नोच्छलितम्भो D G घ° स्थापिततीरवे- A D G ५ वि° -पुलिनतल्पनि- A C D F G वि° -निषण्णनि- A B C D F G H वि° -हंसमिथुनकलकलमुखरिताभिर्वि- D

[१]चनीलोत्पलकाननदर्शिताकाण्डचक्रवाकतिमिरशङ्काभिर्यु-
वतिभिरिव [२]सुपयोधराभिः सुग्रीवयुद्धकलाभिरिव कीलाल-
स्नपितकुम्भकर्णाभिः सागरकूलभूमिभिरिव सुन्दरीपादपरा-
-,

आशयस्य विभूतेर्वा यन्महत्त्वमनुत्तमम्।
उदात्तं नाम तं प्राहुरलङ्कारं मनीषिणः।

इति।

विकचमित्यादि। रक्तोत्पलपाठपक्षे रात्रौ विकासासम्भ-
वात्। नीलोत्पलपाठपक्षे चक्रवाकानामेव तिमिरशङ्कावर्ण-
नानुपयोगादुपेक्ष्यम्।

युवतिभिरिव तरुणीभिरिव। यूनस्तिरिति तिः। सुपयो-
धराभिः शोभनस्तनीभिः। पक्षे धरन्तीति धराः पचाद्यच्।
पयसो जलस्य धरास्ताभिः। तरुणी युवतिः समे। स्त्रीस्त-
नाब्दौ पयोधराविति द्वयोरमरः।

सुग्रीवयुद्धकलाभिरिव कीलालेन रक्तेन स्नपितः कुम्भ-
कर्णो राक्षसो याभिः। पक्षे कीलालेन पयसा स्नपितः कुम्भस्य
कलशस्य कर्णोऽग्रो याभिः। शोणितेऽम्भसि कीलालमिति पक्ष-
द्वयेऽमरः।

सागरस्य कूलभूमिभिरिव तीरभूमिभिरिव सुन्दरीपा-

१ धरन्तो· E च॰ -वाकचक्रति A F च॰ -वाकमिथुनसि· E G २ उन्नत-
चारिपयो· D

शबलाभिर्नवनृपतिचित्तवृत्तिभिरिव [1]कुल्यापमानकारिणी[2]भिरनेकतराभिरुपशोभितं [3]शिखरगतमुक्ताजालव्याजेन पुरयुवतिजनदर्शनकुतूहलागतं तारागणमिवोद्वहद्भिरुपान्त-

---

दपानां रागैः शबलाभिः। पक्षे सुन्दरीणां पादपरागैश्चरणरेणुभिः शबलाभिः।

सुन्दरी तरुभिन्नारीभिदोः स्त्री रुचिरेऽन्यवत्।

नवोऽचिरप्राप्तराज्यपदो नृपतिस्तच्चित्तवृत्तिभिरिव। कुल्यस्य कुले साधोस्तत्र साधुरिति यत्। तस्यापमानकारिणीभिः। पित्रादेरमात्यादयः शिशुत्वादचपलाद्वा नैनमतिमनुत इति तेषामपमानः। पक्षे कुल्यानां कृत्रिमाल्पसरितामपमानकारिणीभिः। कुल्याल्पा कृत्रिमा सरिदित्यमरः। अनेकतराभिर्वल्लीभिरुपशोभितम्।

शिखरगतानां पक्षिप्रवेशवारणार्थमुपरिबद्धानां मुक्ताजालानां मुक्तामयानायानां व्याजेन पुरयुवतिजनस्य कुतूहलं कौतुकं तद्दर्शनार्थमागतं तारागणमिवोद्वहद्भिः। कुतुकं च कुतूहलम्।

जालं समूह आनायो गवाक्षजारकावपि।

इत्युभयत्रामरः।

---

१ बकुल- C H २ रनेकाकाराभिर्नदीभिरुप- A B रनेकाकाराभिरु- G H
३ शि० -मुक्ताफलजा- B

निलीनाभिः काचकलशाक्षतिमुद्वहन्तीभिः शिखिसंहतिभिरुल्लासितैः प्रासादैरुपशोभितं क्वचिदनवरतदह्यमान-[1]कृष्णागुरुधूमपटलैर्दर्शिताकालजलदोदयं[2] [3]क्वचिदति-[4]गम्भीरमुरजरवाहतसानन्दनर्तितनीलकण्ठं सायन्तनसमयमिव पतितलोकलोचनं जनकयज्ञस्थानमिव [5]दारोत्सुक-

---

उपान्ते निलीनाभिर्नितरां लीनाभिर्निश्चलतया स्थिताभिरतएव काचकलशाक्षतिमुद्वहन्तीभिः शिखिसंहतिभिर्मयूरयूथैरुल्लासितैः प्रासादैरुपशोभितम्।

क्वचिदनवरतदह्यमानकालागुरुधूमपटलैर्दर्शितमकाले जलदानां मेघानामुदयो येन यत्र वा। अतएव क्वचिदतिगम्भीरमुरजरवाहताः सानन्दं नर्तिता नीलकण्ठा बर्हिणो यत्र। रात्रौ मयूरनृत्यवर्णनं तिर्यञ्चोऽपि सर्वकालं सुखिनो मनुष्याणां तु का कथेति ध्वनयितुम्। मृदङ्गा मुरजाः। मयूरो बर्हिणो बर्ही नीलकण्ठ इति द्वयोरमरः।

सायन्तनसमयमिव पतितः लोकलोचनः सूर्यो यत्र। किरणमालिविलोचनहेतय इति हारावली। पक्षे पतितानि सौन्दर्यावलोकनार्थं लोकानां लोचनानि यत्र।

---

१ क० -गुरुधूपप- A B D F H क० -गुरुधूपधूमप- C E G २ -दोदयं D ३ क्वचिद्गम्भीर- A B C D E F H ४ क० -रवाहतमन्दमन्दनर्तितमानन्दनो- A B C G क० -रवाहूतिरम्यो D क० -रवाहतमानन्दमदमनर्तितमो- E क० -वाहतमानन्दनो- F H ५ इति नास्ति च। दारोत्सुकित- A B C D F G H इति मट० च।

रामं [१]मानुष्यकमिवाभिनन्दितसुरतं[२] निधानमिव कौतुकस्य वासमिव शृङ्गारस्य [३]कुलगृहमिव [४]विभ्रमस्य सङ्केतस्थान-

---

जनस्थानमिव दारेषु सीतायामुत्सुको रामो राघवो यत्र। पक्षे दारयतीति दारः कन्दर्पस्तेनोत्सुका रामाः स्त्रियो यत्र। सुन्दरी रमणी रामेत्यमरः।

मानुष्यकमिव मनुष्यसमूह इवाभिनन्दिता श्लाघाविषयीकृता सुरता देवत्वं येन। पक्षेऽभिनन्दितं सुरतं मैथुनं यत्र।

कौतुकस्य निधानगृहं भाण्डागारमिव शृङ्गारस्य वासगृहमिव।

पुंसः स्त्रियां स्त्रियाः पुंसि सम्भोगं प्रति या स्पृहा।
स शृङ्गार इति ख्यातः क्रीडादि रसकारणम्॥

इत्युक्तमन्यत्र।

विभ्रमस्य विलासस्य कुलगृहमुत्पत्तिस्थानम्।

कामोत्सुकत्वताकारं रूपयौवनसम्पदा।
अनवस्थितचेष्टत्वं विभ्रमः परिकीर्तितः॥

इति भरतः।

भवनन्दनस्य कार्तिकेयस्येव प्रभावो यस्य सः

---

१ मानुषमिवा- A B C E Γ G H २ + कान्तारमिवानेकशालोपशोभितं D
३ कुतूहलगृ- D ४ विद्यामस्य G

मिव सौन्दर्यस्य वासवदत्ताभवनं भवनन्दनप्रभावो ददर्श।

द्रवसि द्रवसिद्धितो निगलिते[१] चपला चपलायते किमेषा

इत्यन्योन्यप्रणयेन पेशला रम्याः प्रमदानामालापकथाः शृण्वन् कन्दर्पकेतुर्मकरन्देन समं विस्मयमाश्चर्यमकरोत्।

द्रवसिद्धितो नर्ममिद्धितः सार्वविभक्तिकस्तसिः। निगलिते ऽलयोरैक्यान्निगडिते द्रवसि द्रुतगतौ। बद्धस्य गमनप्रयास उपहासाय अफलत्वादिति कश्चिदुपहसति। यद्वा मया प्रेम्णा बद्धासि त्वं मां परित्यज्य यासीत्युपालम्भः। द्रवो विद्रवनर्मणोः। आसवे सरगत्योश्चेति हैमः। यद्वा निगलिते एतदभिधाने द्रवसिद्धितो द्रावकौषधिविशेषाद्द्रवसि।

यद्यप्यष्टगुणः स्मरो निगदितः पुंसोऽङ्गनानां सदा
नो याति द्रवतां तथापि झटिति व्यायामिता सङ्गमे।
तत् स्याद्बीजसम्प्रयोगविधिना सङ्गेपतो द्रावणम्।

इति रन्तिदेवः। यथोक्तं द्रवसीति तां लघोक्तव्यान्यां प्रत्याह।

एषा पुरोवर्तिनी चपला चपलाभिधाना किं चपलेव विद्युदिवाचरति। नास्त्येव गतार्थत्वादिति भावः। यद्वैषा चपला चञ्चला। किञ्चान्यच्च पलायते। इण् गतौ उपसर्गस्यायताविति लत्वं परारेफस्य। यद्वा चपलेव पिप्पलीवाचरति। इयमेवौषधिः। सर्वथा द्रवतीति भावः।

---

१ निगदिते A C D F

स्तवकस्तव कर्णतः पतिताऽयं सुरखे सुरया [1]चिता सुरया-[2]चितश्रीस्त्वमसि मत्ता कलहे कलहेमकाञ्चिदामक्वणितैः स्मरमिवाह्वयसि मलये मलयेप्सितं[3] दृशैवाधिगतासि कलिके

चपला कमलाविद्युत्पुंश्चलीपिप्पलीषु च।
इति विश्वप्रकाश इति दिक्।

हे सुरेखे तव कर्णतः स्तवकः पुष्पगुच्छोऽयं पतितः। त्वं न जानासि। मत्तासीत्युपहासः। स्याद्गुच्छकस्तु स्तवक इत्यमरः। एनामेवोपहसति सुरैर्देवैर्याचिता। अर्थाद्ब्रह्मणा उचिता योग्या श्रीः सौन्दर्यश्रीर्यस्यास्तादृशी त्वम्। सुरया मदिरया चिता व्याप्ता तादृशी सती मत्तासि।

हे कलहे कलैर्हेमकाञ्चीदामक्वणितैः स्मरमाह्वयसीवाकारयसीव। पत्यतिरिक्तपुरुषाह्वानेऽप्रेचणमुपहासाय[1]। एनामुपहसति। मलये तन्नामिके। मे शिवे लयो नाशो यस्य मलयः। कामस्तदीप्सितं इष्टं दृशैव दृष्ट्यैवाधिगतासि त्वं पुरुषं कटाक्षैराक्मयसीति भावः। अभीष्टेऽभीप्सितं ह्द्यमित्यमरः। यद्वा मः शिवो लयो गृहं यस्य मलयश्चन्द्रस्तस्येप्सितं हरिणस्तं दृशैवाधिगतासि। मृगलोचनासीति भावः। मः शिवश्चन्द्रमा वेधा इत्यनेकार्थध्वनिमञ्जरी।

१—चिता A B D F H २ चमेधि- A B D F H चिता श्री A B C D E F G H ३ -सितं C

कलिकेतुमिमां मुखरां [1]मुञ्च मेखलां शृणुमः कलवल्गकीकृतं मेखला मे खला न भवति त्वमेव मुखरतया मुखरतया च चपतेऽत्र पतेदियमवन्तिसेना कुसुमोपहारे[2] मुग्धा तव कैतवकैरलं लवङ्गिके[3] वेपथुरेवाशयं व्यनक्ति वहतीव चलीरनङ्ग-

---

कलिके कले रतिकलहस्य केतुं ध्वजम्। यथा केतुना सेनादि द्योत्यते। एवमनया रतिकलहो द्योत्यत इति भावः। मुखरां वाचालां मेखलां काञ्चीं मुञ्च। त्यागे फलमाह। कलमव्यक्तमधुरं च तद्वल्गकीकृतं तत् शृणुमः।

कलिः स्यात् कलहे सूरे कलिरन्त्ययुगे युधि।

इति विश्वप्रकाशः।

उत्तरयति। मे मम मेखला काञ्ची खला पिशुना न भवति। मुखेन प्रेष्ठेन रतं यातीति मुखरतयाः। यद्वा मुखेन वात्स्यायनाद्युक्तोपायेन रतं यातीति मुखरतयाः त्वमेव मुखरतया वाचालतया खला।

मुखमुपाये प्रारम्भे प्रेष्ठे निस्सरणास्ययोः।

इति हैमः। पिशुनो दुर्जनः खल इत्यमरः।

काचिदाह। मुग्धेयमवन्तिसेना चपते लज्जतेऽत्र कुसुमोपहारे। पतेत्। सम्भावनायां लिङ्।

तां प्रत्याह। लवङ्गिके कैतवैरलं कैतवमाध्यं नास्तीत्यर्थः।

---

१ ध्वज D इति भर० च। २ -रेषु A C D इति जग० च। ३ कलिङ्गिके A B C D F H इति जग० च भर० च।

लेखे स्मरसायकानां तव वपुरलसं पिहितापि हिताय त
उत्कलिकामहोर्मिर्वदने वद नेत्रपेयकान्तौ किमुपमानमि-

वेपथुरेव कम्प एव तवाशयं व्यनक्ति। सात्त्विकाविर्भावात् त्वमेव कम्पसे मां किं वृथा वदसीति भावः।

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।

वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः।

अनङ्गलेखे तव वपुः कर्तृ स्मरसायकानां हतीर्हननानि। हन हिंसागत्योः क्तिन्। वहतीव यतोऽलसम्।

उत्तरमाह। तेऽप्युत्कलिकामहोर्मिः पिहिता छन्ना हिताय। विरहव्यानाविष्कारादर्थात् ते हिताय कल्याणाय। यद्वोत्कलिकामहोर्मिः पिहितापि हितवदाचरति हितायते। यद्वोत्कलिकामहोर्मिः पिहितापि हि निश्चयेन तायते लोकोपहासात् त्वां पालयतीत्यर्थः। तायृ सन्तानपालनयोः। सन्तानः प्रबन्धः। यद्वा पिहिताप्युत्कलिकामहोर्मिः कर्मकर्तृ तायते स्वयमेव विस्तृता भवति। हिः प्रसिद्धौ। तनु विस्तारे। तनोतेर्यकीति विभाषात्वम्। यद्वोत्कलिकामहोर्मिः पिहितापि हिता वृद्धा। हि गतौ वृद्धौ च। अयते लोके गच्छति प्रकटा भवति। हि नेत्रैः पेया कान्तिरस्य तस्मिन् वदने मुखे किमिन्दुरुपमानमपि यातीति वद। पूर्वं त्वन्मुखमुपमानमिदानीमिन्दुरुपमानमपि यातीति सम्भावनम्। मुखे विरहातिशयात् पाण्डुत्वाधिक्यद्योतनाय।

चटुलम्पटं सखीजनमायासयसि मुरलिके[१] स्तनता स्तनताड-
नेषु यत् सौख्यं तल्लब्धं[२] स्मरता स्मरतापनोदनं[३] दयितेन दयि-
तेन विमुक्तासि[४] किं मुह्यसि मदतो मदतो दयितो[५] दयितः

वेति किं कल्पयसि सर्वं स्पष्टतयैव ज्ञायत इति त्वदर्थमेवेत्यु-पहासः।

हे मुरलिके चणं कालाध्वनोरत्यन्तसंयोगे द्वितीया। ईचणमीलनाद्दृष्टिमीलनाच्चटुलं चञ्चलं कार्येऽनलसम्। चटुल-म्पटमपि प्रियवाक्यासक्तमपि सखीजनमायासयसि। त्वमपि विरहवेदनया मूर्छिताऽस्मान् वेदयसीति भावः।

दयितेनाभीष्टेन स्तनता भणितं कुर्वता सङ्केतार्थं पद्ध्या-दिशब्दं कुर्वता वा स्तनमण्डलेषु सुरते चन्द्रकलानुरोधप्रा-प्तेषु। यत् स्मरतापनोदनं स्मरतापनाशकं सौख्यं लब्धं तत् स्मरतापि दयितेन पत्या विमुक्तासि। दयितः स्वामिकान्त-योरिति धरणिः। एतादृशेनैतादृशेन मुक्ताऽसीति को वेद तवापराधमिति ध्वनिः। अतएव वदति किं मुह्यसि युक्त-मेव कृतं पत्येत्यभिप्रायः। यद्वा समाश्वासयति किं मुह्यसि स त्वद्गुणासक्तस्त्वां न त्यक्ष्यति।

पूर्वं वर्णितमपि गुणं तत्प्रत्ययार्थं पुनर्वर्णयति। मदतो

---

१ मुरले A C F २ लब्ध D E G ३ तद- C E F G ४ वियुक्ता D इति स्मर॰ च। ५ — दयितो B D G

स्मरति स्म रतिप्रियं तव कौशलं नवनिशानखराणां नखराणां
व्रणाः स्मरजन्यां स्म रजन्यां कुरुते न कुरुते रुजं[1] किं ते
लोचनाभ्यां लोचनाभ्यां प्रोषिताखिलजनेक्षणादेशः क्षणादेशः

महीयसो महतस्तद्रतिरूपान् महोत्सवाद्धतमोहतमः। रतो
यया कथाचिद्रतविधानरूपो मोहो यस्य सः। ततोऽतिशये
तमप्। दयितः कान्तो दयितः पतिः। रतौ सुरते प्रियं
तव कौशलं स्मरति स्म स्मृतवान्। लट् स्म इति भूते
लट्।

। हे कुरुते नवं निशानं तेजनं तेन खराणां नखराणां
नखानां व्रणः क्षतं स्मरस्य जनी वधू रतिस्तस्यां रतौ स्मरं
जनयतीति कर्मण्यण्। जनिवध्योश्चेति वृद्धिनिषेधः। ङीप्
तस्यां कामोद्दीपिकायां वा रजन्यां रात्रौ रुजं पीडां किं ते
न कुरुते स्म। पूर्ववल्लट्। शान तेजने। यद्वा स्मरेण जन्या
कामेनोत्पादिता तां रुजं चन्द्रकलानुरोधेन नखक्षतादयो
नारीणां काममुद्दीपयन्तीति स्पष्टं कामतन्त्रे। भव्यगेयेति
साधुः।

जन्या मातृवयस्यायां जन्यः स्याज्जनके पुमान्।
त्रिषूत्पाद्यजनित्रोश्च।

इति विश्वमेदिन्यौ। स्त्री रुग् रुजा चोपताप इत्यमरः।

---

१ रुजां D इति अग० च।

किं[1] न पीयते प्रियसखि मदनमालिनि[2] बिम्बाधरसङ्गत्या सङ्गत्यागच्छया[3] विरागं[4] कुरु मधुमदारुणमालवीकपोलतलसमानो लसमानो रक्तमण्डलतया लतया त्वया विशेषः कः कुर-

---

कापि मानिनीं प्रति छलेन वक्ति। हे मदनमालिनि लोचनाभ्यां प्रीणितोऽखिलजनानामीचण्डेशो नेत्रदेशो येन सः। चण्डेशश्चन्द्रः किं न पीयते। विध्यलङ्कारः।

विद्रस्यैव विधानं यत् तामाऊर्विध्यलङ्क्रियाम्।

लोचनयोर्लोचनविधानं चन्द्रदर्शनेन साफल्यद्योतनाय। चन्द्रदर्शनादत्यद्भुतरागेयं स्वयमेव प्रियमनुनेष्यतीति भावः। यद्वा लोचनाभ्यां नेत्राभ्यां प्रीणिताखिलजनेचण्डेशः। चण्डः सुखदस्याभावोऽस्य स पतिः लोचनाभ्यां किं न पीयते रक्तमण्डलतया लसमानोऽतएव मधुमदारुणमालवीकपोलतलसमानः। पक्षे रक्तमण्डलतयानुरक्तमण्डलतया लसमानः शोभमानो मालवीकपोलतलसमानता रक्तमण्डलतया। बिम्ब एव बिम्बवदाधरस्तत्सङ्गत्या लतया त्वया को विशेषो न कोऽपीत्यर्थः। अतः सङ्गत्यागेच्छया विरागं कुरु। यथा चण्डेशस्यापधीशलेनाविरोधो लतयैवं नैकविधवाजीकरणाद्यपधीशलेन चण्डेशेन तवाप्यविरोध उचित इति भावः।

कुरङ्गिक इत्यादीनि सखिसम्बोधनानि। कुरङ्गशावकेभ्यो

---

१ बत्ते II २ मदनमालिनि B II इति जव० च मद० च। ३ गे स्वापि C F G II ४ विरागं A B C D F H

ङ्गिके कल्पय कुरङ्गशावकेभ्यः शष्पाङ्कुरं किशोरिके कारय किशोरकेभ्यः प्रत्यवेक्षां तरलिके तरलय [१]कृष्णागुरुधूपपटलं कर्पूरिके पाण्डुरय कर्पूरधूलिभिः पयोधरभारं मातङ्गिके मानय मातङ्गशिशुयाचनां शशिलेखे लिख ललाटपट्टे शशिलेखां केतकिके सङ्केतय [२]केतकीमण्डपस्य दोहदं शकु-

---

हरिणशिशुभ्यः शष्पं बालतृणं कोमलं तदङ्कुरं कल्पयोत्पादय देहि। मृगे कुरङ्गवातायु। पृथुकः शावकः शिशुः। शष्पं बालतृणं घासः। अङ्कुरोऽभिनवोद्भिदि। इति चतुर्व्वमरः।

किशोरकस्याश्वबालकस्य प्रत्यवेक्षामवेक्षणम्। बालः किशोर इत्यमरोऽश्वप्रकरणे। अवेक्षा प्रतिजागर इति च। तरलय विस्तारय।

काप्यतिविरहाकुलाह। कर्पूरिके कर्पूरधूलिभिः पयोधरभारं पाण्डुरय।

अन्याह। मातङ्गिके मातङ्गशिशुयाचनां मानयाङ्गीकुरु। पुनः पुनः करचालनेन कुचौन्नत्यं कुम्भयोः प्रार्थयत इति भावः।

शशिलेखे ललाटपट्टे शशिलेखां लिख। स्मरविभीषिकार्थमिति भावः।

केतकिके केतकीमण्डपस्य दोहदं सङ्केतय जानीहि।

---

१ कृष्णागुरुसान्द्रधू B C H कृष्णागुरुसान्द्रधूमप D २ केतकीखण्डम C

निके देहि क्रीडाशकुनिभ्य आहारं[१] मदनमञ्जरि मञ्जरय [२]सभामण्डपकदलीगृहे शृङ्गारमञ्जरि सङ्कल्पय शृङ्गाररचनानि[३] सञ्जीविके[४] [५]वितर [६]जीवञ्जीवकमिथुनाय [७]मरिचपल्लवं पल्लविके पल्लवय[८] कर्पूरधूलिभिः [९]कृत्रिमकेतकीकाननं सहकारमञ्जरि सञ्जनय सहकारसौरभं व्यजनवातेन मदनलेखे लिख मदनलेखं मलयानिलस्य

कस्यचिद्दद वा। दोहदो गर्भलक्षणे। अभिलाषे तथा गर्भ इति हैमः।

शकुनिके क्रीडाशकुनिभ्य आहारं देहि। घसोरेद्धावित्येत्वाभ्यासलोपौ।

मदनमञ्जरीत्यादि। शृङ्गारमञ्जरि शृङ्गाररचनानि सङ्कल्पयोत्पादय।

सञ्जीविके जीवञ्जीवकाय मरिचपल्लवं वितर देहि। जीवञ्जीवश्चकोरकः। मरिचं कोलकं कृष्णमित्यमरो द्वयोः।

पल्लविके कृत्रिमकेतकीकाननं कर्पूरधूलिभिः पल्लवय।

सहकारमञ्जरीति। मदनलेखे मलयानिलस्य मदनलेखं मदनावस्थासूचकं लेखं लिख।

---

१ -निकेभ्याहार A B F -निकाविकेभ्याहार C G २ सभाम D ३ -रचनां D E G ४ सञ्जीविनि C सञ्जीवनिके D H ५ सञ्जीवय A B C F G H ६ जीवञ्जीवमि A B G H ७ मरीच- C D F G H - मरीचि- इति मद०। ८ + कुङ्कुमपङ्क० कर्पूरिके पूरय C ९ क्र० -केतका- C D F

मृणालिके देहि मृणालाङ्कुरं [1]राजहंसशावकेभ्यो[2] विलासवति विलासय मयूरकिशोरं तमालिके परिमलय मलयजरसेन भवनवाटं काञ्चनिके[3] विकिर कस्तूरीद्रवं[4] काञ्चनमण्डपिकायां[5] प्रवालिके सेचय घुसृणरसेन बालप्रवालकाननमित्यन्योन्यं प्रणयपेशलाः प्रमदानामालापकथाः शृण्वन् कन्दर्पकेतुर्मकरन्देन[6] सह[7] विस्मयमकरोत्।

मनस्यहो [8]भवनानामतिशायि सौन्दर्यमहो शृङ्गारकलाकेलिकौशलं तथाह्यं[9] [10]तत्काललीलावहलविरलविमल-

---

मृणालिक इति। विलासवति मयूरकिशोरं विशेषेण लासय नर्तय। किशोरस्तरुणे श्रेष्ठ इति धरणिः।

तमालिके मलयजरसेन चन्दनरसेन भवनवाटं गृहमार्गं परिमलय। वाटः पथश्च मार्गश्चेति त्रिकाण्डशेषः।

काञ्चनिके काञ्चनमण्डपिकायां कस्तूरीद्रवं विकिर विक्षिप। कॄ विक्षेपे।

प्रवालिके घुसृणरसेन कुङ्कुमरसेन प्रवालानां नवपल्लवकेशानां काननं समूहं सेचय।

---

१ मानसहंस D २ -हंसेभ्यो A B -हंसशावकेभ्यो C ३ काञ्चनमालिके A B ४ कस्तूरिकाद्रव F G कस्तूरिकाद्रवरसं H ५ -पिकायां D ६ + तमालिकया च सह तद्वनं प्रविश्य वि- D ७ + तद्वनं प्रविशन् A ८ भुवनानि A C G H भवनानि B ९ + च D १० तत्कालसुरतली- D तत्कालकेलिली- E G H इति नर० च। स० -लीलाविद्दलितवि- D

[1]मालवीदर्शनकान्तिकान्तिदन्तिदन्तघटितो मण्डपोऽसावपि [2]कनकशलाकाविनिर्मितयन्त्रपञ्जरसंयतः[2] क्रीडाशुक इत्यादि परिचिन्तयन् प्रविश्य व्याकरणेनेव सरक्तपादेन भारतेनेव सुपर्वणा रामायणेनेव सुन्दरकाण्डचारुणा

कुङ्कुमं पीतकावेर ध्रुवणं कुसुमान्तकम्।
इति हारावली।

प्रविश्य वासवदत्तां दद्‌र्शेत्यन्वयः।

व्याकरणेनेव पाणिनिप्रोक्ताष्टाध्यायीरूपेणेव तेन रक्तं रागादित्युपलक्षितः पादोऽध्यायतुरीयांशस्तत्सहितेन। पक्षे रक्तपादेन लोहितचरणेन सह सरक्तपादं तेन।

भारतेनेव सुपर्वणा शोभनपरिच्छेदयुतेन। पक्षे सुपर्वणा शोभनग्रन्थियुतेन। ग्रन्थिर्ना पर्वपरुषी इत्यमरः।

रामायणेनेव सुन्दरकाण्डेन चारुणा। पक्षे सुन्दरकाण्डवचारुणा।

काण्डं चाधमरे बाणे नाले स्कन्धे च शाखिनाम्।
स्तम्बे रहसि गर्वे चेति धरणिः।

जङ्घायुगलेन विराजमानां विन्ध्यगिरिश्रियमिव सुनितम्बां

---

१ मा० -कान्त- A B C D F G इति नर० च। मा० -कान्तिकामकुसु- दर्गाकाष्ठ C २ कर्ण्दल- C D F क० -कामि E क० कामिनिर्मय C क० निर्मितपञ्जर- D ३ इति अश० च -भ्रमर A B E G + मधुपाक D

जङ्घायुगलेन विराजमानां छन्दोविचितिमिव भ्राजमानतनु-मध्यां नक्षत्रविद्यामिव[1] गणनीयहस्तश्रवणां न्यायस्थितिमि-वोद्योतकरस्वरूपां[2] बौद्धसङ्गतिमिवालङ्कारभूषितामुपनिष-

सुन्दरकटकाम्। कटकोऽस्त्री नितम्बोऽद्रेरित्यमरः। पक्षे शोभनकटिपश्चाद्भागां पश्चान्नितम्बः स्त्रीकट्या इत्यमरः।

छन्दोविचितिमिव भ्राजमाणतनुमध्याम्। तनुमध्याभिधं छन्दः। त्यौ स्तस्तनुमध्या। पक्षे भ्राजमानं तनुमध्यं यस्याः।

नक्षत्रविद्या ज्योतिःशास्त्रमिव गणनीयं हस्तो हस्तर्क्षं श्रवणं श्रवणर्क्षं च यत्र। पक्षे गणनीयमत्युत्कृष्टतया हस्तश्रवणं यस्याः।

न्यायस्थितिमिवोद्योतकर आचार्यो न्यायवार्तिककृत् तत्स्वरूपां तदात्मिकाम्। विद्यातद्वतोरभेदविवक्षाच त्रिमुनि व्याकरणमितिवत्। भेदविवक्षायां तु। उद्योतकरेण स्वरूपं यस्याः। उक्तानुक्तदुरुक्तचिन्ताकृता वार्तिककृता स्वरूपं यथा प्रतिपादितरूपम्। न तु खण्डित भ्रष्टमित्यर्थः। पक्ष उद्योतकर प्रकाशकरं स्वरूपं यस्याः। प्रकाशो द्योत आतप इत्यमरः।

बौद्धसङ्गतिमिवालङ्कारो धर्मकीर्तिकृतो ग्रन्थविशेषस्तेन भूषिताम्। पक्षेऽलङ्कारो भूषणं तेन भूषिताम्।

उपनिषदमिवैकमानन्दमद्वितीयं ब्रह्मानन्दमुद्योतयन्तीम्। तदुक्तम्। ....

१ सरूपां B G -सुरूपां F २ बौद्धस्य स- C बौ॰ -संङ्गति A B बौ॰ ारशो-भिताम् A B, F बौ॰ -ारशोभनाम् C G बौ॰ -ारप्रसाधिकाम्- D बौ॰ -ारभूरिभूषिताम् E

[१]दमिवानन्दात्मकमुद्योतयन्तीं द्विजकुलस्थितिमिव चारुच-रणां विन्ध्यगिरिश्रियमिव सुनितम्बां तारामिव गुरुकलत्र-तयोपशोभिताम्[२] शतकोटिमिव[३] मुष्टिग्राह्यतनुमध्याम्[४] प्रियङ्गु-श्यामासखीमिव प्रियदर्शनां ब्रह्मदत्तमहिषीमिव सोमप्रभां

आनन्दो ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितम्।

इति। पक्षे एकमुत्कृष्टमानन्दमाह्लादम्।

द्विजकुलस्थितिमिव चारु सुन्दरं चरणमाचारो यस्या-स्ताम्। पक्षे चारु रम्यं चरणं यस्याः।

चरणोऽस्त्री बह्वृचादौ मूले गोत्रे पदेऽपि च।

तारामिव बृहस्पतिभार्यामिव गुरुकलत्रतयोपशोभिताम्। पक्षे बृहच्छ्रोणितयोपशोभिताम्। कलत्रं श्रोणिभार्ययोरित्य-मरः।

शतकोटियष्टिमिव वज्रयष्टिमिव मुष्टिग्राह्यो मध्यो मध्य-देशो यस्याः। पक्षे मध्यमवलग्नं यस्याः। मध्यमं चावलग्नं च मध्योऽस्त्रीत्यमरः।

प्रियङ्गुश्यामासखीमिव प्रियदर्शनां तन्नामिकाम्। पक्षे प्रियं दर्शनं यस्यास्ताम्।

---

१ द॰ -न्दमेक- E H इति जम॰ च। २ इति जम॰ च मर॰ च। गुरुकल-त्रापशोभिता A B C D E F G H ३ -टिमुष्टिमिव A ४ इति जम॰ च मर॰ च। -ध्यमध्यां D E

दिग्गजकरेणुकामिवानुपमां वेलामिव तमालपत्रप्रसाधिता-मश्वतरकन्यामिव मदालसां वासवदत्तां ददर्श।

अथ तां [१]प्रीतिविस्फारितेन चक्षुषा पिबतः कन्दर्पकेतोर्ज-हार चेतनां मूर्च्छावेगः। तमपि पश्यन्ती वासवदत्ता मुमूर्च्छ। अथ [२]मकरन्दसखीजनप्रयत्नलब्धसञ्ज्ञौ[३] तावेकासनमल-ञ्चक्रतुः।

ब्रह्मदत्तमहिषीमिव सोमप्रभां तदभिधानाम्। पक्षे सोम-स्येव चन्द्रस्येव सोमा रम्या वा प्रभा यस्यास्ताम्। सोमो मनो-हरे चन्द्र इति विश्वः।

दिग्गजः कुमुदस्तत्करेणुकामिवानुपमां तदाख्याम्।

करिण्योऽभ्रमुः कपिला पिङ्गलाऽनुपमा क्रमात्।

इत्यमरः। पक्षेऽनुपमामुपमारहिताम्।

वेलामिव समुद्रतीरभूमिमिव तमालपत्रैः प्रसाधितामल-ङ्कृताम्। पक्षे तमालपत्र तिलकं तेन प्रसाधिताम्। तमाल-पत्र तिलकचित्रकाणीत्यमरः।

अश्वतरकन्यामिव मदालसां तन्नामधेयाम्। पक्षे मदेन यौवनजन्येनालसां मन्दगतिम्।

अथेति स्पष्टम्। मकरन्देन तत्कृतोपचारेण सखीजनेन तत्कृतोपचारेण यथाक्रम लब्धसञ्ज्ञौ तौ वासवदत्ताकन्दर्प-केतू एकमभिन्नमासनमलञ्चक्रतुः।

---

१ प्रीतिस्फा- C F २ म० -जनलब्ध B E ३ + विदितगन्धर्वविवाहौ C

[१]ततो वासवदत्तायाः[२] प्राणेभ्योऽपि गरीयसी[३] सर्वविस्रम्भपात्रं कलावती नाम कन्दर्पकेतुमुवाच। [४]आर्यपुत्र नायं [५]विस्रम्भकथाया[६] अवसरस्ततो[७] लघुतरमेवाभिधीयसे[८]। त्वत्कृते यानया वेदनानुभूता सा यदि नभः पत्रायते सागरो

तत इति। विस्रम्भपात्रं विश्वासस्थानम्। आर्यपुत्रेति।

आर्यपुत्रेति सम्बोध्यः पतिः पत्नीजनेन वा।

इति भरतः। त्वत्कृते त्वदर्थमनया वासवदत्तया या या वेदना अनुभूता सा सा यदि नभ आकाशः पत्रवदाचरति। उपमानादाचार इति क्यङ्। पत्रायते। अतिवैपुल्यार्थमिदमुक्तम्। सागरो मेलानन्दायते मसीपात्रायते। गाम्भीर्यार्थं चेदम्। मेलानन्दो मसीपात्रमिति हारावली। लिपिकरो लेखकः। दिवाविभेति टः। ब्रह्मायते चिरजीवितार्थमिदम्। कथको वक्ता भुजङ्गराजायते भुजङ्गश्रेष्ठशेषायते। योगशास्त्रप्रणेतृत्वेनान्तरभावाभिज्ञत्वार्थम्। शब्दशास्त्रार्णवपारावारीणत्वेन बहुमुखत्वेन बहुधाभिप्रायाविष्कारकर्तृत्वार्थम्। वैद्यकशास्त्राचार्यत्वेन विरहवेदनयास्या इयमवस्था न ज्वरादिजन्येति वक्तृतार्थं चेदम्। तथा चोक्तम्।

---

१ अथान्तरे A B २ + सखी H ३ + सखी D ४ आर्य राजपुत्र A B
५ समयो विस्रम्भकथानां ततो D ६ -कथानां L H ७ -रोऽस्ति L I ८ -यसे L I

मेनानन्दायते ब्रह्मायते लिपिकरो भुजगराजायते[1] [2]कथक-स्तदा किमपि[3] कथमप्यनेकैर्युगसहस्रैरभिलिख्यते[4] कथ्यते वा। त्वयापि[5] राज्यमुज्झितं[6] किं बहुना। आत्मा[7] सङ्कट[8]समारोपित[9]एव। एषास्मत्स्वामिदुहिता पित्रा[10]प्रभातप्रा-

---

योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य तु वैद्यकेन।
योऽपाकरोत् तं प्रवरं मुनीनां
पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥

इति। तदा कथमप्यनेकैर्युगसहस्रैः कथ्यतेऽभिलिख्यते वा। सम्भावनालङ्कारः।

सम्भावनं यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये।

इति लक्षणात्।

त्वयेत्यादि। पाणिग्रहणं विवाहः। अनया वासवदत्तया-लोचितं चिन्तितं यद्यभ्यर्हितं लक्षणं जनं कृतवहे वक्षो ग्रयितव्यं प्रवेष्टव्यं महान् भागो भाग्यं यस्य तत्सम्बोधनम्। भागो भाग्यैकदेशयोरिति विश्वः। साम्प्रतं युक्तं प्रमाणमुत्त-रकर्तव्यतायामित्यर्थः।

---

१ इति अग० च। भुजगपतिर्वा A B C F G भुजगपतिर्वा आयते D नाग-राजायमे इति मर०। २ श्रक A B ३ यदि A E ४ -रपि लिख्यते A B -रैरभिलख्यते D ५ + सहर्षं D ६ राज्यमुज्झितम् C G ७ + च D + चापि E ८ समर्पितम् H ९ — एव D H १० प्रभातायां D H इति अग० च।

यायां रजन्यां [१]यौवनातिक्रान्तिदोषशङ्किना हठेन[२] विद्याधरचक्रवर्तिनो विजयकेतोः पुत्राय पुष्पकेतवे पाणिग्रहणेन दातव्येति[३]। अनयाप्यालोचितमद्य यदि तं[४] जनमादाय तमालिका नागच्छति तदावश्यमेव मया कृतवह्नौ[५] शयितव्यमिति। तदस्याः[६] सुकृतवशेन महाभागेमां[७] [८]भूमिमनुप्राप्तः। तदत्र यत् साम्प्रतं तत्र भवानेव[९] प्रमाणमित्युक्त्वा विरराम।

अथ कन्दर्पकेतुर्भीतभीत [१०]इव [११]सप्रश्रयमानन्दसागरलहरीभिराप्लुत इव भुवनत्रयराज्याभिषिक्त[१२] इव वासव-

---

अथ सखीवाक्यश्रवणोत्तरमानन्दसागरलहरीभिराप्लुतः कन्दर्पकेतुर्भीतभीत इवाननुभूतपुरुषसङ्गेयं सा कदाचिदुद्विग्नाभूत् तथा सति रसभेदः स्यादिति सभय इवेत्यर्थः। सप्रश्रयं सविश्वासं वासवदत्तया सम्भाष्य सख्याः कामचारानुज्ञां विधाय तया सह रतिं कृत्वेत्यर्थः। सम्पूर्वो मन्त्रिः कामचारानुज्ञार्थकः।

---

१ यौ॰ -क्रमदो- D H २ — हठेन E H ३ दातव्या B E F H + निदिसा D ४ + स्मरह D ५ कृतवह्नमुखे H ६ इदानीं तस्याः E H ७ -भागतया भवानन्- A B C F G -भाग इमां इति जग॰। ८ भूमिमवतीर्ण H इति जय॰ च। ९ समेव D १० — इव A B C E G H ११ सप्रणयम- A B C D F G H स॰ -न्द्यापतगा- A B C D F G १२ -मिषिक्तपोत D

दत्तया सह सम्मन्त्र्य मकरन्दं वार्तान्वेषणाय तत्रैव नगरे नियुज्य[1] भुजङ्गेनेव[2] सदागत्यभिमुखेन[3] मनोजवनाम्ना तुरगेण तया सह नगरान्निर्जगाम[4]।

क्रमेण च[5] [6]जाङ्गलकवलनाभिलाषमिलितनिःशङ्ककङ्कक-

वार्तान्वेषणाय मकरन्दं तत्रैव नगरे नियुज्य भुजङ्गेनेव सदागतिर्वायुस्तदभिमुखेन। पक्षे सदा सर्वदा गत्यभिमुखेन मनोजवनाम्ना तुरगेण तया वासवदत्तया सह नगरान्निर्जगाम। दुर्गगमनादौ स्त्रीणामनधिकारात्। अत्र सहयुक्तेऽप्रधान इत्यप्रधाने तृतीया।

क्रमेण श्मशानवाटेन निमेषमात्रादनेकशतयोजनं गत्वा विन्ध्याटवीं विवेशेत्यन्वयः। जाङ्गलकवलनाभिलाषेण मांसग्रासाभिलाषेण मिलितं निःशङ्कं कङ्कानां पक्षिविशेषाणां कुलं तेन सङ्कुलेन।

जाङ्गलं जलदेशे स्याज्जाङ्गलं पिशितेऽपि च।

इति विश्वः।

---

१ नियोज्य C F G २ भुजगेनेव C D E F G H ३ + महोदधिपुलिनेनेव प्रान्तिप्राभितेन विन्ध्यविपिनेनेव श्रीष्टचलाञ्चितेन वरुणदृष्टेनेव मानभङ्गतिनारण्येनेव गण्डकशोभितेन मत्तैरावतेन्द्रायुधेन D ४ निरगात् A B C F H इति नग० च। ५ + ततो D ६ नरज D जङ्गल इति अग०। नवजङ्गल- इति नग०। जा० -कङ्कपङ्क- A B C G H

लसङ्कुलेनार्द्धदग्धचिताचक्रसिमसिमायमानविकटकटतृष्णा-चटुलकटपूतनोत्तालवेतालरवभीषणेन शूलशिखरारोपित-[1]शङ्कितवर्णकर्णनासिकच्छेदरुधिरपटलपतितभाङ्कारिभम्भरा-[2]लोभारभरितभूमिभागबीभत्सेन [3]कटाग्निदह्यमानापटुचट-

---

अर्धदग्धचिताचक्रे सिमसिमायमान एतादृक् शब्दविशिष्टो विकटो भयानकं कटो मृतशरीरं तत्तृष्णाचटुलकटपूतनानामुत्तालवेतालानां रवेण भीषणेन।

कटः समयबन्धेऽपि व्रणेऽपि मृतकेऽपि च।

इति विश्वः।

शूलशिखरारोपितस्य शङ्कितवर्णस्य चोरस्य कर्णनासिकमिति प्राण्यङ्गत्वादेकवद्भावः। तच्छेदरुधिरपटले कर्णनासिकच्छेदनिर्गतरुधिरपटले पतिता भाङ्कारिभम्भराल्यो भाङ्कारोऽव्यक्तशब्दस्तद्युक्ता भम्भराल्यो मक्षिकास्ताभिर्भरितम्। इतजन्तो न तु क्तान्तः। पूरितं तादृग्भूमिभागेन बीभत्सेन।

चोरः शङ्कितवर्णश्च कुसुमाद्यः प्रकीर्तितः।

इत्युत्तरतन्त्रम्।

मत्सरा मक्षिका ज्ञेया भम्भराली च सा मता।

---

१ ग० -च्छेदजमद- D ग० -पतितभङ्करालिभ- C ग० -पतितभदङ्कारिभ D ग० -पतितभाङ्कारम- G ग० भम्भारा- E H इति ख० घ। ग० -भम्भराली- इति मर०। २ लोभम्भार- D H ३ दह्यमाग्नि- इति जग०। क० -मानपटचट-करोटि- A क० -मानकडम्बपटचटकरोटि- B क० -मानकङ्कुचटुलचटचट-करोटि- E G

चटत्नृकरोटीटङ्कारभैरवरवेण[1] शूलपाणिनेव [2]कपालावलि-
भस्मशिवावह्निभूतभुजगावरुद्धदेहेन पुरुषातिशयेनैवानेक-
मण्डलकृतसेवेन श्मशानवाटेन गत्वा निमेषमात्रादेवानेक-
शतयोजनं[3] प्रलयकालवेलामिव समुदितार्कसमूहां नाग-

इति-हारावली।

कटाग्निस्तृणाग्निस्तेन दह्यमानापटुचटचटत्नृकरोटिर्मनुष्य-शिरोऽस्थि तस्याष्टङ्कारेण भैरवरवेण भयानकशब्दविशिष्टेन। शिरोऽस्थनि करोटिः स्त्रीत्यमरः।

शूलपाणिनेव शिवेनेव। कपालावलीत्यादि। शिवा गौरी। पचे क्रोष्टी।

पुरुषेष्वतिशयो यस्य स महाराजस्तेनेवानेकमण्डलं राष्ट्रम्। पचे श्वा तत्कृतसेवेन।

प्रलयकालवेलामिव समुदितोऽर्कसमूहः स्वर्यसमूहो यस्याम्। पचेऽर्को वृचविशेषः। अर्काह्वस्तुकास्फोत इत्यमरः। मदार इति भाषायाम्।

नागराजस्थितिमिवानन्तः शेषो मूलमादिकारणमस्याः। पचेऽनन्तानि मूलानि यस्याम्।

- १ + विष्टतेक्ष्मामण्डलुखोऽस्मलऽस्मलनज्वालाजालजटिलेनानन्तन्तवशेतकल्पितक-पालकूटप्रलम्बितालम्बिडामरडाकिनीगणकृतरूपविभागकोलाहलेन।ईश्वराचितवि-वाहमण्डलप्रतिसरविद्याचमिथुनप्रदक्षिणीक्रियमाणचितापश्मानलेन D २ शूल-कपाल- D कापाल- C ३ -नं] B G H

[1]राजस्थितिमिवानन्तमूलां सुधर्मामिव स्वच्छन्दस्थितकौशिकां सत्पुरुषसेवामिव [2]बद्धश्रीफलाढ्यां भारतसमरभूमिमिव दूरप्ररूढार्जुनां[3] पुलोमकुलस्थितिमिव सहस्रनेत्रोचितेन्द्राणिकां [4]भूलपालचित्तवृत्तिमिव [5]फलितगणिकारिकां सञ्ज-

---

सुधर्मामिव देवसभामिव स्वच्छन्दं स्थितः कौशिक इन्द्रो यस्याम्। पचे कौशिक उलूकः।

सत्पुरुषसेवामिव बद्धश्रीयुक्तैः फलैराढ्याम्। पचे श्रीफलो बिल्वः।

बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि।

इत्यमरः।

भारतसमरभूमिमिव दूरप्ररूढोऽर्जुनः पार्थो यस्याम्। पचेऽर्जुनो वृचविशेषः। इन्द्रद्रुः ककुभोऽर्जुन इत्यमरः।

पुलोमकुलस्थितिमिव सहस्रनेत्रायेन्द्रायोचिता योग्येन्द्राणी शची यस्याम्। नद्यृतश्चेति कप्। पचे सहस्रनेत्रैः सहस्रमूलैरुचिता योग्येन्द्राणी शतावरी।

चारुधारा महेन्द्राणी शक्राणी जयवादिनी।

इति रभसः।

भूलपालो वेश्यापालो वैशिको वा तच्चित्तवृत्तिमिव फ-

---

१ राज्य- D २ — बद्ध- A B C D F G H इति जग॰ च मर॰ च। मरुफ-स- C ३ -धर्मार्जुनां D ४ भ्रूसापाल- इति जग॰ च नर॰ च। भू॰ -स्तृति- A B F G H ५ कल्पित- A B F दर्शित- D

नसम्पदमिव [1]विकसिताशोकसरलपुन्नागां शिशुजनलीला-
मिव कृतधात्रीधृतिं[2] कचिद्राघवचित्तवृत्तिमिव वैदेहीमयीं

लिता सफला वैशिकेभ्यो धनलाभात् सुरतसुखलाभाद्वा। गणिकानां वेश्यानामारिकागतिराकारणं वा यस्याः ताम्। ऋ गतौ धात्वर्थनिर्देशे ण्वुल्। वृद्धिः। अर्थान्तरे आङ्पूर्वः। प्रत्ययस्थादितीकारः। पक्षे गणिकारिका वृक्षविशेषः।

श्रीपर्णमग्निमन्थः स्यात् कणिका गणिकारिका।

इत्यमरः। जयपर्ण इति प्रसिद्धः।

सज्जनसम्पदमिव विकसिता हृष्टा अशोकाः शोकरहिताः सरला उदाराः पुरुषा नागा इव। पुन्नागाः पुरुषश्रेष्ठा यस्याः हेतोर्यस्यां वा ताम्।

स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः॥

इत्यमरः। पक्षे विकसिताः फुल्लाः अशोकाः सरलाः पुन्नागा यस्यां ताम्। पीतद्रुः सरलः पूतिकाष्ठम्।

पुन्नागः पुरुषस्तुङ्गः केसरो देववल्लभः।

इति द्वयोरमरः।

शिशुजनलीलामिव कृता धात्र्या उपमात्रा धृतिर्यस्याः। पक्षे धात्र्यामलकी। राघवो रामचन्द्रस्तच्चित्तवृत्तिमिव वैदेहीमयीं सीतामयीम्। पक्षे वैदेही पिप्पली।

---

१ वि०-शोकपिप्पलीसर० C २ धृतिं A C G धृति F

[1]क्वचित् क्षीरसमुद्रमथनवेलामिवोज्जृम्भमाणामृतां क्वचिन्नारायणशक्तिमिव[2] स्वच्छन्दापराजितां क्वचिद्वाल्मीकिसरस्वतीमिव दर्शितेक्ष्वाकुवंशां लङ्कामिव बहुपलाशसेवितां कुरुसेनामिवार्जुनशरनिकरपरिवारितां नारायणमूर्तिमिव [3]बहुरूपां

वैदेही रोचनासीतावणिक्स्त्रीपिप्पलीष्वपि ।

इति विश्वप्रकाशः ।

क्वचित् क्षीरसमुद्रवेलामिवोज्जृम्भमाणममृतं यस्याम् । ताम् । पक्षेऽमृता गुडूची । गुडूची तन्त्रिकामृतेत्यमरः ।

क्वचिन्नारायणशक्तिमिव स्वच्छन्दा स्ववशा अपराजिता पराजयरहिता ताम् । पक्षे स्वच्छन्दा निरर्गलप्रसृतापराजिता विष्णुक्रान्ता । विष्णुक्रान्तापराजितेत्यमरः ।

वाल्मिकिसरस्वतीमिव दर्शित इक्ष्वाको राज्ञो वंशः सन्ततिर्यस्यां ताम् । पक्ष इक्ष्वाकुः कटुतुम्बी स्यादित्यमरः ।

लङ्कामिव बहुपलाशै राक्षसैः सेविताम् । पक्षे पलाशो वृक्षः ।

कुरुसेनामिवार्जुनशरनिकरैः परिवारिताम् । पक्षेऽर्जुनशरौ वृक्षतृणविशेषौ तयोर्निकरैः परिवारिताम् ।

नारायणमूर्तिमिव बहुरूपामनेकस्वरूपाम् । पक्षे बहुरूपां बहुपशुकाम् । रूप तु श्लोकशब्दयोः ।

---

१ क॰ -लामिव स्वच्छन्दोज्ज्मृ A B C I G क॰ -लामिव दिव्य- H २ -यणमूर्तिमिव E ३ च्यतिव E H इति जग॰ च ।

सुग्रीवसेनामिव पनसचन्दनकुमुदनलसेवितामविधवामिव सिन्दूरतिलकभूषितां प्रवालाभरणां च कुरुसेनामिवोलूकद्रो-

---

पश्चावाकाशे सौन्दर्ये नाणके नाटकादिके।
ग्रन्थावृत्तौ स्वभावेचेति हैमः।

सुग्रीव सेनामिव पनसचन्दनकुमुदैस्तत्तदभिधानैर्वानरैः सेविताम्। पक्षे पनसचन्दने वृक्षौ कुमुदं पुष्पम्।

पनसः कण्टकिफले कण्टके कपिरुग्भिदोः।
चन्दनं मलयोद्भवे। चन्दनः कपिभेदे स्यात्।
कुमुदं कैरवे रक्तपङ्कजे कुमुदः कपौ।
दैत्यान्तरे च दिङ्नागयोगयोरपि कीर्तितः॥
इति त्रिषु विश्वप्रकाशः।

अविधवामिव सिन्दूरस्य तिलकेन भूषिताम्। पक्षे सिन्दूरतिलकौ वृक्षविशेषौ।

सिन्दूरस्तरुभेदे स्यात् सिन्दूरं रक्तचूर्णके।
इतिविश्वः। तिलकः क्षुरकः श्रीमानित्यमरः। पत्ररचनादिवन्नसिन्दूरधारणं प्रोषितभर्तृकाणामित्यविधवोक्तिः। प्रवालाः प्रकृष्टकेशाः विद्रुमा वाभरणं यस्यास्ताम्। पक्षे प्रवालाभरणां नवपल्लवाभरणाम्।

कुरुसेनामिवोलूकद्रोणशकुनिभिस्तदभिधानैर्वीरैः सनाथाम्। पक्ष उलूकः कौशिकः। द्रोणः काकः। शकुनिः पक्षिसामान्यम्। तैः सनाथाम्।

शकुनिसनाथां धार्तराष्ट्रान्वितां चाम्लानजातिभूषितामप्यकुलीनवंशां[1] दर्शिताभयामपि [2]विभीषणां सततहितपथ्यामपि

धार्तराष्ट्रैर्धृतराष्ट्रशतपुत्रैरन्विताम्। पक्षे धार्तराष्ट्राः पक्षिणः। धार्तराष्ट्राः सितेतरैरिति राजहंसप्रकरणेऽमरः।

अम्लानजातिभूषितामुत्तमजातिभूषितामपि न कुलीन उत्तमकुलविशिष्टो वंशः सन्तानो यस्यास्तामिति विरोधः वंशोन्ववायः सन्तान इत्यमरः। यद्वा न कुलीनस्योत्तमकुलस्य वंशो गर्वो यस्याः।

वंशो वेणौ कुले गर्वे पृष्ठाद्यवयवेऽपि च।

इति विश्वमेदिन्यौ। परिहारस्तु। अम्लानो महासहा जातिर्मालती ताभ्यां भूषिताम्। न कौ लीना वंशा वेणवो यस्याम्। अम्लानस्तु महासहा। सुमना मालती जातिरिति द्वयोरमरः।

दर्शितमभयं भयाभावो यया तादृश्यपि विशेषेण भीषयतीति विभीषणेति विरोधः। दर्शितमभयं नलदमभया हरीतकी वा यया विभीषणा जनसञ्चाररहित्यादिति परिहारः। अभयं नलदं सेव्यम्। अभया त्वव्यथा पथ्येत्यमरो द्वयोः। सततं हितं पथ्यं यस्यास्तामप्यसाध्यरोगभिन्नामपि प्ररूढगुल्मामिति विरोधः। सतत हिता प्राप्ता पथ्या हरीतकी यया ताम्। हि गतौ। क्तः। गत्यर्थत्वात् प्राप्त्यर्थः। प्ररूढा गुल्मा यस्याम्। अप्रकाण्डे स्तम्बगुल्माविर्त्यमरः।

---

१ निरस्तवंशां A B C E F G H इति सम॰ चमर॰ च। निरस्तवर्णां D
२ — वि॰ D

प्रवृद्धगुल्मां षट्पदव्याकुलामपि द्विपदानाकुलां[1] द्विजकुल-भूषितामप्यकुलीनवंशां विन्ध्याटवीं [2]विवेश।

अनन्तरं[3] तयोर्निद्रामादाय जगाम रजनी[4]। क्रमेण च कालकैवर्तेन तमिस्रानायं प्रक्षिप्य गगनमहासरसि सजीव-

---

षट्पदैर्भ्रमरैर्व्याप्तापि द्विपदैर्मनुष्यैरनाकुला। समुच्चयेऽपिः। अगम्यत्वादिति भावः। यत् तु जगद्धरः षट्पदेषु पदद्वयसङ्ग्रा-वादिति भाव इति तच्चिन्त्यम्। गौण्युत्तरा सञ्ज्ञा पूर्वसञ्ज्ञां बाधत इति विरोधानुत्थानात्। न हि त्रिपुत्रो द्विपुत्रव्यपदेशं लभते। यद्वा द्विपानां हस्तिनां दानेन मदजलेनाव्याप्तां षट्-पदैर्भ्रमरैर्व्याप्ताम्।

द्विजकुलेन भूषितामप्यकुलीनवंशाम्। ब्राह्मणकुलस्य स-र्वोत्कृष्टतया विरोधः। परिहारस्तु द्विजकुलैः पक्षिसमूहैर्वा भूषिताम्।

अनन्तरं तयोर्वासवदत्ताकन्दर्पकेत्वोर्निद्रामादाय रजनी रात्रिर्जगाम। क्रमेणोक्तविशेषणयुक्तेषु तारादिषु कन्दर्पकेतु-र्वासवदत्तया सह लतागृहे सुष्वापेत्यन्वयः।

कालेत्यादि। कैवर्तो धीवरः। आनायो जालम्। कैवर्ते दाशधीवरौ। आनायः पुंसि जालं स्यादित्यमरो द्वयोः।

---

१ इति जग॰ च मद॰ च। द्विपदाकुलां A B E G द्विपदकुलाकुलां C F २ प्रवि॰ A B C D F G ३ अथानन्तरं A B C D F G H इति जग॰ च मद॰ च। ४ तमस्विनी A B F यामिनी C G H निशा D

शफरीनिकर [1]इवापह्रियमाणे तारागणे रक्तांशुकपटे [2]विषमप्ररूढबिसलताशरयन्त्रकानुगतशतपत्रपुस्तकसनाथे मकरन्दबिन्दुसन्दोहनिर्भरपानमत्तमधुकरसान्द्रमन्द्रमञ्जुस्वनैः[3] स्वधर्ममिव पठति विकचकमलाकरभिक्षौ कृषीवलेनेव कालेन तिमिरबीजेष्विव मधुकरेषु कुमुदक्षेत्रेषु [4]मधुरसक-[5]र्दमितपरागपङ्केषु घनघट्टमानदलेषु[6] भ्रमरेषु [7]व्याजात्

रक्तांशव एव रक्तांशुकाः स्वार्थे कन्। त एव पटा यस्य तस्मिन्। रक्तांशुकं रक्तवस्त्रं पटो वसनं यस्येति च।

विषमप्ररूढबिसलतैव शरयन्त्रकं तालपत्रीयपुस्तकमध्यस्थरज्जुः तेनानुगतं शतपत्रं कुशेशयं तदेव पुस्तकं तेन सनाथे। सरत इति भाषायाम्।

मकरन्दबिन्दुसन्दोहनिर्भरपानमत्तमधुकराणां मन्द्रैर्गम्भीरैर्मञ्जुस्वनैः स्वधर्मं पठतीव विकचे विगतकेशे विकसिते च कमलाकरभिक्षौ। मन्द्रस्तु गम्भीर इति स्वरप्रकरणेऽमरः। शतपत्रं कुशेशयमिति कमलप्रकरणे च।

कृषीवलेनेत्यादि। कृषीवलः कर्षकः। कर्षकश्च कृषीवल इत्यमरः।

---

१ इवावह्रि- A B G इव ह्रि- C २ वि० -यन्त्रिकामुपगत- D ३ इति नास्ति घ। रसान्द्रस्वनैः A B H -रमन्द्रस्वनै C F ४ सरसक- C मकरन्दक- D H ५ र्दमितकेदारप C र्दमितकेसरप- H ६ -दलपुटेषु A C ७ भ्रमरव्या- A

पङ्कजेषूप्यमानेषु [1]रजोमुर्मुरसनाथमधुकरपटलानुगतोद्दण्डपुण्डरीकव्याजाद्धूपपटलमिव भगवते किरणमालिने प्रयच्छन्त्यां कमलिन्यां[2] [3]रजनीवधूकरतलद्वयोच्छलितपतत्प्रभातमुसलाघातक्षतान्तर उलूखल इव चन्द्रे [4]कण्डनकीर्णेष्विव तण्डुलेषु तारागणेषु [5]मीलत्सु सन्ध्याताम्रमुखेनेव[6] वासरवानरेण नभस्तरुमारोहता शाखाभ्य इव कम्पिताभ्यो दिग्भ्यो विकचप्रसून[7] इव तारागणे [8]चन्द्रमण्डले फले[9] च[10] निपत-

---

उप्यमानेषु टुवप बीजसन्ताने । रजोमुर्मुरेत्यादि । किरणमालिने सूर्याय । रजनीत्यादि । आहतिराघातः । क्षतान्तरे खण्डितमध्यभागे नायं कलङ्कः । किन्तु मुसलाघातरन्ध्रेणाकाश एव दृश्यत इति द्योतनाय । क्षतान्तरत्ववर्णनम् । कण्डनेत्यादि । सन्ध्येवेत्यादि । सन्ध्यैव प्रातःसन्ध्यैवाताम्रं मुखं यस्य तादृशेन वासरवानरेण । ताम्रमुखत्ववर्णनमन्यजातीयनिवृत्तये ।

स्फुरदरुण एव सूर्यसारथिरेव तरुणचूडा तया चारुवदने स्फुरत्यारुणया रक्तया तरुणचूडया चारुवदने कृकवाकोः चरितं भक्षणार्थम् । तारागण एव शालितण्डुलं तेन प्रथमं

---

१ द० -पटलधूमानु- A २ + कमलिन्यां A C F ३ द० -वधूक- D H ४ द्वयम- D ५ द० -मुखे D H ५ द० -मिवो- E ६ मिवो- D ६ -प्रसूराद्य B ७ + -दिवस D ८ दन्तुर- D E इति क्रम० च । ९ -फलपके- D E H इति क्रम० च । १० इव C

ति[1] [2]तारागणशालितपटुलशवलनभोऽङ्गणं स्फुरदरुणतरुण-[3]चूडाचारुवदने वासरक्तकवाकौ चरितुमवतरति [4]मत्सङ्गति-प्रवृद्धो वारुणीसमागमात्[5] द्विजपतिरेष पतिष्यतीति हस-[6]न्त्यामिवाखण्डलककुभ्यरुणकेसरिकराघातनिहतान्धकारक-[7]रीन्द्ररुधिरधाराभिरिवोदयगिरिशिखरनिर्झरधौतधातुधाराभिरिव [8]तुङ्गतुरङ्गखरखुरपुटपाटितपद्मरागच्छटाभिरिव

नभोङ्गणमवतरति। मेघो वर्षतीतिवत् प्रसिद्धेश्वरते [illegible] पात्तम्।

मत्सङ्गतेः प्रवृद्ध एष। द्विजराजश्चन्द्रो वारुणी पश्चिमदिक्। तत्सङ्गमात् पतिष्यति। इति हसन्त्यामिवाखण्डलककुभि पूर्वदिशि। मया सह यदा सङ्गतस्तदोभयोः समवयस्कतासीत्। इदानीं त्वपराङ्गना उपभुक्तापि सवयस्यामोदयमपि क्लान्तस्तया चात्तसारोऽत्यौत्सुक्यादापतिष्यतीति भावः। तथाच यत्सुखलोभान्मां परित्यज्य यातस्तत् सुखं नास्तीत्युपहासः। उक्तं चान्यत्र।

> बालोपभुक्ता बलमादधाति
> पतिं स्वथाङ्गं तरुणी करोति।

---

१ निपतिते D २ तारागणत- A B C D F G H ३ -चूडामणिच्छटाचा- D ४ मत्सङ्गमात् D H ५ + प्रभाते A B ६ न्त्या० -ककुभि वासरके D न्त्या० -रिकरकरा- D ७ रौ० र्झरधातु- E F ८ तु० प्रखर D तु० खुरपटपुट- E तु० -पुटपट्टला D तु० -पाटितोदयगिरितटपद्म D तु० रागपरागच्छायाभि- E F तु० रागच्छायाभि D H इति क्रम० च।

[1]केसरिकरतलाहतमत्तमातङ्गोत्तमाङ्गसङ्गलदस्रप्रसारिणी-
[2]भिरिवोदयाचलकूटकोटिप्ररूढजपाकुसुमकान्तिभिरिव त्रि-
[3]भुवनकार्यसम्पादकप्रभानुरागरसैरिव रक्तमण्डले [4]तारा-
कुमुदग्रहणाय प्रसारितहस्त इव कुङ्कुमरागारुणे[5] प्राचीवि-
लासिन्याः पूर्वाचलभोगीन्द्रफणोपले [6]गगनेन्द्रनीलतरुकनक-

प्रौढा जरां निश्चितमेव सूते
दृष्ट्वा नितान्तं बलजीवहानिम् ॥

इति ।

द्विजराजो ब्राह्मणश्रेष्ठः । वारुणी मदिरा पतिष्यति मा-
त्यलमेष्यति । रक्तमण्डलेऽरुणमण्डले भास्कर उदयमारोहती-
त्यन्वयः । करीन्द्रेत्यादि । धातुर्गैरिकः । पद्मरागो मणिः । कूटः
शृङ्गम् । अस्रं रुधिरम् । रुधिरेऽसृग्लोहितास्रमित्यमरः । प्रसा-
रिणी प्रणालिकेति हारावली । अनुरागो लोकानां प्रीतिः ।

ताराकुमुदेत्यादि । फणोपले फणारत्ने गगनमाकाश
एवेन्द्रनीलतरुस्तस्य कनककिसलये स्वर्णपल्लवे राजभवनादौ
निर्मितेन रूपकम् । तच्च रेखा गवयन्यायात् तरुता ।

---

१ पूर्वगिरिके- D के॰ -माङ्गसङ्कुलगल- D के॰ -प्रसारणी- A D E H के॰ -प्रसारणा- B C F G २ भि॰ -प्ररूढप्रौढज- D H ३ भु॰ -रक्तकार्य- C भु॰ -सम्पादकप्र- D H भु॰ -भावान्- D E H ४ ताराम्पडलकु- D ताराकुसुम- A B G ताराकुमुदवन- D ५ + कनकदर्पणे D ६ ग॰ -तपकाममनकि- D

[1]सुरराजशरासनकान्तिलेप इव[2] जलदच्छेदेषु [3]काषायपट इव शाक्याश्रममठिकासु[4] कौसुम्भराग इव [5]ध्वजपटपल्लवेषु फलपाक इव कर्कन्धूषु [6]कुङ्कुमच्छटारस इव व्योममहा-सौधाङ्गणस्य[7] सञ्चरद्रक्तजवनिकापट इव कालनर्तकस्य[8] [9]बालप्रवालभङ्गारुणे प्रसरति बालातपे क्षणेन च चाटु-[10]चटुलचक्रवाकहृदयशोकसन्तापहरणादिव दहनसमर्पि-ततेजःप्रवेशादिव [11]दिननाथकान्तोपलानलसङ्गादिवोष्णि-मानमुष्णरश्मेराश्रयति रश्मिसञ्चये कन्दर्पकेतुः सर्वरात्र-जागरणपरवशाहारशून्यशरीरतया निश्चेतनोऽनेकयोजनश

क्लिष्टारक्तं चागरमिव। तेन रक्तमित्यण्। सुरराजशरासन-मिन्द्रधनुः। काषायं कषायरक्तम्। शाक्यो बौद्धभेदः। मठि-का मढीति भाषायाम्। कर्कन्धूर्बदरी। कर्कन्धूर्बदरी कोली-त्यमरः। जवनिका तिरस्करिणी।

प्रतिसीरा जवनिका स्यात् तिरस्करिणी च सा।

इत्यमरः। प्रवालो विद्रुमः।

क्षणेन चोष्णरश्मेः सूर्यस्य रश्मिसमूह उष्णिमानमाश्रय-

---

१ सुरेश A B C F G H सुरपति D २ लेखेव A B G H लेख इव E ३ कषाय C F का॰-पट D इति नाग॰ च । ४ मपटलेषु D ५ ध्वजपटेषु H ६ कुसुम D ७ वे B ८ नटकस्य D ९ — बालु D E H १० च॰ वाकचक्रवाकहृद A B च॰-तापपङ्कमरा- A B ११ दिवानाद- A B C D F G H

तभ्रमणखिन्नो वासवदत्तयाप्येवंविधया सह लतागृहे मन्दमारुतान्दोलितकुसुमपरिमललुब्धमुग्धपरिभ्रमद्भ्रमरझङ्कारमनोहरे [1]तत्कालागतया निद्रया गृहीतो निःस्पन्दकरणग्रामः सुष्वाप।

ततो वणिजीव [2]प्रसारिताम्बरे महादावानल इव सकलकाष्ठोद्दीपिनि[3] पतङ्गमण्डले [4]मध्यन्दिनमारूढे कथमपि कन्दर्पकेतुः[5] प्रियया [6]विनाकृतं [7]लतागृहमवलोक्योत्थाय

तीत्यन्वयः। दिननाथकान्तोपलं सूर्यकान्तमणिः। निःस्पन्दकरणग्रामः स्वस्वविषयग्रहणासमर्थेन्द्रियवर्गः।

तत उभयोर्निद्रोत्तरम्। पतङ्गमण्डले सूर्यमण्डले नभोमध्यमारूढे सतीत्यन्वयः। वणिजीव प्रसारिताम्बरे प्रसारितवस्त्रे। पक्षेऽम्बरमाकाशम्। काष्ठमिन्धन काष्ठा दिक्। दीपिनि प्रकाशके दाहके च। पतङ्गौ पक्षिसूर्यौ च। अम्बर व्योमवाससी इत्युभयत्रामरः।

अथ कन्दर्पकेतुर्दैवेनेति कर्तृपदमध्याहार्यम्। प्रियया विनाकृत लतागृहमवलोक्य विललापेत्यन्वयः। विनायोगे पृथग्विनानानाभिरिति तृतीया।

---

१ तत्कालसुलभया D E २ विमा C ३ काष्ठापहारिणि A B C F + कल्पहच इव सर्वाशाप्रसाधके D ४ नभोमध्यमारूढे E ५ +प्राप्तप्रबोध E H ६ विना C D F H ७ ल॰ गृहमाली B C F G

च तत इतो दत्तदृष्टिः क्षणं विटपेषु क्षणं लतान्तरेषु[1] क्षणं तरुशिखरेषु क्षणमन्धकूपेषु क्षणं शुष्कपर्णराशिषु[2] क्षणमाकाशे क्षणं दिक्षु[3] विदिक्षु च [4]भ्रमन्ननवरतविरहानलदह्यमानहृदयो विललाप। प्रिये वासवदत्ते देहि मे दर्शनं

विरहादुन्मादं वर्णयति। परिहासार्थमन्तर्हिता स्यादिति। क्षणं विटपेषु वृक्षविस्तारेषु। क्षणं लतान्तरेष्वन्विष्यन्। तत्र तामनुपलभ्य शङ्कते। ननु नेयं परिहासेनान्तरिता पूर्वं मया नेयं विप्रलब्धा सम्यक्प्रदाशयानभिज्ञा क्षुत्तृषार्ता श्रान्ता तादृशानुरागा सेयं शिरीषमृदङ्गी भीषणे प्रदेशे कथं मां परित्यज्य स्थास्यतीति। मानुषीष्वेतादृशरूपानुपलम्भान्नागकन्येति केनचिन्नागेन वा न नीता स्यादिति क्षणमन्धकूपेषु क्षणं शुष्कपर्णराशिषु साक्षान्मृत्युयोगात् तद्विषोष्मणा वा तत्क्षण एवापगतजीविता भीरुस्तेन शयनस्थान एव परित्यक्ता स्यात्। अत्यप्सरोरूपा केनचिद्वियद्विहारिणा विद्याधरादिना वोपहृता स्यादिति क्षणं तरुशिखराग्रे क्षणमाकाशे क्षणं दिक्षु विदिक्षु च। कुत्राप्यनुपलम्भादनवरतविरहानलदह्यमानहृदयः। अतएवापगततर्कः। आह।

प्रिय इत्यादि। दैवदुर्विलसितं भाग्यदुर्विपाकम्। अवदातं शुद्धम्। दैप् शोधने कर्मणि क्तः।

---

१ लतान्तरेषु A B C D F G २ ०राशिषु C ३ + चणं विदिक्षु च परिध. B — विदिक्षु च A C D E F G H ४ भ्र० ०दह्य- A C E F G H भ्र० ०दन्द-ह्यमानहृद० D

किं परिहासेनान्तरितासि[1] त्वत्कृते यानि[2] मया [3]दुःखान्यनुभूतानि तेषां त्वमेव प्रमाणं हा प्रिय[4] मकरन्द पश्य मे दैवदुर्विलसितं किं मया न कृतमवदातं कर्माहो दुर्विपाका नियतिरहो दुरतिक्रमा कालगतिरहो ग्रहाणामतिकटु कटाक्षनिरीक्षणमहो[5] विसदृशफलता गुरुजनाशिषामहो दुःस्वप्नानां दुर्निमित्तानां च फलितं सर्वथा न किञ्चिदगोचरो[6]

अवदातं तु विमले मनोज्ञे सितपीतयोः ।

इति हैमः । अहो नियतिर्विधिर्दुर्विपाका ।

दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ।

इत्यमरः । दैवनियत्योः पर्यायतया पुनरुक्तिरियं वैचित्त्येन । कालगतिः दुःखेनातिक्रमो यस्याः । कटु क्रूरम् । गुरुजनाशिषामस्मान् परित्यज्य यातोऽपि सुकृतिभोग्यान् भोगान् लभस्वेत्येवं रूपाणाम् । स्पष्टा चेयं रीतिरर्जुनदाराणामभिमन्युविलापे महाभारते ।

विसदृशफलता दुःस्वप्नानामित्यादि । भवितव्यतानाम् । किञ्चित् शुभमशुभं वा । नागोचरो नाविषयः । तथाच भवभूतिः ।

---

१ मर्दितासि A B F G २ + यानि A B — यानि C F ३ चतिदुः- C ४ + -सख A B C E F G ५ -चपलतममहो C D E F ६ कश्चिद्गोचरो A B D E G H + भवति D

भवितव्यतानां किं न सम्यगागमिता[१] विद्याः किं न यथा-वदाराधिता गुरवः किं नोपासिता वह्नयः[२] किमधिक्षिप्ता भूदेवाः[३] किं न प्रदक्षिणीकृताः सुरभयः किं न कृत[४]

प्रायः शुभं च विदधात्यशुभं च जन्तोः
सर्वङ्कषा भगवती भवितव्यतैव।

इति। किं विद्या ज्योतिर्नीतिप्रमुखा न सम्यगागमिता न सम्यक् परिशीलिताः। यदावाभ्यां दुर्मुहूर्ते प्रस्थितं नीतिविरुद्धं चात्र स्थितमिति भावः। यथावद्यथाशास्त्रम्। इदमग्रेऽप्युभयत्रान्वेति। किं भूदेवा द्विजा अधिक्षिप्तास्तिरस्कृताः। तदुक्तम्।

गतश्रीश्च गतायुश्च ब्राह्मणान् द्वेष्टि भारत।

इति। तेन किंवा ममेयमवस्थेति भावः। अग्रजन्मभूदेववाडवा इत्यमरः।

किं सुरभयो गावो न प्रदक्षणीकृताः। यथेन्द्रमुपस्थायर्तुस्नातां सुदक्षिणां स्त्रला मत्सरी दिलीपो मार्गस्थां धेनुमप्रदक्षिणीकृत्यैव यातस्तथा शप्त एवमहमपि किं गोभिः शप्त इति भावः।

किं शरण्येषु शरणागतेष्वभयं न कृतम्। येन मामपि क-

---

१ -मधिगमिता H २ + किं नाभ्यर्चिता देवाः किंवाधिक्षिप्ता देवभूमयः D
३ — किमधिक्षिप्ता भूदेवाः A B C D E F G H ४ कृतः A B C F दत्तं D

[1]शरणेष्वभयमिति बहुविधं विलपन्[1] दक्षिणेन काननं निर्गत्य [3]नव्यनडनलदनलिनीनिचुलपिचुलविदुलबकुलेन[4] प्रचरचिरबिल्वबिल्वोटजकुटजरुद्धोपकण्ठेन सोत्कण्ठभ्टङ्ग-

---

श्चित् प्रियादानेन विरहानलान् त्रायत इति भावः। दक्षिणेनेत्येनबन्तम्। काननमित्यत्रैनपा द्वितीयेति द्वितीया।

निर्गत्य कच्छोपान्तेन कतिपयदूरं गत्वा जलनिधिमपश्यदित्यन्वयः। नव्या नडा धमना नलदान्यभयानि नलिन्यः पद्मिन्यः। निचुलाः हिज्जुलाः। पिचुला झावुकाः। विदुलाः परिव्याधाः। बकुलाः केसरा यत्र तेन। नडस्तु धमनः। नरकट इति ख्यातः। उशीरमस्त्रियाम्। अभयं नलदम्। खस इति ख्यातः। नलिनीपद्मिनीमुखाः। समौ पिचुलझावुकौ। झाऊ इति ख्यातः। द्वौ परिव्याधविदुलौ। वेत इति ख्यातः। अथ केसरे बकुलः। मौरसरीति ख्यातः। निचुलो हिज्जुलोम्बुजः। ख्यलवेत इति ख्यातः। समुद्रफल इति ख्यात इत्यन्ये। इति सन्नखमरः।

प्रचुरैश्चिरबिल्वैः करञ्जैर्बि॰ः शैलूषैरुटजैः पर्णमयैर्मुनिगृहैः कुटजैर्वृक्षभेदैरुद्धोपकण्ठेन।

चिरबिल्वो नक्तमालः करजश्च करञ्जके।

मुनीनां तु पर्णशालोटजोऽस्त्रियामिति द्वयोरमरः।

---

१ शरणेष्वपुरभय A B C F २ भक्षितस्ततो A विलप्य मरणेच्छु D ३ न॰ -लभिदुल- A B E G H इति काग॰ च। म॰ -विषल- C ४ -बकुलेन C G -बकुलबकुलेन D

राजरसितसुन्दरसुन्दरीवनेन विततवेत्रप्रततिप्रातावरणातरु-
णवरुणस्कन्धसन्नद्धभृङ्गरोलेन[1] [2]गोलाङ्गूलभयगलन्मधुच्छ-

कुटजो वृक्षभेदे स्यादगस्त्यद्रोणयोरपि।

इति विश्वप्रकाशः। कोरया इति भाषायाम्।

घोलकण्ठभृङ्गराजरसितेन सुन्दरं सुन्दरीवनं यत्र तेन।

सुन्दरी तरुभिन्नारीभिदोः स्त्री रुचिरेऽन्यवत्।

भृङ्गराजस्तु विज्ञेय ओषधे पक्षिभेदके।

इति धरणिः।

विततानां वेत्रप्रततीनां प्राते व्यूह आवरणं येषां तादृशा-स्तरुणा नवीना वरुणाख्तिक्तशाकास्तेषां स्कन्धे सम्बद्धा भृङ्ग-रोलाः कीटाः पक्षिणो भ्रमरा वा यत्र तेन। वल्ली तु प्रत-तिर्लता। वरणे वरुणः सेतुस्तिक्तशाक इति द्वयोरमरः।

भृङ्गरोलः पक्षिभेदे कीटभेदे च षट्पदे।

इति धरणिः।

गोलाङ्गूलेत्यादि। गोलाङ्गूलो वानरः।

गोलाङ्गूलः सवङ्गश्च कीशः शाखामृगः कपिः।

इत्युत्पलिनी।

तालस्तृणराजः। हिन्तालो हीनोऽन्यस्तालो हिन्तालः। पृषोदरादिः। पूगः क्रमुकः। पुन्नागो देववल्लभः। केसरो

---

१ -भृङ्गरोलेन C २ गो॰ -लभरभय॰ A B H गो॰ -मुखपमधु C F

न्मधुपटलरसासारसिक्ततरुतलेन [1]तालहिन्तालपूगपुन्ना-[2]गकेसरघनेन [3]घनसारमल्लिकाकेतककोविदारमन्दारबी-

---

नागकेसरस्तोर्घनेन। तृणराजाह्वयस्तालः। ताड इति ख्यातः। पूगः क्रमुको गुवाकः। सुपारीति ख्यातः।

पुन्नागे पुरुषस्तुङ्गः केसरो देववल्लभः।

गुर्जरदेशे देशरा इति ख्यातः। इति चिम्नमरः। केसरो नागकेसर इति हैमः।

घनसारो वृक्षभेदः। कूष्माण्डको वा। मल्लिका हंसास्तृणशून्यं वा केतकम्। कोविदारो युगपत्रकः। मन्दारोऽर्कः पारिजातको वा। बीजपूरः फलपूरः। जम्बीरो मरुबकः। जम्बूः। गुल्माः स्तम्बास्तैर्गहनेन। कूष्माण्डकः पुष्पफलो घनसार इति हारावली।

घनसारस्तु कर्पूरे दक्षिणावर्तपारदे।

इति हैमः।

मल्लिको हंसभेदे स्यात् तृणशून्ये तु मल्लिका।

इति रुद्रः।

कोविदारे चमरिकः कुद्दालो युगपत्रकः।

कचनार इति ख्यातः। गणरूपविकीरणाः। मन्दारश्च। म-

---

१ नारिकेलकरकेलिराजतालीतालहिन्तालहततमालतमालत्वलीपूग- D
२ गनागके- A C D E F ३ घनघनसा- D

[1]जपूरजम्बीरजम्बूगुल्मगहनेनाप्रत्यूहदात्यूहकुहरितभरितन-
दीनलनिकुञ्जेन पुञ्जितकुपठकपठकलकपठाध्यासितोद्दाम-
सहकारपल्लवेन [2]चपलकुलायकुक्कुटकुटुम्बसंवाहितोत्कट-
विटपेन कोरकनिकुरम्बरोमाञ्चितकुरबकराजिना रक्ताशो-
कपल्लवलावण्यलिप्यमानदशदिशा [3]प्रविकसितकेसररजो-
[4]विसरधूसरिमभरेण [5]परागपिञ्जरमञ्जरीमुह्यमानमधुकर-
मञ्जुसिञ्जितजनितजनमुदा [6]मदजलमेचकितमुचुकुन्दस्क-

दार इति ख्यातः। मन्दारः पारिजातकः। बकाइन इति ख्यातः। मन्दारः पारिजातकः। पञ्चैते देवतरव इति देवतरुर्वा। फलपूरो बीजपूरः। बिजौरा इति ख्यातः। मरुबकः प्रस्थपुष्पः फणिज्जकः। जम्बीरोऽपि। मरुआ इति ख्यातः। अम्रकाण्डे स्तम्बगुल्माविति षट्समरः।

अप्रत्यूह इत्यादि। प्रत्यूहो विघ्नः। पुञ्जीकृतेनाकुण्ठः कलकण्ठः कोकिलस्तस्य स्वरेणाध्यासिता उद्दामसहकारपल्लवा यत्र तेन। चपलेन कुलायकुक्कुटकुटुम्बेन सवाहितो मर्दित उत्कटविटपो यत्र तेन।

कोरकेत्यादि। निकुरम्बः समूहः। कुरबको रक्तमहा-

---

१ ज॰ -नात्यूहदा- A B G इति जग॰ च। ज॰ -नापदा- C H ज॰ -न प्रत्यू- D E ज॰ -नात्युपदा- F ज॰ -न्यूहव्यूहकु- D E २ च॰ -कुलालकु C G इति जग॰ च। ३ प्र॰ -तकुसुमके- A B प्र॰ -सरानुषध्यमामधू- D ४ वि॰ -रितध- B C D ५ प॰ -रमिञ्जुवारम- A प॰ -रपल्लामम- D ६ म॰ -कुन्दकुन्दस्क C F H

[1]न्यकाण्डकथ्यमाननिःशङ्ककरिकटविकटकण्डूतिना कतिप-
[2]यदिवसप्रसूतकुक्कुटीकुटीरीकृतकुटजकोटरेण चटकसञ्चा-
[3]र्यमाणचटुलवाचाटचाटकैरक्रियमाणचाटुना सहचरीचा-
रणचुञ्चुचतुरचकोरचुञ्चुना शैलेयसुकुमारतरशिलातलसु-

मशा। लाल कटसरैया इति भाषायाम्। विसरः समूहः। मुचु-
कुन्दो वृक्षभेदः।

मुचुकुन्दो वृक्षभेदे मुनिदैत्यविशेषयोः।

इति विश्वः। कटः गण्डस्थलः।

कतिपयदिनप्रसूतकुक्कुट्या कुटीरीकृतं कुटजकोटरं नि-
ष्कुहो यत्र तेन। चटकः कलविङ्कः। चटकः कलविङ्कः स्यात्।
पुमपत्ये चाटकैर इति द्वयोरमरः। चटकाया ऐरक्। वाचाटो
बहुभाषी। आलजाटचौ बहुभाषिणीत्याटच्।

सहचरीणां सञ्चारणैश्चुञ्चुभिर्वित्तैश्चतुरचकोरैः पक्षिभि-
श्चुञ्चुना वित्तेन। तेन वित्तश्चुञ्चुप्चणपौ।

शैलेयम्। कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु। शैले-
यमित्यमरः। शिलाजित इति ख्यातः। शेफालिका सुवहा।
शेफालिका तु सुवहेत्यमरः। निवारीति ख्याता।

शिफा जटायां सरिति मांसिकायां च मातरि।

इति विश्वप्रकाशः। गौधेरः। गोधाया ढ्रगिति ढ्रगन्तः।

---

१ भकाण्डमथ्यमा A B F भकाण्डमण्यमा C २ य॰ -कुटीरक A B E
य॰ कुटीरु- C इति नास्ति च। ३ र्यं॰ -चटुला A B र्यं॰ -चतुरवा E H

स्वप्नायितशशकशिशुना शेफालिकाशिफाविवरविस्रब्धविवर्तमानगौधेरराशिना निरातङ्करङ्कुना निराकुलनकुलकुलकेलिना कलकोकिलकुलकवलितसहकारकलिकोद्गमेन सहकारारामरोमन्थायमानचमरीयूथेन ¹श्रवणहारिसलीलगि²रिनितम्बनिर्झरनिनादनिद्राणमन्दायमानकरिकुलकर्णतालदुन्दुभिना समासन्नकिन्नरीगीतरवरज्यमानरुरुविसरेण

त्रयो गौधेरगौधारगौधेया गोधिकात्मजे।

इत्यमरः। गोह इति ख्याता। रङ्कुर्मृगः। रङ्कुशम्बररौहिषा इत्यमरः। राशिः समूहः। स्यान्निकारः पुञ्जराशी इत्यमरः। रोमन्थायमानाः। चर्वितस्याकृष्य पुनश्चर्वणं रोमन्थः। कर्मणो रोमन्थतपोभ्यां वर्तिचरोरिति क्यङ्। ङित्वादात्मनेपदम्। चमरी मृगभेदः। श्रवणहारि सलीलं गिरिनितम्बानां निर्झरनिनादेन निद्राणं करिकुलं तस्य मन्दायमानः कर्णतालो दुन्दुभिर्यत्र तेन। रुरुर्मृगभेदः। हता हरिता श्यामा न तु शुष्का या हरिद्रा तद्वै रज्यमाना। वराहपोतानां पोत्रपालिर्मुखाग्रपालिर्यत्र तेन।

पोत्रं वक्त्रं मुखाग्रस्य शूकरस्य हलस्य च।

इति विश्वप्रकाशः। पालिः पङ्क्तिप्रदेशयोरिति विश्वः। गुञ्जानां काकचिञ्चीनां पुञ्जे गुञ्जज्जालकजालं यत्र तेन।

---

१ श॰ -सलीलगि- A B श॰ -सलीडगि- C D २ रि॰ -द्राणमन्दम- A B C D F G

स्तहरितहरिद्राद्रवरज्यमानवराहपातपोत्रपालिना [1]गुञ्जा[2]पुञ्जगुञ्जज्जालकजालेन [3]दंशनकुपितकपिकपोतनखकोटिपाटितपाटलकीटपुटसङ्कुलेन[4] कुलिशशिखरखरनखरप्रचयप्रचण्डचपेटपाटितमत्तमातङ्गकुम्भस्थलरुधिरच्छटाच्छु[5]रितचारुकेसरभारभासुरकेसरिकदम्बेन महासागरकच्छोपान्तेन कतिपयदूरं[6] गत्वातिचपलवीचिप्रचयतया ताण्ड-

गुञ्जापि पटहे प्रोक्ता काकचिञ्च्यां कलध्वनौ।

इति विश्वप्रकाशः।

जालकः कथितो घोङ्गः काहडी चापि जालकः।

इत्युत्पलिनी।

घोङ्गे काहडिकायां च जालकः परिकीर्तितः।

इति हारावली।

दंशनेत्यादि। पाटलकीटः श्वेतरक्तः कीटविशेषः। कुलिशशिखरं वज्राग्रम्। केसरभारः स्कन्धकेशसमूहः। भासुरं दीप्तिमत्। भञ्जभासेति घुरजन्तः। कदम्बकं समूहः।

अतिचपलवीचिप्रचयतयातिचञ्चलतरङ्गसमूहतया। ताण्डवेपूद्दण्डो दोर्दण्डो भुजदण्डो यस्य तादृशः। खण्डपरशुः शिव-

१ गुञ्जाकुञ्ज- A B C E F G H गुञ्जापुञ्जकुञ्ज- D २ पु॰ -ज्जारक- C D E F पु॰ -जालेन D E F ३ दं॰ -कपिपोत- C D दं॰ -तपपेटकपा- D ४ -सङ्कटेन D ५ रितचारुतरके॰ A B ६ कतिपयपदानि D कतिपयाध्वानं E

[1]वोद्दण्डदोर्दण्डखण्डपरशुविडम्बनापण्डितं वारुणीविजयपताकाभिरिव शेषकुलनिर्मोकमञ्जुमञ्जरीभिरिव शशाङ्क-[2]परिशेषपरमाणुसन्ततिभिरिव लक्ष्मीलीलातर्पणधाराभिरिव[3] [4]जलदेवताचन्दनविच्छित्तिभिरिव फेनराजिभिरुपात्तरामणीयकमपरमिव गगनमवनिमवतीर्णमर्णवच्छलादुच्छलच्छीकरकणनिकरैर्नभस्वरान् मुक्ताफलैरिव[5] विलोभयन्तमभयाभ्यर्थनागतानेकसपक्षक्षितिधरभरितकुक्षिभागं सगरसुतशताखातमुत्खातपारिजातकमभिजातमणिरत्नाकरं करिमकरकु-

---

स्तद्विडम्बनापण्डितस्तदनुकरणपण्डितस्तम्। भूतेशः खण्डपरशुरित्यमरः। वारुणी वरुणस्येयम्। विजयपताकास्ताभिरिव। जलाधीशत्वादिति भावः।

शेष इत्यादि। निर्मोकः। समौ कञ्चुकनिर्मोकावित्यमरः। सन्ततिः समूहः। लक्ष्म्या लीलार्थं क्रीडार्थं यदातर्पणम्। अदपन इति भाषायाम्। तद्धाराभिरिव। विच्छित्तिश्चमत्कारः। रामणीयकं रमणीयता।

अपरमित्यादि। सगरो राजा। खातम्। खनु अवदारणे क्तः। जनसनेत्यात्वम्। पारिजातो देववृक्षः। अभिजातानां

---

१ चो॰ -दोखण्ड- A C D E F   २ परिशेष- D   ३ + सुरतसकुसुममाला-भिरिव D   ४ जल॰ -ताकुचचन्द- B C I'   ५ मुक्ताशकलैरिव B G H

2 M 2

लसङ्कुलं [1]शकुलकुलकवलनाभिलाषसञ्चरन्नक्रचक्रमस्तिमितनिमिङ्गिलकुलं [2]कूलकन्दलीवलयाचलविलुलितवेलातरलि[3]तलवलीलवङ्गमातुलिङ्गगुल्ममर्मिमारुतप्रसारितनरलतोत्ता[4]लतालहिन्तालतालीतरलितजलमानुषमिथुनमृदितसलिलपुलिनवालशैवालं प्रवालाङ्कुरकोटिपाटितमुखखिन्नशङ्खनखशिखालिखिततटलेखं खगेश्वरगोत्रपत्ररथपटलकलिलंसलिलमद्याप्यनिर्मुक्तमन्दरमथनसंस्कारमिवावर्तभ्रान्तिभिः साप-

---

शुद्धानां मणीनां रत्नानां चाकरः। करी जलचरो गजो मकरश्च। तयोः कुलेन। करिरूपमकरकुलेन वा सङ्कुलम्।

शकुलो मत्स्यभेदः। नक्रः कुम्भीरः। अस्तिमितं चञ्चलम्। तिमिं मत्स्यं गिलतीति तिमिङ्गिलः। मूलविभुजादित्वात् कः। अचि विभाषेति ललम्। गिलेऽगिलस्येति मुम्। महामत्स्यस्तस्य कुलं यत्र तम्।

कूलमित्यादि। लवली लताभेद इति केचित्। फलमित्यपरे। हरफारेवडीति प्रसिद्धम्। मातुलिङ्गको रुचकः। रुचको मातुलिङ्गक इत्यमरः।

प्रवालो विद्रुमः। पाटितं विदारितम्। शङ्खनखाः क्षुद्र-

---

१ मकुलकव- A H श० -कवलाभि A B D श० -मधरदनेकनक्रचक्र- C श० -मच्छस्त- A B C F G २ कू० -याचलोवि- A C H ३ त० -मातुलुम्बगु- C त० -मातुलुङ्गगु- E F H इति शग० च। त० -गुल्मं मात A C F G त० -मारुतमर्मरि- D ४ ल० -तरलित सोमज A B H ल० -चरितज D

स्मारमिव फेनैः ससुरामोदमिव वेलाबकुलगन्धैः सरोषमिव गर्जितैः सखेदमिव निःश्वसितैः सभ्रुकुटीभङ्गुरमिव[1] तरङ्गैः सालानस्तम्भमिव रामसेतुना कुम्भीनसीकुक्षिमिव लवणोत्पत्तिस्थानं व्याकरणमिव [2]विततस्त्रीनदीकात्यबङ्कलं राजकु[3]लमिव दृश्यमानमहापात्रं हस्तिबन्धमिव वारिगतानेकना-

---

शङ्खाः। क्षुद्रशङ्खाः शङ्खनखा इत्यमरः। खगेश्वरो गरुडः। अपस्मारो रोगः। सुरा मद्यम्। आलानं बन्धस्तम्भः। आलानं बन्धस्तम्भे इत्यमरः।

कुम्भीनसी राक्षसी लवणस्तत्सुतः। व्याकरणमिव विततानि स्त्री स्त्र्यधिकारकार्याणि नदीसञ्ज्ञा तत्कार्याणि। कात्यसञ्ज्ञाकार्याणि। बङ्कलं मघवा बङ्कलमित्यादि। पक्षे विततानां स्त्रीनदीनां पत्नीभूतानां नदीनां कात्यैस्तरङ्गाधरपानरूपैर्बङ्कलम्।

राजकुलमिव। महापात्रं महामात्यः। पक्षे पात्रं तीरद्वयान्तरम्। बन्ध बन्धने। अधिकरणे घञ्। हस्तिनो बध्यन्तेऽत्र हस्तिबन्धः। गजबन्धनस्थानमिव वारिगतैर्बन्धनरज्जुगतैस्तद्वद्भिरनेकनागैर्गजैर्मुच्यमानफूत्कारम्।

पानीये वारि विख्यातं वारि बन्धनरज्जुषु।

---

१ -भङ्गमिव A D E २ — वितत- A B C F G H विस्तारितस्त्री D
३ वर्जितमिव A B C E F G

गमुच्यमानफूत्कारं विश्वामित्रपुत्रवर्गमिवाम्भोजचामरमत्स्यो-पशोभितं सत्पुरुषमिव गोत्राश्रयं[१] साधुमिवाच्युतस्थितिरमणीयं सुनृपमिव[२] सज्जनक्रमकरं कृतमन्युमिव करतोयाप्लुत-

---

इति धरणिः। वशिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञिति इञ्। पक्षे वारि जलम्। नागाः सर्पाः। भ्रमरस्तु। वारी तु गजबन्धनीति दीर्घान्तं बन्धनस्थानवाचीह। तन्मते तु नैतदुपपद्यते कोशान्तरेष्वेवमेव।

विश्वामित्रपुत्रवर्गमिव। अम्भोजैः कमलैश्चामरैर्वालव्यजनैर्मत्स्यदेशाधिपैः शोभितम्। पक्षेऽम्भोजचामरं शैवालम्।

शैवालं शैवलाम्भोजचामरं जलनीलिका।

इत्युत्पलिनी।

सत्पुरुषमिव गोत्रं वंशः। पक्षे पर्वतः। साधुमिवाच्युताभ्रष्टा स्थितिर्मर्यादा तया रमणीयम्। पक्षेऽच्युतस्य विष्णोः स्थित्या रमणीयम्।

सुनृपमिव सज्जनानां क्रमकरं व्यवहारकरम्। पक्षे सज्जा नक्रा मकरा यत्र तम्।

कृतमन्युमिव कृतक्रोधमिव करतोयेन पाणिस्थजलेनाप्लुतं क्षालितं मुखम्। पक्षे करतोया नदी। करतोया सदानीरेत्यमरः।

---

१ शोत्राश्रय D २ सुनृपतिमिव A B C E F G

मुखं विरहिणमिव चन्दनोदकसिक्तं विलासिनमिव नर्मदानुगतमुद्धृतकालकूटमपि [1]प्रकटितविषराशिमतिवृद्धमपि सुन्दरीपरिवृतकण्ठं[2] सुरोत्पत्तिस्थानमप्यसुराधिष्ठितं[3] जल-

---

विरहिणमिव चन्दनक्षोदकेन सिक्तम्। पक्षे चन्दना नदीविशेषः। चन्दनसम्बन्धि जलं वा।

विलासिनमिव नर्म क्रीडा तां ददति ताभिरनुगतम्। पक्षे नर्मदा नदी। नर्मदा सोमोद्भवेत्यमरः। उद्धृतः कालकूटो हालाहलो यस्मात् तमपि। प्रकटितो विषस्य क्ष्वेडस्य राशिर्येन तमिति विरोधः। विषं जलमिति परिहारः।

अतिवृद्धमतिस्थविरमपि सुन्दरीभिः स्त्रीभिः परिवृतकण्ठमिति विरोधः। अतिवृद्धं महीयांसम्। सुन्दरी वृक्षभेदः। कण्ठः समीपदेशः। इति परिहारः।

कण्ठो गले गलध्वाने समीपेऽपि प्रकीर्तितः।

इति विश्वः।

सुराश्चन्द्रादयो मद्यं वा तदुत्पत्तिस्थानमपि ताभ्यामनधिष्ठितमिति विरोधः। यद्वा सुरस्य ब्रह्मण उत्पत्तिर्यस्मात् सुरोत्पत्तिर्विष्णुस्तस्य स्थानमपि। असुरैरधिष्ठितमिति परिहारः।

अचिन्त्यमित्यादि। यद्यतो यत्सविधे राघवेणारण्यवियुक्ता

---

१ प्रकटवि C D २ परिहृतोपकण्ठ B E परिगतोपकण्ठं C गतकण्ठ D -परिगतकण्ठ H ३ धिष्ठार्थं A B C F -धिष्ठानस्थानं D

निधिमपश्यदचिन्तयच्च। अहो मे[1] कृतापकारेणापि विधिनोपकृतिरेव कृता यदयं लोचनगोचरतां नीतः समुद्रः। तदत्र[2] देहमुत्सृज्य[3] प्रियाविरहाग्निं निर्वापयामि। यद्यप्यनातुरस्य [4]देहत्यागो न विहितस्तथापि कार्यः। न खलु सर्वः[5] कार्यमकार्यं वा करोति। इत्यसारे संसारे केन किं

कान्ता विना सोऽयं लोचनगोचरतां नीतः। तदत्र देहमुत्सृज्य शरीरत्यागं कृत्वा। तत्तत्कर्माचरणसामर्थ्यादिति भावः। प्रियाविरहाग्निं निर्वापयामि। तेनाथं कान्तां विरहाश्रयाशो निर्वापितः। अहं तु शरीरमुक्तेरित्यर्थः।

एति जीवन्तमानन्दो नरं वर्षशतादपि।

इति प्राचीनगाथयात्मघातनिषेधाच्चाह। यद्यपीत्यादि। आतुरस्य तु मरणम्।

दुश्चिकित्स्यैर्महारोगैः पीडितस्तु पुमानपि।
प्रविशेज्ज्वलनं दीप्तं कुर्यादनशनादिकम्॥

इत्यादि स्मृत्युक्तमेव।

अवश्यं भाविनो भावा भवन्ति महतामपि।
नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः॥
अपथे पदमर्पयन्ति हि
श्रुतवन्तोऽपि रजोनिमीलिताः।

---

१ — मे F H २ + अहमेव D ३ देहमुत्सृजामि वि॰ A D E F H इति क्रम॰ च। ४ चात्मत्यागो C D ५ + सर्व C D

वा[1] न कृतम् । तथाहि । गुरुदारग्रहणं[2] द्विजराजोऽकरोत् । पुरूरवा ब्राह्मणधनतृष्णया[3] विननाश । नहुषः परकलत्रदोहदी[4] महाभुजङ्ग आसीत् । ययातिर्विहितब्राह्मणीपाणिग्रहणः

इत्यादिना भवितव्यताप्राबल्यं मन्वान आह । तथापीति । उभयमपि करोतीति भावः । अस्मिन्निति । किमकार्यं न कृतमित्यर्थः । द्विजराजश्चन्द्रः । गुरुदारग्रहणं बृहस्पतिभार्यायास्ताराया ग्रहणं तया सह सुरतं तत्र बुध उत्पन्न इत्यादिपर्वणि कथा । पक्षे द्विजराजो ब्राह्मणश्रेष्ठः श्रुतिस्मृत्याद्यध्ययनसम्पन्नः । गुरुदारग्रहणं गुर्वङ्गनागमनम् । पुरूरवा राजा वयःशेषे ब्रह्मस्वमपहृत्य तत एव नष्ट इत्यपि भारते ।

नहुषो राजा परकलत्रदोहदीन्द्राण्यां साभिलाषो महाभुजङ्गः सर्प आसीत् । कामुको दोहदी मत इति रत्नकोशः । वृत्रवधदोषदूषिते मघोनि नहुष इन्द्रपदे स्थितस्तत इन्द्राण्यां साभिलाषोऽभूत् । यद्यपूर्ववाहनारूढो मां समयोऽपयास्यसि तदा स्वीक्रियते मयेत्यभिहितो महर्षीन् याने नियुज्य सर्पसर्पेति त्वरमाणोऽगस्त्येन सर्पो भवेति शप्त इति हरिवंशे ब्रह्महत्या कामान्धतया महर्षिपीडनं चोल्लमनेन ।

ययाती राजा कृतब्राह्मणीपाणिग्रहणः कृतदेवयानीपाणिग्रहणः पपात । तारुण्यादित्यर्थः । ययातिर्भृगुसुताया देवयान्याः

---

[1] नाम C D H [2] -दारहरण A B C D F G H [3] -धनस्य तृष्णया A B
[4] इति अग॰ च । हदो A B E H हदेन C F G

पपात। [1]सुद्युम्नः स्त्रीमय इवाभवत्। सोमकस्य[2] प्रख्याता[3] जन्तुवधनिर्घृणता[4]। पुरुकुत्सः कुत्सित आसीत्। कुवलयाश्वोऽश्व-

---

परिचारिकायां शर्मिष्ठायामेषासक्तो देवयान्या भार्गवाय निवेदितस्तेन शप्तः। प्रवया भवेति। अतिकामुकत्वेन वयोन्तरप्राप्तिर्ध्वनिता।

सोमकस्यैतदभिधानस्य जन्तोस्तन्नाम्नः पुत्रस्य वधेन निर्घृणता। पक्षे जन्तवः शरीरिणः। सोमकस्य शतस्त्रीष्वेकस्यां जन्तुसञ्ज्ञः पुत्र उत्पन्नः। स कदाचित् पिपीलिकया दष्टोऽरुदत्। ततः सर्वास्तन्मातरोऽरुदन्। ततोऽन्तःपुरे महानाक्रन्द आसीत्। तत् श्रुत्वा राज्ञा पुरोहितः पृष्टः। सन्तु मे बहवः पुत्राः कथमिति तेन जन्तुर्हतो हुतश्च तद्धूमाघ्राणात् सर्वाः सगर्भाः संवृत्तास्ततः शतं पुत्रास्तस्याभवन्निति भारते। जन्तुर्जन्युशरीरिण इत्यमरः। एतेन त्रयो महापातकिनो वर्णिताः।

कुवलयाश्वो राजाश्वतरकन्यामप्यश्वतराख्यनागकन्यामपि जहार। कुवलयाश्वो भार्यायां मदालसायां प्रमीतायामत्यन्तविक्लवः। तन्मित्राभ्यामश्वतरपुत्राभ्यां तद्वृत्तान्तः पित्र आख्यातः। पुत्रमित्रत्वान्मायानिर्मितां मदालसां तस्मायर्पयत् सः।

---

१ प्रद्युम्न' A B D G इति मर॰ प। २ पस्य A B G ३ + जगति D
४ + नाम A B

नरकन्यामपि [1]जहार। नृगः कृकलासतामगमत्[2]। नलं कलिरभिभूतवान्। शम्बरणो[3] मित्रदुहितरि [4]विक्लवतामगात्।

न भस्मसात् कृतः कोऽपि विघ्नः केनापि भूतले।
आब्रह्मसृष्टेरित्येतद्विस्मृत्य स्मरमोहितः॥
मनुजो नागकन्यामप्याजहार मदालसाम्।
कामार्थतां ध्वनयितुमिदमाह नृपात्मजः॥
अज्ञानादपि सञ्जातं पातकं फलति ध्रुवम्।
इति प्रदर्शयन्नाह नृगस्य कृकलासताम्॥

नृगो राजा। कृकलासतां सरटत्वमगमत्। सरटः कृकलासः स्यादित्यमरः।

नृगेण पुष्करे तीर्थे गा द्विजभ्यः कृताः पुरा।
तत्राज्ञानाद्द्विजस्यैका कपिला मिलिताभवत्॥
अपराधादतस्तेन भूमः सरटतामयात्।

नलं राजानं कलिस्तुर्ययुगोऽभिभूतवान्।

कालेन कलिना सोऽपि पुण्यश्लोकोऽति पीडितः।
इति संस्मारयन्नूचे नलाख्यानं पुरातनम्॥

शम्बरणो मित्रदुहितरं प्रति सूर्यसुतां प्रति। पक्षे मित्रस्य सुहृदो दुहितरम्। स्पष्टम्।

---

१ पतिजहार C २ -अगात् C D H ३ सम्बरो A B C D E F G H संवरणो इति जग०। ४ प्रक्षतिविक्षतितामगात् A B E F G

दशरथ[१] इष्टरामोन्मादेन[२] मृत्युमवाप। कार्तवीर्यो गोब्राह्मणपीडया पञ्चत्वमयासीत्[३]। युधिष्ठिरः समरशिरसि सत्यमुत्ससर्ज। [४]शान्तनुरतिव्यसनाद्विपिने[५] विललाप। इत्थं नास्त्यकलङ्कः कोऽपि[६]। तदहमपि देहं त्यजामि[७]। इति वि-

---

दशरथ इति। मृगयायां हतस्य तपस्विनः पित्रोर्यथा पुत्रवियोगाद्वयोर्मृतिरेवं पुत्रशोकान्मृतिस्तेऽस्तु। इति शापाद्रामवियोगेन मृतिः। मृगयामक्तिव्यसनेन तपस्विवधोऽपि ध्वनितः।

कार्तवीर्यः सहस्रबाहुर्गोर्जमदग्निगोर्ब्राह्मणस्य जमदग्नेः पीडया मृतः।

अनेनैवापराधेन रामेण निहतोऽर्जुनः।

युधिष्ठिर इति। शान्तनुरिति।

शोकान्मृतिर्देहोत्सर्गो वने च परिदेवनम्।
कन्दर्पकेतुः स्वकृतावुपष्टम्भकमुक्तवान्॥

तदहमपि देहं त्यजामीति विचिन्त्य पुलिनमाससादेत्यन्वयः।

कुररा उत्क्रोशास्तेषां खरनखरशिखरैः खण्डितपृथुरोमबिलं झषबिलम्। उत्क्रोशकुररौ समौ। पृथुरोमा झषो मत्स्य इत्यमरः।

---

१ -रथो दृष्ट- A B F २ -तवियोगोन्मादेन E -भरताभ्यां रामोन्मादात् इति क्व०। ३ + समु° सुवर्णव्यापन्न नमाम C F ४ शन्तनु- A C F H ५ -व्यसनाद्वने A F H ६ + प्राप C ७ देहत्यागेन कष्टहो भयामि C

चिन्त्य [1]कुररखरनखरशिखरखण्डितपृथुरोमविलमविरलश[2]-कुलकुलशल्कजलनकुलोच्चारं[3] [4]क्रोष्टुकुलोत्कृष्टविकटक-[5]कर्कटकर्परपरम्परापरिगतोपान्तमतितरलतरजलरयलुलितच-टुलशफरकुलकवलनकृतमतिनिभृतवकशकुनिनिवहधवलि-[6][7]तपरिसरमतिचपलजलकपिकुलविहरणलुलितसलिलकण-

---

अविरलानि शकुलकुलस्य मत्स्यविशेषकुलस्य शल्कानि यत्र । तादृशा जलनकुलानामुच्चारा यत्र तत् । शल्को शकलव-ल्कले इत्यमरः । उच्चारावस्करौ शमलं शकृदिति च ।

क्रोष्टुकुलोत्कृष्टाः शृगालकुलत्यक्ताः विकटाः कर्कटानां कर्परपरम्पराः कपालपरम्परास्ताभिः परिगतोपान्तं व्याप्तप्रा-न्तम् । स्यात् कर्परः कपालोऽस्त्रीत्यमरः ।

अतितरलजलस्य रये वेगे लुलितं चटुलं यत् शफरकुलम् । तत्कवलने कृतमतिरतएव निभृतो मन्दचेष्टाशून्यो वकशकु-निनिवहस्तेन धवलितपरिसरम् ।

अतिचपलेति ।

शिशुमारो जलकपिस्तन्द्रकी चाग्निपुच्छकः ।

---

१ कु० -नखपुलश- B D　२ कुलशल्काकमणसङ्कुलज- A B　कुलसङ्कुलज- C कुलशल्कसङ्कुलज D H इति जग० च नर० च । कुलशकलसङ्कुलज- L F कु० -नकुलकुलो- A B C D E F G H इति नर० च ।　३ -रण A B F -लोच्छ्रायं D -लोत्तारं इति नर० ।　४ क्रो० -विकलमर्क C　५ कर्क० शतप्रान्त B C D F G H कं० -ततवलशफ- A B F G　६ -हशवलित D　७ त० गतिसमुद्दितच- A B F G H

[१]निर्झरजनितपवनरयपरिमिलितशिशिरतरमनुदिवसनिपतदतितरुणवनमहिषगवलशिखरलिखितविषमतटमनवरतचरदसितमुखचरणविहगनिवहमधुरनिनदमुखरितमहिमकरच-

---

इति हारावली।

अनुदिवसं निपतन्तोऽतितरुणा वनमहिषास्तेषां गवलशिखरैः शृङ्गाग्रैर्लिखितानि विदारितानि तैर्विषमतटम्। गवलं माहिषं शृङ्गमित्यमरः। अत्र गवलप्रयोगे यद्वक्तव्य तदन्यत्रोक्तम्।

अनवरतं चरन्तोऽसितमुखचरणा धार्तराष्ट्रास्तेषां निवहस्तस्य मधुरनिनदैर्मुखरितम्।

राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः।
मलिनैर्मल्लिकाख्यास्ते धार्तराष्ट्राः सितेतरैः॥

इत्यमरः।

अहिमकरः सूर्यस्तस्य चरणैरिव किरणैरिव रुचिरं भासुरं जलमनुजानां जलमनुष्याणां शयनेन मुदितं जलगतं जलान्तर्गतं धरणितलं यत्र। यद्वा। अहिः सर्पा मकरो जलजन्तुभेदस्तयोश्चरणेन भ्रमणेन रुचिरं पोताधानादिरहितं जलजमनुजशयनेन मुदितं जलधरणितलं यत्र।

---

१ निकरपतितपद- D नि॰ -पवमपरि- D E H नि॰ -शिरितमम- D E नि॰ -शिरिमतटम- H

[1]रणरुचिरजलमनुजशयनस्थगितजलधरणितलमतिबहलम-[2]दजलशबलकरटतटकरिवरशतनिपतितमधुकरविरुतरतिक-[3]रमतिजवनपवनविधुतजलधिजलपटलविनटननिपतितमणिगणपरिगतपरिसरं जलनिधिभुजगनिर्मुक्तनिर्मोकपट्टमिव दर्पणमिव वसुन्धरायाः स्फटिककुट्टिममिव वरुणस्य विपुलं पुलिनजलमाससाद ।

ततः कृतस्नानादिर्जलमवतरितुमारेभे शरीरत्यागाय । अथ सानुशयेषु शापेषु निर्मत्सरेषु मत्सेष्वक्षुद्रेषु क्षुद्रेषु वत्स-

---

अतिबहलमदजलशबलः करटो गण्डो येषां तादृशकरिवरशतेषु निपतितमधुकराणां विरुतिभिः शब्दैः रतिकरम् । काकेभगण्डौ करटावित्यमरः । कट इत्यपि पाठोऽर्थस्त्वभिन्नः ।

अतिजवनोऽतिवेगवान् पवनस्तेन विधुतजलधिजलपटलान्निपतितो मणिगणो यत्र तादृशः परिसरो यस्य तम् । जवनस्तु जवाधिक इत्यमरः ।

जलनिधीत्यादि । तत इत्यादि । आकाशसरस्वती आकाशवाक् समुदचरदुत्थिता अकर्मकत्वादुदश्चर इत्यात्मनेपदं न ।

---

१ र० -लमतिशयसुदितजलधरनिकरमतिबहल A B २ द० -रशत-शयप A द० -रशतशयभतलप- B D द० रशयननिप C द० धुकरनि-करमधुरवि- A B Γ द० -धुकरमधुरवि- D ३ र० धुतजलवि- A B C D E F G H र० -पतिततमालगण- D

लेपु कच्छपेष्वक्रूरेषु नक्रेष्वभयङ्करेषु मकरेष्वमारेषु शिशुमारेष्वाकाशसरस्वती[१] समुदचरत्। आर्य कन्दर्पकेतो पुनरपि तव[२] प्रियया सह सङ्गमो [३]भविष्यत्यचिरेण तद्विरम मरणव्यवसायादिति। तदुपश्रुत्य मरणाद्विरराम[४]। पुनः [५]प्रियया समागमेच्छया शरीरस्थितिहेतुमाहारं[६] [७]चिकीर्षुर्महासागरकच्छोपान्तभुवं[८] जगाम। अथ [९]तत इतः परिभ्रमन् फलमूलादिना वने[१०] वर्तमानः[११] कियन्तं कालं निनाय कन्दर्पकेतुः।

एकदा[१२] कतिपयमासापगमे[१३] काकलीगायन[१४] इव

तत्स्वरूपमाह। आर्येत्यादि। एकदा वर्षामगय आजगामेति सम्बन्धः। काकलीगायनः कलसूक्ष्मगायनस्तद्वत्। मन्द्रं निम्न नीचं गभीर वागानन्दं ददाति तादृशः। पक्षे मन्द्राः परिपूर्णपात्राः निम्नगा नद्यो नदाश्च यत्र। काकली तु कले सूक्ष्मे। निम्न गभीरं गम्भीरमिति द्वयोरमरः।

---

१ काशात् सरस्वती A B D F H २ — तव E F ३ भविष्यतीत्य A B E G H ४ विरराम मरणारम्भात् C D L ५ प्रियासमागमाशया C D ६ -तुभूतमशन C D ७ चिकीर्षुः कच्छे C D ८ -वनभुवं D ९ तत्र च C D १० — वने A E F H ११ वर्तयन् C D F H १२ + अपि A B + तु C D L H १३ पद्मिनमापगमे A B F H १४ -गीतगायन B F H

[1]सन्नद्धनिम्नगामदः सन्ध्यासमय इव नर्तितनीलकण्ठः कुमारमयूर इव समूढशरजन्मा महातपस्वीव प्रशमितरजःप्रसरस्तापस इव धृतजलदकरकः प्रलयकाल इव दर्शितानेकतरणिविभ्रमो[2] निरुपद्रुतकाननोद्देश[3] इव [4]घनोत्स-

---

नीलकण्ठः शिवः। पक्षे मयूरः। कुमारमयूर इव सम्यगूढं शरजन्मा षडाननो येन। पक्षे समूढानां पुञ्जीभूतानां शराणां जन्म यत्र।

समूढः पुञ्जिते भुग्ने सद्योजाते धृतेऽपि च।

इति विश्वः।

रजो धूलिः। पक्षे द्वितीयो गुणः। तापस इव तपस्वीव धृतो जलदो जलप्रदः करक. कमण्डलुर्येन। पक्षे धृता जलदा. करका वर्षोपला येन।

करका मेघपाषाणे करका च कमण्डलौ।

दाडिमेऽपि च करक करो च करकः स्मृतः॥

इति विश्वः। वर्षासु करकावर्णनं कविसम्प्रदाय.।

प्रलयकाल इव दर्शितोऽनेकतरणीनां सूर्याणां विभ्रमो येन। पक्षे तरणिर्नौः। स्त्रियां नौस्तरणिस्तरिरित्यमरः। विभ्रमो भ्रमणम्।

निरुपद्रुतकाननोद्देश इव घनमत्यन्तं घना वोत्सुकिताः

---

१ सन्नद्ध A B C D E F G H   २ विभ्रमो A F   ३ काननप्रदेश A B -काननप्रदेश F G   ४ घनघमुत्सु A B F G H

कितसारङ्गो रेवतीकरपल्लव इव हलिधृतिकर[1] आजगाम वर्षासमयः। निर्भिन्नमेघनीलोत्पलकानने क्रीडासरसीव नभसि स्मरस्य रत्ननौकेव [2]जलदलक्ष्मीमातङ्गकन्यानर्तनरज्जु-

---

सारङ्गा हरिणा यत्र। पक्षे घनेन मेघेनोत्सुकिताः सारङ्गाश्चातका यत्र।

चातके हरिणे पुंसि सारङ्गः शबले त्रिषु।

इत्यमरः।

रेवतीकरपल्लव इव हलिनो बलरामस्य धृतिकरो धैर्याधायकः। पक्षे हलिनां कर्षकाणां धृतिकरः प्रीतिकरः।

इन्द्रधनुर्लता रराजेति सम्बन्धः। निर्भिन्ने विकसिते मेघ एव नीलोत्पलकानने क्रीडासरसीव नभसि कुसुमशरस्य रत्ननौकेव रत्नजटितनौकेव जलदलक्ष्म्येव मातङ्गस्य चण्डालभेदस्य कन्या सैव नर्तकी तस्या रज्जुः समाकर्षणरज्जुः। चण्डालकन्या रज्जुमवलम्ब्य नृत्यति।

चण्डालप्लवमातङ्गदिवाकीर्तिजनङ्गमाः।

इत्यमरः।

नभ इति। प्रवसता निदाघेनोष्णोपगमेन स्मरणाय दिवो द्योः पयोधरे स्तने मेघे च दत्तानि नखक्षतानीव।

---

१ + रावण इव गतेषमादो विन्ध्यगिरिरिव सवन C २ ज०-अंबरलट- A B D F G.

रिव नभःसौधतोरणमालिकेव प्रवसता[1] निदाघेन दिवः पयोधरे दत्ता स्मरणाय[2] नखक्षतावलीव गगनलक्ष्मीरत्नरसनामालेव [3]नभोमन्दारतरुसुन्दरकलिकामालेव[4] रतिनखमार्जनरत्नशलाकेव रत्नशुक्तिरिव कुसुमकेतोरिन्द्रधनुर्लता रराज। अतिवेगनिपीतजलधिजलशङ्कमाशामिव व-

चिरोत्पन्नप्रवासेन प्रीतिर्गच्छेत् पराभवम्।
रागायतनसंस्मारि यदि न स्यान्नखक्षतम्॥

इति कामतन्त्रम्। निदाघ उष्णोपगमः। श्रीदिवौ द्वे स्त्रियामभ्रमित्यमरो द्वयोः।

गगनलक्ष्म्या रत्नरसनेव काञ्चीव।

स्त्रीकट्यां मेखला काञ्ची सप्तकी रसना तथा।

इत्यमरः। नभोमन्दारस्य देवतरुविशेषस्य सुन्दरकलिकामालेव।

रतिरित्यादि। अतिवेग इति शङ्कापाने हेतुः। बलाकाच्छलाद्धिमकणिकामिषादूर्ध्वमण्डलदेशेऽदृश्यत। बलाका विसकण्टिकेत्यमरः। बकजातिविशेषः। कैतवापह्नुतिरलङ्कारः।

कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुते पदैः।

इति लक्षणात्।

---

१ प्रसारिता D २ — स्मरणाय C D E F ३ न॰ ॰न्दारतरु॰ C D E G H न॰ ॰तरुकुसुमक॰ B C G H ४ ॰न्दरमञ्जरीलेखेव A ॰न्दरमञ्जरीव D ॰न्दरकलिकालेखेव F

[1]लाकाच्छलादुद्गमन्नदृश्यत जलदः। [2]पीतहरितैः कृष्णासु[3] केदारिकाकोष्ठिकासु [4]समुत्पतद्भिर्जतुशबलैरिव दर्दुरैर्नयद्यूतैरिव[5] चिक्रीड वर्षाकालः। रविदीपकज्जलनिचयनिभे निकषोपल इव [6]मेघसमयसुवर्णकारनिकषितसुवर्णलेखेव तडिदशोभत[7]। विरहिणां हृदयं विदारयितुं

कृष्णास्वसितासु सदूर्वास्वित्यर्थः। जातिद्वयसद्भावादिविशेषणसार्थक्यम्। क्वचित् कृष्टास्विति पाठस्तत्र हलसंस्कृतास्वित्यर्थः।

केदारिका एव कोष्ठिकास्तासु। केदारकोष्ठाभ्यामल्पत्वे कनि रूपम्। कियारीति भाषायाम्। वस्त्रादिनिर्मितं क्रीडासाधनं स्थलविशेषः। कोठा इति च।

पीतहरितैस्तद्वर्णैर्जतुशबलैर्लाक्षाचारकैः। नयो युद्धनीतिस्तच्छिद्रकैर्धूर्तैश्चतुरङ्गैश्चतुरङ्गसाधनेषु लक्षणा नयद्यूतसाधनभूतैर्हस्त्यश्वादिभिरिव समुत्पतद्भिर्दर्दुरैर्भेकैः कालश्चिक्रीड। शातुपैरिति पाठे विकारे त्रपुजतुनोः षुगित्यण् षुगागमश्च।

रविरिति। निकषोपलमाकषः। आकषो निकषोपलम्। कसौटीति भाषायाम्।

विरहिणामिति। करपत्रं क्रकचम्। क्रकचोऽस्त्री करपत्र-

---

१ छल॰-मम्‌ममद- D २ धावीत A B C F ३ लष्टासु A B D इति अग॰ च मर॰ च। ४ स॰-जोतुपत A B D F H इति अग॰ च। ५ दर्दुरैर्भवत्सैरिव A B D F G H दर्दुरैर्बिंदूता मर्म मवद्भि C E इति अग॰ घे। + मारोभिरिव C ६ प्राइट्म॰ A ॰मेघसमय॰ D मेघ प्राइट्म॰ F मेघगृहस्थ- H ७ -दशोभत D E

करपत्रमिव कुसुमायुधस्य क्रकचच्छदमशोभत। जलददारुणि लोलतडिल्लताकरपत्रदारिते [१] घनवेगनिर्धूतचूर्णचया इव जलरेणवो बभुः। विच्छिन्नदिग्वधूहारमुक्ता इव खरपवनवेगभ्रमितघनघरट्टघट्टनसञ्चूर्णिततारानिकरा इव [२] त्रिभुवनविजिगीषोर्मकरध्वजस्य प्रस्थानलाजाञ्जलय इव करका व्यराजन्त [३]।

[४] अनन्तरमखञ्जखञ्जरीटेऽकुञ्चितकोञ्चसञ्चारे [५] निर्भर-

मित्यमरः। आरा इति भाषायाम्। क्रकचपत्रं केतकपुष्पम्।

द्रोणीदलं सूचिपुष्पं जम्बालं क्रकचच्छदम्।

इति शारावली। लोलतडिल्लताकरपत्रदारिते जलददारुणि मेघकाष्ठे पवनवेगनिर्धूताः कम्पिताश्चूर्णचया इव जलरेणवः शीकरा बभुः शुशुभिरे।

विच्छिन्नेति। घनो मेघ एव घरट्टः। जाता इति भाषायाम्। युयुत्सोरणागिरयेषो जमादिरयभ्रमणाय। करका वर्षोपलाः।

अनन्तरं शरत्समयारम्भे कन्दर्पकेतुः शिलासनों पुष्पिकां

[1]भारद्वाजद्विजवाचाटविटपे पटुप्रभप्रभाते भ्रान्तशुककुलकलमकेदारे प्रवेशिताविशिकराजहंसे [2]कंसारातिदेहद्युतिद्युतले [3]हंसदलतुलितजरज्जलमुचि सान्द्रीकृतेन्द्रमहकार्मुक-

---

पाञ्चालिकां मम प्रियानुकारिणीयमिति तां करेण पस्पर्शेति सम्बन्धः ।

शरदं वर्णयन्नाह । अखञ्जाः सञ्चतयः । खजि गतिवैकल्ये । अकुञ्चिते विस्तृते निर्भरं भारद्वाजद्विजैर्वाचाटविटपे । भारद्वाजवाचाटत्वं विटपेष्वारोप्यते । तेन लक्षणानामालङ्कारोऽत्र ।

साक्षादनभिसम्बन्धात् सम्बन्धिषु परिग्रहः ।

यत्र सा लक्षणा नाम ।

इति कण्ठाभरणे । पटुप्रभं सुन्दरं प्रभातं यत्र । भ्रान्तं भ्रमणविशिष्टं शुककुलं तादृशं कलमानां शालीनां केदारं क्षेत्रं यत्र । प्रवेशिता आवेशिका आगन्तवो राजहंसा यत्र । स्युरावेशिक आगन्तुरित्यमरः ।

कंसारातिदेहद्युति कृष्णशरीरतुल्यकान्तौ द्युतले हंसवत् दलं हंसदलं तत्तुलिते जरज्जलमुचि पुराणमेघे जलसंयोगकृतं नवत्वं जलवियोगकृतं शरत्त्वं बोध्यम् । सान्द्रीकृता घनीकृतेन्द्रमहकार्मुकानां शुभ्रां मुत् प्रीतिर्येन तत्र ।

---

१ भरद्वाजवा- CF भा० -द्विजरचितवा D २ कंसारिदे- A B C D F G क० -द्युतिभिसंस्तु- A B G क० -द्युतिनिभनभस्तले D ३ हंसकुलतु- A B D H हं० -लितराजस्फुम- A B D E F G H

मुदि मधुरमधुतृणवीरुधि [1]सुरससारसरसितसारकासारे [2]शोभनकसेरुकन्दलुब्धपोत्रिपोत्रोत्खाततटतडागे चकितचातके [3]सञ्चरन्मत्स्यपुत्रिकापत्रिपटलमधुरध्वनिविहितमुदि कदर्थितकदम्बे कम्बुद्विपि[4] प्रसृतविसप्रसूने विरलवारिदे

मृगदंशश्च शुनको ग्रामसूकरभेदकौ।
अग्निभश्च कपिलः स्यादिन्द्रमदकामुकः॥

इत्युत्पलिनी। मधुरा मधुतृणवीरुधश्च।

खड्गपत्रो मधुतृणमिक्षुर्मधुतरुर्मतः।

इत्युत्पलिनी। सुरसं सारसानां रसितं सारस्तलं यत्र तादृक् कासारः सरो यत्र तत्र। कासारः सरसी सर इत्यमरः।

शोभनकसेरुकन्दलुब्धानां पोत्रिणां वराहाणां पोत्रैर्घोणाभिरुत्खाततटास्तडागा यत्र तस्मिन्। कोलः पोत्री किरिः किटिरित्यमरः।

चकितास्त्रस्ताः संशयिता वा चातका यत्र। चक तृप्तौ प्रतीघाते च। सञ्चरदिति मत्स्यपुत्रिका जन्तुविशेषः। कदम्बो नीपवृक्षः। कादम्ब इति पाठः क्वचित्। कलहंसः। कादम्बः कलहंसः स्यादित्यमरः। चतक इति ख्यातः। प्रसृतानि विसप्रसूनानि कमलानि यत्र।

---

१ सरस D २ — शोभन- A C D E F H ३ सञ्चरन्मत्स्य- A C D E F H मधुरध्वनिमधुपिका- इति मद०। म० -पत्रिका A B D F म० -अनमुदि D E ४ कदम्बद्विपि A B कम्बुविद्विपि C F

तारतरतारके [1]चारुचन्द्रमसि [2]स्वादुतरसरःसलिले स्फुरितशफरचक्रकवलननिभृतबकानीके[3] मूकमण्डूकमण्डले[4] [5]सङ्कोचितकञ्चुकिनि[6] काञ्चनच्छेदगौरशालिशालिनि[7] क्रोशदुत्क्रोशे [8]सुरभिगन्धिसौगन्धिकगन्धवाहिहरिणाश्वे [9]कुमुदामोदिनि कौमुदीकृतमुदि निर्वर्हबर्हिणि निःकूजत्कोयष्टिके [10]धूतधार्तराष्ट्रे हृष्टकलमगोपिकागीतसुखितमृगयूथे कथीकृतयूथिके[11] [12]म्लायमानमालतीमुकुले[13] बन्धूकबान्धवे सञ्जातसुजातके[14] विद्वर्धितसौत्रामधनुषि स्मेरकाश्मीररजः-

---

बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च।

इत्यमरः।

बकानीके बकसमूहे। मूको निर्वाक्। कञ्चुकी सर्पः। सौगन्धिकं कह्लारम्। सौगन्धिकं तु कह्लारमित्यमरः। हरिणाश्वो वायुः। पृषदश्वो गन्धवह इत्यमरः।

कुमुदेत्यादि। निर्वर्हाः गलितपिच्छा बर्हिणो यत्र तत्र। कलमगोपिका शालिसंरक्षिका। यूथिकामोदिति कथामात्र-

---

१ चारुतरच- D २ स्वादुसर:- A B D E G ३ -बलानीके C D E G ४ -कुले A -पटले D ५ सङ्कु- E H ६ -किञ्चुल्किनि C F -किंशुलके D ७ शालशालिनि A B C G -शालिकेदारे D ८ सुरभिभि- A D H सु॰ -न्धिगन्ध- A D G H ९ कुमुदामोदमो- C १० धृतिमधा- E धृतधृतिधा- D ११ यूथे C १२ म्लायितमाल- C म्लायन्माल- D म्ला॰ -तीमनाकुले C D १३ -कुसुमे D -मकुले H १४ -सपुष्पतके A B H -सप्रच्छदे E H

पुञ्जपिञ्जरितदशदिशि [1]विकस्वरकमले शरत्समयारम्भे कन्दर्पकेतुः परिभ्रमन् शिलामयीं पुत्त्रिकां दृष्ट्वा कौतुकेन [2]मोहेन शोकावेगेन[3] मम प्रियानुकारिणीति करेण[4] पस्पर्श।

अथ[5] सा स्पृष्टमात्रा[6] [7]शिलास्वभावमुत्सृज्य [8]पुनर्वासवदत्तास्वरूपमापेदे। तामालोक्य कन्दर्पकेतुरमृतार्णवमग्न इव सुचिरमालिङ्ग्य पप्रच्छ। प्रिये वासवदत्ते कथय किमिदं वृत्तान्तम्। उदिता सती सा[9] दीर्घमुष्णं च निःश्वस्य कथयितुमारेभे।

आर्यपुत्रापुण्याया मम मन्दभाग्यायाः कृते महाभाग

शेपीकृता। बन्धूको बन्धुजीवकः। रक्तकस्तु बन्धूको बन्धुजीवक इत्यमरः। दुपहरिया इति ख्यातः। विमुद्रिते मौचामधनुषीति पाठस्तत्रउद्दः। काश्मीरं कुङ्कुमम्। विकस्वरं विकसितम्। विकासी तु विकस्वर इत्यमरः।

अथेत्यादि। एकाकी असहायः। एकादाकिनचाम-

---

१ स्फुटविकसत्पुरविकसरपद्मोदरकमले A B विकसत्कासावसरे C विकसत्पुष्के D २ भेदाको- A B मोहेन C ३ शोकावेगेन A B H वेगेन D शोकवेगेन इति क्व॰। + कामिनेन A B + -गतिः C ४ करेण B करेन C ५ चकार C ६ — मा स्पृष्टमात्रा D E F G H ७ शिलास्वभावं मूर्तिमु- C ८ — पुनर D H ९ इत्याकर्ण्यानम्। इत्युक्ता C

उज्झितराज्य एकाकी प्राकृतजन[1] इव वाङ्मनसयोरगोचरं[2] दुःखमनुबभूव। अथोपवासादिना[3] क्षामतरो मूलफलादिनार्यपुत्र आहारं[4] करोतीति विचिन्त्य फलान्वेषणायोपवनतरूनवलोकयन्ती[5] कतिपयनल्वगोचरमगच्छम्[6]। क्षणेन[7] च तरुगुल्मान्तरितक्रियमाणकायमानिकनिकेतनं[8] विरच्य-

---

च्छाये। एकाकी लेक एकक इत्यमरः। प्राकृतजन इव नीचजन इव। प्राकृतश्च पृथग्जन इत्यमरः। वाङ्मनसयोरित्यचतुरेत्यच्प्रत्ययान्तो निपातः।

अथेत्यादि। अगच्छं याता। क्षणेन सेनासन्निवेशं सेनाशिविरं दृष्ट्वेति चिन्तयन्तीं मां प्रति सेनापतिर्धावित इति सम्बन्धः। तरुगुल्मान्तरितं क्रियमाणं रच्यमानं कायमानिकैः कमार इति प्रसिद्धैर्हीनजातिपुरुषैर्निकेतनं पटमण्डपं यत्र तम्।

निवेशः शिविरोद्वाहविन्यासेषु प्रकाशितः।

इति विश्वप्रकाशः। विरच्यमानं विशेषेण रच्यमानमीश्वरस्य सेनापतेर्गृहं यत्र तम्।

---

१ जन C पृथग्जन D २ -रगोचरम A B ३ उपवासादिना A B D अनेकदिवसाहाराद्भूयतया C ४ क्षामतरो निद्रायते। यदि किञ्चित् मिलति फलमूलादिकं तदा शरीरस्थितिं C क्षामतरतनुर्निद्राति फलमूलादिकमाहारं D ५ -वलोकय D — उपवनतरूनवलोकयन्ती E F H ६ -गोचरं वनमगच्छम् D -नल्वमगच्छम् E F H ७ क्षणेन A B C G ८ -कायमानिकनिकेतनं D G कायमानं C

[1]मानेश्वरगृह्यमवतार्यमाणकण्ठारकमारभ्यमाणपटकुटीकं व्यवस्थाप्यमानवेश्यानिवेशं[2] श्रूयमाणतुरगह्रेषाशतं[3] वाद्य-[4]मानविश्रमढक्काशतपुष्करमन्विष्यमाणस्वादुसलिलाशयमुद्दि-

---

अवतार्यमाणमश्वादेर्भूमावुत्तार्यमाणकण्ठारकम्। कण्ठारकोति दाक्षिणात्यभाषायां प्रसिद्धम्। वस्त्रपात्रादिस्थापनार्थं वस्त्रादिनिर्मितं पात्रम्।

व्यवस्थाप्यमानं यथास्थाने स्थाप्यमानम्। वेश्यानां निवेशो यत्र।

श्रूयमाणं ह्रेषाशतं यत्र तम्। ह्रेषा ह्रेषा च निःस्वन इत्यश्वप्रकरणेऽमरः। अत्रत्यसमाधिः पूर्वमुदितः।

वाद्यमानं विश्रमसूचकं ढक्काशतं पुष्करं वाद्यविशेषो यत्र तम्। वृद्धिविशिष्टो विश्रमशब्दस्तच्छुद्ध एवेति स्पष्टं भाष्यप्रदीपे। आनकः पटहो ढक्केत्यमरः।

पुष्करं पङ्कजे व्योम्नि पयःकरिकराग्रयोः।
ओषधीद्वीपविहगतीर्थराजोरगान्तरे।
पुष्करं तूर्यवक्त्रे च काण्डे खड्गफलेऽपि च।

इति विश्वप्रकाशः।

श्यमानविपणिकेतुवंशं सेनासन्निवेशमपश्यम् ।[१] किमयं ममान्वेषणाय तातस्य व्यूहः[२] समायात आहोस्विदार्यपुत्रस्येति विचारयन्तीं मां [३]प्रति चारकथितवार्तः[४] सेनापतिर्धावितः । ततः किरातसेनापतिस्तादृश एव सेनान्वितो[५] मृगयागतः[६] सोऽपि धावितः । अनन्तरं चिन्तितं मया [७]यद्यहमार्यपुत्राय कथयामि तदा स एकाकोभिरेव[८] हन्तव्यो-

उद्दिश्यमान उत्पाद्यमानो विपण्यां पण्यवीथिकायां केतुर्यत्र । दिश अतिसर्जने । यद्वा उद्दिश्यमानः केतोरस्मिन् भागेऽस्मदीय आवास इति ज्ञानार्थमुद्देशविषयीक्रियमाणः केतुर्यत्र । आहोस्वित् संशयेऽव्ययसमुदायः ।

चारेण गूढपूरुषेण कथिता वार्ता वृत्तान्तो यस्मै । चारस्य गूढपुरुष इत्यमरः । तादृशश्चारकथितवृत्तान्तः किरातसेनापतिः ।

भेदाः किरातशवरपुलिन्दा म्लेच्छजातयः ।

इत्यमरः ।

मृगयाया आखेटार्थमागतः । आखेटो मृगया स्त्रियामित्यमरः ।

अनन्तरं दयोरेकदेशागमनोत्तरम् । एकाकिपत्न्युभयोः ।

---

१ + तमवस्तोकादहमचिन्तयम C + ततोऽहमेवमचिन्तयम् D २ तातव्यूह E F ३ प्रचार- E F ४ + इव A B D + तातद्विष C ५ सेनानुगतो A B सेनापतन्वितो C सेनयान्वितो D ६ मृगयायामागतः C ७ यद्यहं मार्यपु- A B H ८ एकाकी पतिरेवाहमेव C

ऽस्य न कथयामि [1]तदैभिरहं घातनीयेति चिन्ताक्षण एव द्वयोः सेनयोर्युद्धमभवदेकामिषलुब्धयोर्गृध्रयोरिव। ततः [2]प्रवृत्तप्रतिशरासनशरासारदुर्दिनहृतदिनकरकिरणे रण-

---

आमिषं पलले लोभे सम्भोगोत्कर्षयोरपि।

आमिषं सुन्दराकाररूपादिविषयेऽपि च॥

इति विश्वप्रकाशः।

तत एवं रणखले सति। रणभूमौ धान्यमर्दनस्थान इति यावत्। योधाः समसेकैकावच्छेदेन द्विषां धनुषां च जीवस्य जीवायाः प्रत्यस्तायाश्चाकृष्टिमाकर्षणञ्चक्रुरिति सम्बन्धः। अ-क्रमातिशयोक्तिरलङ्कारः। पूर्वनिपातप्रकरणानित्यत्वेनात्यन्ता-तिशयोक्तिः।

अत्यन्तातिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमः।

इति लक्षणात्।

प्रवृत्तो यः प्रतिशरासनात् शत्रुधनुषः शरासारो बाणधा-रासम्पातस्तेन दुर्दिनं मेघच्छन्नदिनं तेन हृतदिनकरकिरणे सति। गौणे आसारदुर्दिने। धारासम्पात आसारः। मेघ-च्छन्नेऽह्नि दुर्दिनमित्यमरो द्वयोः।

---

१ तदाऽभिमाभिया॰ C तदैभिरेवाह मेतव्वेति D २ प्रवितततशरमारदुर्दिन-दिन॰ C प्रवितशरासारदुर्दिनदोनदिन॰ D

[1]कर्मविशारदद्विरददन्तद्वयोत्क्षिप्तसुभटचणक्रियमाणविद्याधरविभ्रमे [2]समरदर्शनसञ्चरदनेकनभश्चरचारणचक्रवाले वेतालसमाक्रान्तस्कन्धकबन्धचक्रक्रियमाणचारुप्रचारे[3] [4]चारुभटखड्गखण्डितद्विरदपादसमाप्तपिशाचीक-

---

रणकर्मणि विशारदश्चतुरो द्विरदो हस्ती तेन दन्तद्वयोत्क्षिप्तः सुभटः शूरस्तेन चणं क्रियमाणे आत्मीयमाणो विद्याधरविभ्रमो देवयोनिविशेषविशिष्टभ्रमो येन तस्मिन् सति।

समरदर्शनार्थं सञ्चरदनेकनभश्चरचारणानां देवकुशीलवानां चक्रवाले मण्डले सति। चक्रवालं तु मण्डलमित्यमरः। चारणाश्च कुशीलवाः।

चारुभटखण्डितद्विरदपादेन समाप्तं सम्यक् प्राप्तं पिशाच्याः कर्णे यदुलूखलाभरणं तत्कौतुकं यत्र।

समुत्पतन्नतिनिनद एव नान्दी नाटकादौ प्रयुज्यमानः काव्यार्थसूचकः श्लोको यत्र। नद्यृतश्चेति कप्। न कपीति ह्रस्वनिषेधः। तथाच भरतः।

> आशीर्नमस्क्रियारूपश्लोकः काव्यार्थसूचकः।
> नान्दीति कथ्यते।

---

१ क॰ -द्विरदकरदूरोत्क्षिप्त C क॰ -द्विरदकरदूरसमोत्क्षिप्त D H स॰ प्रमुग्धभरत- C D २ समरदर्शनकाम्यागम- A B ३ -चारणचारणप्रचारे B C — वेताल॰ -प्रचारे E F H ४ चा॰ -पादसमर्पितपि- A B C

णोन्नूखलाभरणकौतुके समुत्पतदनिनिनदनान्दीके[1] कान्दिशीकभीरुणि[2] रणखले [3]शृगालप्रार्थनीयेष्वामिषपिण्डेष्विव[4] जिह्मगदष्टेष्विव[5] शरीरेष्वनास्थां कलयन्तः[6] समं द्विषां[7] धनुषां च जीवाकृष्टिं[8] योधाश्चक्रुः। त्यागिन इव दानवन्तो मार्गणसम्पातमसहन्तः[9] सम्भृङ्गविलासिन इव शृङ्गारशोभिताः सहेमकक्षाश्च सदारामा इव कदलीराजिताः सद्विजाश्च निशा[10] इव नक्षत्रमालोपशोभिता दिवसा

कान्दिशीको भयपलायितः। कान्दिशीको भयद्रुत इत्यमरः। भीरुः। शृगाले जम्बुके भीरुः शूरे वै दानवान्तर इति विश्वः। जिह्मगः सर्पः।

जीवा जीवन्तिकाभूम्योर्मौर्वीसिञ्जितवृत्तिषु।

इति विश्वप्रकाशः।

त्यागिन इव दातार इव दानं मदजलवितरणं मार्गणानां बाणानां याचकानां च सम्पातमसहन्तो महामृगा गजा रेजुः। महामृगः पुष्करिदीर्घमारुतौ इति हारावली।

---

१ समुत्पुलकफलकिनि मदमुदीके A B C H २ + प्रस्थप्रस्त्रीवनमे जनेश्वपन-जिनकाहिनि C ३ शृगालबलशा- A B H शृगालीशा- C D E F ४ — इव E F + वातहनेषु सर्वेष्विव C + वातदष्टकदष्टेषु सर्वेष्विव D ५ + सर्वेष्विव C D ६ कम्पयन्तः E F H ७ विद्विषां D ८ जीवाकर्षेण A B C D ९ इति सन• च। -सहमानाश्च A B C F G H १० निवसा C D E F G H

इवोल्लसत्पुष्करा महाम्बुगा बभुः। उत्क्षिप्ता[१] इव चर्मा मुञ्चन्तः पयोधय इवावर्तशोभिताः सोर्मयश्चोद्यानदेशा इव समल्लिकाक्षाः कुलगृहा इवाभिनवभाण्डधारिणो रत्नाकरा इव सदेवमणयो लेखा इव सेन्द्रधृतयस्तुरङ्गाश्च विरेजुः। कर्णाभ्यां श्रुतपरपरिवादाभ्यां[२] खलोदयसाधुविपत्तिसाक्षिभ्यामक्षिभ्यां[३] मूर्ध्ना चास्थानेऽपि नमता[४] [५]विमुक्तोऽहमिति हर्षादिव[६] ननर्त चिरं कबन्धः। ततः [७]कृतपरिहासेनेव चक्षुः[८] पिदधता परापवादश्रवण-

---

उत्क्षिप्ता इवाव्यवस्थितचित्ता इव चर्मा शान्तिं पृथ्वीं च। तुरङ्गा अश्वा विरेजुः। कबन्धोऽपमूर्धकलेवरम्। इत्यमरः। इत्थं हर्षान्ननर्त।

श्रुतपरपरिवादाभ्याम्। परापवादाभ्यां साक्षी साक्षाद्द्रष्टा। साक्षाद्द्रष्टरि सञ्ज्ञायामिति साधुः।

अस्थाने महानर्हस्थाने नमता। ततो रजसा जजृम्भे। प्रादुर्भूतम्। जृभि गात्रविनामे। भावे लः।

कृतपरिहासेनेव चक्षुः पिदधताच्छादयता। लोकप्रसिद्धमेतत्। वायुरान्तरो बाह्यश्च। योधानां भटानां पलितङ्कर-

---

१ उत्क्षेपिता C २ -परिवादकुतूहलिभ्यां A B Γ H ३ नेत्राभ्यां ममालोकितसाधुविपत्तिभ्यां C ४ चाप्रणामप्रवणता C ५ व्यमोऽ· C द्वितीयार्थे विमुक्त इति A इति भ्रम· च। ६ — इव A B — हर्षादिव E F ७ — कृत· C G सपरि- D E F ८ चक्षूंषि C G

भीरुणेव श्रोत्रवृत्तिं स्थगयता सोन्मादेनेव वायुवेगविक्षिप्तेन[1] पलितङ्करणेनेव सुरयोषितामन्धङ्करणेनेव[2] योधानां तिमिरेणेव समरप्रदीपस्य पतितेनेव विमुक्तगोत्रेण[3] मीमांसकदर्शनेनेव[4] निरस्तदिगम्बरदर्शनेन सत्पुरुषेणेव विष्णुपदावलम्बिना [5]रणजेन रजसा [6]जजृम्भे ।[7] कश्चिद्राम इव रावणवधमकरोत् कश्चित् कृष्ण इव नरकच्छेदमकार्षीत् कश्चिद्बौद्धसिद्धान्त इव क्षपितश्रुतिवचनदर्शनोऽभवत् कश्चित् क्षपणक इव कटावृतो बभूव[8] कश्चिदाशङ्कितोरुभङ्गः सुयोधन इव पयसि विवेश[9] कश्चित् शरतल्पगतो[10] भीष्म इव

णेन । पलितं जरसा शौक्ल्यमित्यमरः । आढ्यसुभगेति करणे ख्युन् अरुर्द्विषदिति मुम् ।

समरप्रदीपस्य रणरजनीमुखस्य । पतितेन इव महापातकिनेव विमुक्तगोत्रेण । गोत्रं वंशः । गोत्रा पृथ्वी । आशङ्कित ऊर्वोर्भङ्गो येन । पक्षे ऊरुभंशात् भङ्गः पराजयः ।

शरतल्पं शरशय्याम् । चिराय । कार्तिकशुद्धदशमीमारभ्य

---

१ -अभिक्षिप्तेन D -उत्क्षिप्तेन E F -आक्षिप्तेन H २ -इवेव E F H ३ + कुलपतिनेव मलयपवनाभिना कलितेनेव हस्तिभ्यामवधिना राजभेदेव समरित- मलेन विनीतेनेवापकृदहनेनाभ्यनेनेव पतालेनेव C ४ मीमांसकेनेव A B H ५ रणरजसा A B समरकेन रजसा D ६ विज- D ७ + तत्र समरप्रमाटे B C + तत्र च समरप्रमाणे D ८ — कश्चिद्राम इव रा० बभूव A D E F H + कश्चित् पुरावर्ति इव पपात D ९ — कश्चिदा० विवेश C १० भ्यादेः A B D E F G H इति अन० च ।

चिराय[१] श्वसन्नासीत् कश्चित् कर्ण इव [२]विक्लवीकृतसर्वाङ्गः शक्तिमोक्षमकरोत्। ततो विध्वस्तध्वजपटं पतत्पताकं च्युतचापचामरापीडं [३]स्खलत्खड्गं [४]निधनमवाप सैन्यम्।

अनन्तरं [५]यस्याश्रमस्तेन मुनिना [६]पुष्पादिकमादायागतेन प्रतिपन्नवृत्तान्तेन[७] त्वत्कृते ममायमाश्रमो [८]भग्नोऽतः शिला-

---

माघशुक्लाष्टमीपर्यन्तमित्युदयशङ्करपाठकाः। अत्रोपपत्तिस्तु तेषां कृतौ द्रष्टव्या। पक्षे चिराय चिररात्राय चिरस्येति चिरार्थका इत्यमरः।

विक्लवीकृतं विक्लवीभूतं सर्वाङ्गं यस्य। शक्तेर्बलस्य मोक्षं त्यागम्। पक्षे शक्तेर्वासवदत्ताया अमोघाया मोक्षं घटोत्कचे त्यागम्।

शक्तिरायुधभेदे स्यादुत्साहादौ बले स्त्रियाम्।

इति हेमचन्द्रः।

निधनं मरणम्। मरणं निधनोऽस्त्रियामित्यमरः। प्रतिपन्नवृत्तान्तेन ज्ञातवृत्तान्तेन। गमा कर्मणि क्तः।

---

१ चिराय C २ विक्लवावधूतस C विक्लवीभूत- D ३ स्खलद्दानुष्क C स्खलत्खड्गधनुष्कं D ४ तत समस्तसैन्यमन्योन्यं निधनमवाप A B सैन्यमन्योन्यं निधनमवाप C तत् समस्तमिदाश्रमे सिद्धो निधनं जगाम सैन्यम् D ५ यस्याश्रमस्तेन B D H ६ पु० -माहृत्याग A B पु० -मादातुं ग- H इति क्रम० च। ७ + योगदृशा C ८ भग्न इति C D

मयो[1] भवेति शप्ताहम्। [2]चणेन च वराकीं बहुदुःखमनुभवन्तीं मां विलोक्यार्यपुत्रकरस्पर्शावधिं शापान्तमकरोत्।

ततः कन्दर्पकेतुः समागतेन मकरन्देन[3] वासवदत्तया च[4]

चणेन च वराकीं बहु दुःखं भवद्वियोगजमनुभवन्तीं मां विलोक्य शापं शिलामयत्वरूपम्। आर्यपुत्रस्य करस्पर्शोऽवधिरन्तोऽस्य तादृशमकरोत्।

नागरोक्त्यार्यपुत्रेति नाम्नोक्त्या च प्रयुज्यते।

इति भरतः।

ततः कन्दर्पकेतुः समं वासवदत्तासङ्गसमकालमागतस्तेन मकरन्देन वासवदत्तया च सह स्वपुरं कुसुमपुरं गत्वा हृदयं मनोऽनतिक्रम्य यथाहृदयं मनोऽनुरूपमभिलषितं येषु तानि सुखानि सम्भोगशृङ्गारसम्बन्धीन्यनुभवन् कालं निनाय। चेतो हृदयं स्वान्तं हृन्मानसं मन इत्यमरः।

वासवदत्तामधिकृत्य कृताख्यायिका वासवदत्ता। अधिकृत्य कृते ग्रन्थ इत्यर्थे वृद्धाच्छः। तस्य लुबाख्यायिकाभ्यो बहुलमिति लुप्। वासवदत्ताख्यायिका समाप्तेति पाठस्तु भ्रममूलकः।

---

१ + पुत्रिका मं A B २ चणेन च वराकी बहुदुःखमनुभविष्यसीत्यार्यं A चणमात्रं वराकीय दुःखमनुभविष्यसीति करुणयार्य- C चणेन च वराकीय बहुदुःखमनुभवसीति करुणाकृष्टो मुनिरार्यं D ३ समागमे मकरन्दे C ४ — च A B F G H

सह[1] स्वपुरं गत्वा [2]यथाहृदयाभिलषितानि[3] [4]सुखान्यनुभवन् कालं निनाय[5] ।

.इति [6]महाकविसुबन्धुविरचिता वासवदत्ता[7] समाप्ता ।

के न वासवदत्ताया अलङ्काराः प्रसाधकाः ।
दर्पणे के च नेक्षन्ते व्याख्याने वरभूषणे ॥
दोषः कृतौ सुमतयो मम कोऽपि चेत् स
युष्माभिरत्र कृपया विनिवारणीयः ।
आर्ताः खगाः समवलोक्य सवर्गबाधां
निःशङ्किका अपि कुर्वन्ति यतः समन्तात् ॥
त्रिलोकचन्द्रात्मजकृष्णराम-
सूनुस्त्रिपाठी शिवरामनामा ।
व्याख्यामकार्षं कृतिनः सुबन्धोः
कृतेरिमां काञ्चनदर्पणाख्याम् ॥

इति त्रिपाठिशिवरामरचिता ,दर्पणाख्या वासवदत्त
सम्पूर्णा ।

---

१ सम A — सह B २ अभि A यथाभि B H हृदयाभि C D E F G ३ + तानि मानि C ४ सुरतसुखा A B C D E F G ५ + इति C E ६ श्रीवररुचिभागिनेयमहा D ७ + ख्याख्यायिका A B C E F G, + नामाख्यायिका D + भिधानाख्यायिका H

शुद्धिपत्रम्।

प्र०	प०	अशुद्धम्।	शुद्धम्।
१	११	पञ्चवत०	पञ्चवत्
३	३	कौटिल्यै	कौटिल्ये
४	२	-कण्ठमिश्र०	-कण्ठमजि०
५	२	गकुल०	गं कुल०
७	१०	-पमाभेदे	-पमा भेदे
१२	१	कार्यं०	सौकर्यं०
१२	१	कशा०	कंशा०
१५	१२	-निद्र	-निवद्र
१५	१३	-तानि०	-ता नि०
१८	२	पक्षे।	पक्षो।
२०	२	पक्षीदे।	पक्षीभेदो
२०	२	इ इति	पूर्वभट्ट शब्दादि
२४	२१	उत्थित०	उत्थितः
२८	११	-पार्थिवा०	-पार्थिवा०
२८	२०	-जीवन	-जीवम्
३१	३	शब्दाः	शब्दः
३१	१	ह्या०	ह्यो०
३४	१२	यद्य	यद्ये
३५	३	मात्र०	मा त्र०
३५	३	आरम्भ	आरम्भम्

पृ०	पं०	अशुद्धम्।	शुद्धम्।
३६	२२	-द्या	-द्या०
३८	५	येयाम	येयाम्
४३	१०	-मूर्ध क०	-मूर्धक०
४८	१४	निशान्तर्व०	निशान्तप०
४९	१	-रेप	-रेपु
४६	२	कुर्वतीष	कुर्वतीपु
५१	२	-नानद्य०	-नानुद्य०
५१	२१	शुक चारु०	शुकचारु०
६२	१२	चतु०	चत्तु०
६४	२	दर्शनन	दर्शनेन
७०	१३	श्वपनः	श्वसनः
७४	१४	निजकर०	निजकरि०
७७	१५	केयदान०	केयदानन०
७६	१६	श्रमवश्गा	श्रमवश्गाः
७६	१६	वश्गा	वश्गाः
७६	१६	श्रमगा	श्रमगाः
८०	१	-प्रत्य०	-प्रैत्य०
८१	१६	सञ्जन०	सञ्जन
८५	१६	रा० इति	निष्काशनीयम्
८६	१७	रथा	रथो
८७	१	-नगत:	-नुगतः
८८	१६	इवाक्य	इवाक्य०
८९	२१	-स्थादवि०	-स्यादवि०
६४	१	ग्रीयैः	ग्रीयै
६५	२२	सायन्तर०	सायन्तन०

पृ०	पं०	अशुद्धम्	शुद्धम्
९९	२०	सञ्जन्मत-	-सञ्जन्मत-
९८	१३	भैरवम	भैरवम्
१०१	१२	-मूर्द्ध क०	-मूर्धक०
१०१	१६	-मूर्द्ध क०	-मूर्धक०
१०३	१	-मुः प०	पु प०
१०३	७	-विकटस	-विकटः स
१०३	८	वपुः पू०	वपुःपू०
१०३	१५	सटाज०	सटा ज०
१०३	२०	वर्षयित्वाक०	वर्षयित्वा
१०३	२१	-कटुस्फा०	-कटुः स्फा
१०८	४	श्रता	श्रुता
१०९	१८	ज	ज-
११०	२	तर्द०	तैर्द०
१११	८	प्रश्नः	प्रश्न
११२	८	-ना पीवरस०	-नाऽपि वीरत०
१२०	१२	विभी-	विभो-
१२१	४	-मग्ना-	-मुग्ना-
१२५	११	कन्यातुला प०	कन्या तुला प
१२५	१२	-भया०	-भाया०
१३०	८	मीगाम्	ऽभीगाम्
१३२	१२	विरचितं	विरचिता
१३२	१८	-धारा	-धारा-
१३७	१८	मूर्च्छनाम-	मूर्च्छनाय
१४०	१५	-मदोत्	-मदोता
१४१	१०	-रो दाम	गदाम

पृ॰	प॰	अशुद्धम्।	शुद्धम्।
३६	२२	-ह्ना	-ह्ना॰
३८	५	येषाम	येयाम्
४३	१०	-मूर्ध क॰	-मूर्धके॰
४८	१४	निशान्तर्व	निशान्तपं॰
४९	१	-रेष	-रेषु
४६	२	कुर्वतीष	कुर्वतीषु
५१	२	-नानञ्च॰	-नानुञ्च॰
५१	२१	सुक चारु	सुकचारु॰
६३	१२	चतुं॰	चञ्चु॰
६४	२	दर्शनन	दर्शनेन
७०	१३	श्वपनः	श्वसनः
७४	१४	निजकर॰	निजकरि॰
७७	१५	कोयदान॰	कोषदानन॰
७६	१६	श्रमवशगा	श्रमवशगाः
७६	१६	वशगा	वशगाः
७६	१६	श्रमगा	श्रमगाः
८०	१	-प्रत्य॰	-प्रेत्य॰
८१	१६	सव्जन॰	सव्जन
८५	१६	रा॰ इति	निष्काशनीयः
८६	१७	रथां	रथो
८७	१	-नगतः	-नुगतः
८८	१६	इवारय	इवारय॰
८९	२१	-ष्यादवि॰	-प्यादवि॰
६४	१	योयैः	योयै
६५	२२	सायन्तर॰	सायन्तन॰

पृ०	प०	अशुद्धम्।	शुद्धम्।
२४१	१७	-लाडछित०	-लाञ्छि
२३५	४	यस्या स्ताम्	यस्यास्ता
२४७	५	सुग्रीव्	सुग्रीव०
२५१	६	दिग्भ्या	दिग्भ्यो
२५८	३	क्षत	क्षतं
२६०	३	प्रचर०	प्रचुर०
२६०	१६	-बै ै:	-बैल्वै
२६५	८	कारः	-काय'
२६६	१	-पात०	-पेत०
२६८	१	फे ै:	फेनै.
२७२	८	तेनाप्य	तेनाऽप्य
२८१	४	घनोत्स-	घनोत्सु-
२८३	१५	वि	बि-
२९०		-गाचरं	-गोचरं
२९३		त्वक्रन्ता-	त्वङ्क्ता-
२९८		-संप्राविधि	-संप्रावधिं